प्रशमरतिप्रकरणकी विषय-सूची।

विषय — पृष्ठांक

प्रकाशकका निवेदन।

श्रीमदुमास्वातिका सुप्रसिद्ध ग्रंथ 'सभाष्यतत्त्वार्थाधिगमसूत्र' (मोक्षशास्त्र) रा० च० जैनशास्त्रमाला बहुत पहले प्रकट कर चुकी है, अब उनकी यह दूसरी सुन्दर रचना प्रशमरतिप्रकरणके प्रकाशित करनेका सौभाग्य प्राप्त हुआ है।

इस ग्रंथकी भी दिगम्बर श्वेताम्बर दोनों सम्प्रदायोंमें मान्यता है। इसका उल्लेख धवलाटीकामें श्रीवीरसेनाचार्यने किया है।

इस ग्रंथपर दो संस्कृत टीकायें श्वेताम्बराचार्योंकृत अभीतक मुद्रित हुई हैं। इनमें प्राचीन टीका श्रीहरिभद्रसूरिकी है, जो इसमें मुद्रित है। यह टीका जैनधर्मप्रसारकसभा भावनगरसे वीर सं० २४३६ में मुद्रित हुई थी, जो अब अप्राप्य है। दूसरी टीका देवचंद लालभाई पुस्तकोद्धार फंडसे १० वर्ष पहले छपी है, जो प्राप्य है।

लगभग ५-६ वर्ष पहले इस ग्रंथका अनुवाद स्याद्वाद महाविद्यालय काशीके प्रधानाध्यापक पं० कैलाशचन्द्रजी शास्त्रीने शुरू किया था, पर पं० जीको अवकाश न होनेसे साहित्याचार्य पं० राजकुमारजी शास्त्रीने पूरा किया। पं० जीने मुद्रित प्रति और ४-५ हस्तलिखित प्रतियोंके आधारसे मूल और संस्कृतटीकाका संशोधन सम्पादन बड़े परिश्रमसे किया है, भाषाटीका भी बहुत सुन्दर और सरल लिखी है। इसलिए दोनों विद्वानोंको जितना धन्यवाद दिया जावे थोड़ा है।

प्रोफेसर राजकुमारजी इस ग्रन्थकी एक विस्तृत प्रस्तावना लिख रहे हैं, ग्रन्थको शीघ्र प्रकाशमें लानेकी दृष्टिसे वह इस ग्रन्थके साथ नहीं दी जा सकी है। महत्त्वपूर्ण प्रस्तावना पूर्ण होते ही उसे पृथक् प्रकाशित करके पाठकोंके सेवामें भेज दी जायगी।

जैनधर्मप्रसारक सभाके साहित्यप्रेमी मंत्री स्व० सेठ कुँवरजी आणंदजी और देवचंद लालभाई पुस्तकोद्धार फंडके ट्रस्टी शा० जीवनचन्द्रजी साकरचन्द्रजी जौहरीने अप्राप्य मुद्रित प्रतियाँ देनेकी कृपा की, इसलिए इन्हें भी धन्यवाद है। रायचंद्रजैनशास्त्रमालामें २-३ नये ग्रंथोंका प्रकाशन हो रहा है, जो अगले वर्ष तक प्रकट होंगे।

जौहरी बाजार
रक्षाबंधन सं. २००७

निवेदक
—मणीलाल जौहरी

नमो वीतरागाय

रायचन्द्रजैनशास्त्रमालायां

श्रीमदुमास्वातिविरचितं

प्रशमरतिप्रकरणम्

श्रीहरिभद्रसूरिविरचितटीकाङ्कितं

हिन्दीभाषानुवादसहितश्च ।

टीकाकारस्य मङ्गलाचरणम्

'प्रशमस्थेन येनेयं कृता वैराग्यपद्धतिः ।
तस्मै वाचकमुख्याय नमो भूतार्थभाषिणे ॥ १ ॥

प्रशमरतिप्रकरणारम्भे मङ्गलाभिधानं विवक्षितप्रकरणार्थस्याप्रत्यूहेन परिसमाप्त्यर्थमित्याह—

कारिका—नाभेयाद्याः सिद्धार्थराजसूनुचरमाश्चरमदेहाः ।
पञ्चनवदश च दशविधधर्मविधिविदो जयन्ति जिनाः ॥ १ ॥

संस्कृत टीका—नाभिः कुलकरः । नाभेरपत्यं नाभेयः ऋषभनामा आदिदेवः स आद्यो येषां तीर्थकृतां ते नाभेयाद्याः । सिद्धार्थो राजा, तस्य सूनुर्वर्धमानाख्यः, स चरमः पश्चिमो² येषां ते सिद्धार्थराजसूनुचरमाः । चरमः पश्चिमो देहो येषां ते चरमदेहाः । ततः परं संसृतेरभावादन्यशरीरग्रहणासंभवः, कर्माभावात् पञ्चेन्द्रियादिप्राणदशकाभावः, तदभावाच्च शरीराभावः ततः सांसारिकसुखातीता एकान्तिकात्यन्तिकानतिशया निराबाधस्वाधीनमुक्तिसुखभाजः संवृत्ता इत्यर्थः । कियन्तस्ते पुनः ? इति संख्यां निरूपयति—' पञ्चनवदश च ' इति, कृतद्वन्द्वसमासाः चतुर्विंशति ' इत्यर्थः । अन्ये तु पञ्चादिषु त्रिष्वपि पदेषु प्रथमाबहुवचनं विदधति । ' च ' समुच्चये । ' सर्वे च ते शास्तारो भव्यसत्त्वानामुपदेष्टारो धर्मस्य दशविधस्य क्षमादेर्मलक्षयावसानस्य ' इत्याह—' दशविधधर्मविधिविदः ' इति । विधिः प्रकारः क्षमादिस्तं विदन्तीति । स चोपरिष्टादस्यैव—' सेव्यः क्षान्तिर्मार्दव ' इत्यादिना । विदित्वा च केवलज्ञानेनोपदिशन्ति

१ प्रशमस्थेन पु० । २ पश्चिमो वर्धमान स्वे—पु० । [illegible] स्वे—मु० ३ हैत्य पु० ४ विदित के—मु०

मुमुक्षुभ्यः सत्त्वेभ्यः त एवंविधा जयन्ति सर्वान् अन्यतीर्थकृतोऽभिभूय त एव जयन्ति नान्ये। यथाह आचार्यः सिद्धसेन—[1]

" अन्येऽपि मोहविजयाय निपीड्य कक्षामभ्युत्थितास्त्वयि विरूढसमानमानाः।
अप्राप्य ते तव गतिं कृपणावसानास्त्वामेव वीर शरणं ययुरुद्वहन्तः ॥ १ ॥ "

के पुनस्ते नाभेयाद्याः सिद्धार्थराजसूनुचरमाः? इत्याह—' जिनाः ' इति। रागद्वेषजेतारो जिनाः। रागद्वेषौ वक्ष्यमाणौ मोहनीयकर्मप्रकृतेर्भेदौ, तद्ग्रहणाच्च सकलमोहप्रकृतिभेदग्रहणम्, तज्जये च ज्ञानदर्शनावरणान्तरायाणि क्षयमुपयान्तीति। अतो घातिकर्मचतुष्टयक्षयात् केवलज्ञानभास्कराविर्भावः। अतो रागद्वेषग्रहणं सूचनमात्रमिति ॥ १ ॥

भाषाटीकाकारका मङ्गलाचरण

सूरिः श्रीमदुमास्वाती, राजतां मे चिदम्बरे।
सन्मार्गदर्शिका यस्य, मुमुक्षूणां सदुक्तयः ॥

दोहा-मङ्गलमय मङ्गलकरन, मङ्गल-सिद्धि-निधान।
मेरे मन-मन्दिर बसो, उमास्वाति भगवान ॥

इस प्रशमरति नामके प्रकरणके प्रारंभमें इसकी निर्विघ्न समाप्तिके लिए ग्रन्थकार मङ्गलाचरण करते हैं —

अर्थ—नाभिरायके पुत्र श्रीऋषभदेवको आदि लेकर राजा सिद्धार्थके पुत्र श्रीवर्धमानस्वामी पर्यन्त दस प्रकार धर्मकी विधिके जाननेवाले चरमशरीरी चौबीस जिनदेव जयवन्त हैं।

भावार्थ—श्रीऋषभदेव इस युगके प्रथम तीर्थंकर हैं और श्रीवर्धमानस्वामी अन्तिम तीर्थंकर हैं। सभी तीर्थंकर चरमशरीरी होते हैं। तीर्थंकरके भवके बाद उनके संसारका अन्त होनेके कारण वे अन्य शरीर धारण नहीं करते। तथा कर्मोंका अभाव होनेसे इन्द्रिय और प्राण भी उनके नहीं रहते। अतः उनके सब शरीरोंका अभाव हो जाता है। और शरीरका अभाव हो जानेसे सांसारिक दुःखसे मुक्त होकर एकान्तिक, आत्यन्तिक, निरतिशय और बाधारहित मुक्तिके सुखका अनुभवन करते हैं। वे तीर्थंकर ५+९+१०=२४ हैं। वे सभी क्षमा, मार्दव, आर्जव आदि दस धर्मोंको जानकर मोक्षके इच्छुक भव्य जीवोंको उसका उपदेश देते हैं, अतः वे धर्मकी दस विधियोंके ज्ञाता कहे जाते हैं। तथा राग और द्वेषके जीतनेवाले होनेके कारण वे सभी जिन कहलाते हैं। राग और द्वेष मोहनीय कर्मके भेद हैं। उनके ग्रहणसे मोहनीयके सब भेदोंका ग्रहण समझना चाहिए। और मोहनीयको जीत लेनेपर ज्ञानावरण, दर्शनावरण और अन्तरायकर्म नष्ट हो जाते हैं। अतः चार घातिकर्मोंके क्षय हो जानेसे केवलज्ञानरूपी सूर्य प्रकट हो जाता है। इस प्रकारसे वे तीर्थंकर अन्य मतोंके तीर्थंकरोंको पराजित करके जयवन्त होते हैं। क्योंकि अन्य तीर्थंकरोंमें ये सब गुण नहीं पाये जाते। जैसा कि आचार्य सिद्धसेनने कहा है—

" भगवन्! अन्य देव आपके उत्कर्षको सहन न करके मोह-विजयके लिए तैयार हुए; परन्तु वे

[1] द्वा० ३ श्लो० १०

मोहको नहीं जीत सके। उन्हें आपका पद प्राप्त नहीं हो सका। उनका प्रयत्न निष्फल गया और अन्तमें वे आपकी ही सफल शरणमें आगये।"

भरतक्षेत्रसंभूततीर्थकृच्चतुर्विंशतेः प्रकरणकारो नमस्यां विधाय संम्प्रति समस्तकर्मभूमिवर्तिनो जिनादीन् प्रणिवित्सुराह—

भरतक्षेत्रमें उत्पन्न हुए चौबीस तीर्थंकरोंको नमस्कार करके अब समस्त कर्मभूमिके तीर्थंकर आदिको नमस्कार करनेकी इच्छासे ग्रन्थकार कहते हैं:—

जिनसिद्धाचार्योपाध्यायान् प्रणिपत्य सर्वसाधूंश्च ।
प्रशमरतिस्थैर्यार्थं वक्ष्ये जिनशासनात् किञ्चित् ॥२॥

टीका—पूर्वोक्तलक्षणा जिनाः, तीर्थकृतः सामान्यकेवलिनो वा। सिद्धास्तु निष्ठितसकलप्रयोजनाः सकल कर्मविनिर्मोक्षाल्लोकशिखराध्यासिनः स्वाधीनसुखाः साद्यपर्यवसानाः। पञ्चविधाचारस्थास्तदुपदेशदानादाचार्याः परमार्थप्रवचनार्थनिरूपणे निपुणाः। उपेत्य उपगम्य यतोऽधीयन्ते शिष्याः इति उपाध्यायाः सकलदोषरहितसूत्रसंप्रदाः। अत्र द्वन्द्वसमासस्तान्। ज्ञानदर्शनचारित्रलक्षणाभिः पौरुषेयीभिः शक्तिभिर्मोक्षं साधयन्तीति साधवः। सर्वग्रहणाद्येऽप्यन्ये प्रतिपन्नाः समस्तसावद्ययोगविरतिलक्षणं सामायिकं तेऽपि प्रणिपातार्हा इति दर्शयति। अथवा सर्वशब्दः सर्वानेवापेक्षते मध्यवर्तित्वात्। 'सर्वान् जिनान् सर्वान् सिद्धान्, सर्वानाचार्यान्, सर्वानुपाध्यायान्, सर्वसाधूंश्च प्रणिपत्य' इति प्रत्येकमभिसम्बन्धः।

एवमिष्टदेवतोद्देशेनाभिहितः प्रणिपातः। तदनन्तरमाराद्रुपकारित्वादाचार्यादीनपि प्रणम्य अन्वर्थसंज्ञायुक्तप्रकरणक्रियां प्रतिजानीते, प्रतिविशिष्टप्रयोजनं च दर्शयति कारिकार्द्धेन—'प्रशमरतिस्थैर्यार्थम्' इति।

अर्थ—अरिहन्त, सिद्ध, आचार्य, उपाध्याय और सर्वसाधुओंको नमस्कार करके 'प्रशमरति' अर्थात् वैराग्यमें प्रीतिको दृढ़ करनेके लिए जिनशासनके आधारपर कुछ कहूँगा।

भावार्थ—जिनका लक्षण पहले कह आये हैं। तीर्थंकरोंको अथवा सामान्य केवलियोंको जिन कहते हैं। जिनके सभी प्रयोजन पूरे हो चुके हैं, अर्थात् जो कृतकृत्य हैं। जिन्हें कुछ करना बाकी नहीं है। तथा समस्त कर्मोंसे मुक्त हो जानेसे जो लोकके अग्र भागमें विराजमान हैं, जिनका सुख स्वाधीन है और जो सादि होते हुए भी अन्तरहित हैं, वे सिद्ध हैं। जो दर्शनाचार, ज्ञानाचार, वीर्याचार, चारित्राचार और तपाचार इन पाँच आचारोंका स्वयं आचरण करते हैं और दूसरोंको उनका उपदेश देते हैं, वे आचार्य हैं। ये परमार्थके लिए लाभकारी शास्त्रके अर्थ करनेमें निपुण होते हैं, अर्थात् जिनागमके ज्ञाता और कुशल व्याख्याता होते हैं। जिनके समीपमें जाकर शिष्यवर्ग सकल दोषोंसे रहित सूत्र-ग्रन्थोंका अध्ययन करता है, वे

---

१ साम्प्रतं मु०। २ सर्वक-मु०। ३—थ माचादा प०। ४ पारमर्ष—प०। ५ सूत्रप्रदाः प०। ६—येप्यत्र-मु०। ७ सर्वोपाध्यायान् मु०।

उपाध्याय हैं। सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्ररूपी अपनी शक्तिके द्वारा जो मोक्षकी साधना करते हैं, वे सर्वसाधु हैं। साधुके पहले 'सर्व' विशेषण लगानेसे ग्रन्थकारका अभिप्राय यह है कि जिन्होंने आज ही समस्त पापमयी प्रवृत्तियोंके त्यागरूप सामायिक संयमको धारण किया है, वे भी नमस्कार किये जानेके योग्य हैं। अथवा सर्व शब्द मध्यमें होनेके कारण पाँचोंके साथ लगाया जाता है। अर्थात् सब[1] तीर्थंकरोंको, सब सिद्धोंको, सब आचार्योंको, सब उपाध्यायोंको और सब साधुओंको नमस्कार करके इत्यादि।

इस प्रकार इष्ट देवताके उपदेशसे अरहन्त और सिद्धोंको तथा निकट उपकारी होनेके कारण आचार्य वगैरहको भी नमस्कार करके कारिकाके 'प्रशमरतिस्थैर्यार्थम्' इत्यादि उत्तरार्द्धसे ग्रन्थके नामकी सार्थकता तथा प्रयोजनको बतलाते हुए ग्रन्थकार ग्रन्थ बनानेकी प्रतिज्ञा करते हैं।

अरक्तद्विष्टता प्रशमो वैराग्यमिति। वक्ष्यति उपरि 'माध्यस्थ्यं वैराग्यम्' इत्यत्र। तत्र वैराग्यलक्षणे प्रशमे रतिः शक्तिः प्रीतिः तस्यां स्थैर्यं निश्चलता प्रशमरतिस्थैर्यम्। अर्थशब्दः प्रयोजनवचनः। 'प्रशमरतौ कथं नाम स्थिरो मुमुक्षुर्भव्यःस्यात्' इत्यतो वक्ष्ये प्रकरणम्। तच्च जिनशासनादेव वक्ष्यामि, अन्यत्र प्रशमाभावात्। यतः सर्वाश्रवनिरोधैकरसं हि जैनं शासनम्। न चान्यदेवंविधमस्ति। प्रशमकारि प्रवचनं शासनं द्वादशाङ्गमाचारादिदृष्टिवादपर्यन्तम्, तच्च रत्नाकरवदनेकाश्चर्यनिधानम्, तस्मात् किञ्चिद् मनाक् वक्ष्ये। समस्ताभिधाने यद्यपि शक्ति-र्नास्ति, तथापि ग्रहणधारणार्थावधारणपरिदुर्बलानां भव्यानां स्वल्पोऽपि प्रशमामृतविन्दुर्हृदयेषु पातितो महान्तमुपकारं प्रसूते उपकर्तुश्च भव्योपकारः स्वपरहितप्रतिविशिष्टफलदायी जायत इति तदाह–'वक्ष्ये जिनशासनात् किञ्चित्' ॥ २ ॥

राग और द्वेषके अभावको प्रशम कहते हैं। इसीका नाम वैराग्य है, जैसा कि ग्रन्थकार 'माध्यस्थ्यं वैराग्यम्' इत्यादि कारिकासे आगे बतलावेंगे। उस वैराग्य रूप प्रशममें जो रति अर्थात् प्रीति, उसमें जो निश्चलता अर्थात् वैराग्यमें प्रीतिका स्थिर रहना सो 'प्रशमरतिस्थैर्य' है। तथा 'अर्थ' से अभिप्राय प्रयोजनका है। जिससे ग्रन्थकारका अभिप्राय यह है कि 'प्रशमरति' में—वैराग्यके प्रेम में—मुमुक्षु भव्य जीव किस प्रकार स्थिर हों, इसी प्रयोजनसे मैं इस ग्रन्थको कहूँगा। तथा जो कुछ कहूँगा वह जिनशासनके आधारसे ही कहूँगा; क्योंकि अन्य धर्मोंमें प्रशमका अभाव है। जिनशासनका यदि कोई एक रस है तो वह सब प्रकारके आस्रवोंका रोकना ही है। किन्तु अन्य मतोंमें यह बात नहीं है।

आचाराङ्गसे लेकर दृष्टिवादपर्यन्त समस्त द्वादशाङ्गरूप प्रवचन प्रशम—वैराग्यको करने-वाला है तथा रत्नाकर–समुद्रकी तरह अनेक अचरजभरी बातोंका आकर–खानि है। उससे लेकर कुछ

---

१ सर्वनमस्कारेष्वत्रतनसर्वलोकशब्दावन्तदीपकत्वादध्याहर्तव्यौ सकलक्षेत्रगतत्रिकालगोचरार्हदादिदेवताप्रणमनार्थम्।" [पाँचों परमेष्ठियोंको नमस्कार करनेमें इस णमोकार मंत्रमें जो 'सव्व' और 'लोए' पद हैं, वे अन्तदीपक हैं। अतः सम्पूर्ण क्षेत्रमें रहनेवाले त्रिकालवर्ती अरिहन्त आदि देवताओंको नमस्कार करनेके लिए उन्हें प्रत्येक नमस्कारात्मक पदके साथ जोड़ लेना चाहिए।] धवला टीका, प्रथमखण्ड, पृ० सं० ५२

२ करणार्थार्थकरणा—प०।

कहूँगा। यद्यपि समस्त द्वादशाङ्गके कथन करनेकी शक्ति मुझमें नहीं है, तथापि ग्रहण, धारण और अर्थका निश्चय करनेमें भी जीव अत्यन्त दुर्बल हैं। अर्थात् जो समस्त अर्थको न तो ग्रहण कर सकते हैं, न अपनी स्मृतिमें रख सकते हैं, और न उनका अर्थ ही समझ सकते हैं, उन जीवोंके हृदयोंमें गिराई गई प्रशमरूपी अमृतकी दो-चार बूँदें भी महान् उपकार करती हैं और उपकार करनेवालेका यह उपकार अपने और दूसरोंके हितके लिए विशेष फलदायक होता है। अतः ग्रन्थकार कहते हैं कि जिनशासनसे लेकर कुछ कहूँगा।

'वक्ष्ये' इत्युक्तम्। अवहुश्रुतानां तु सकष्टस्तत्र प्रवेश इति आर्याद्वयेनाह—

अल्पज्ञानियोंका जिनशासनमें प्रवेश करना कठिन है, यह बात दो कारिकाओंसे कहते हैं:—

यद्यप्यनन्तगमपर्ययार्थहेतुनयशब्दरत्नाढ्यम्।
सर्वज्ञशासनपुरं प्रवेष्टुमबहुश्रुतैर्दुःखम् ॥२॥

टीका—समस्ताभिधानमशक्यं यद्यपि बहुश्रुतेनास्मद्विधेन सर्वज्ञशासनपुरप्रवेशाभावादेव। तद्धि परमदुर्गं दुरवगाहम् अनन्तगमपर्यायार्थत्वात्। तथा चोक्तम्—'अणंतगमपज्जवं सुत्तम्' इति। अर्थो हि अनन्तैर्गमैः पर्यायैश्च यस्य सर्वज्ञशासनपुरस्य तदनन्तगमपर्यायार्थम्। गमाः स्यादस्ति स्यान्नास्तीति सप्त विकल्पाः। पर्यायास्तु प्रकृतवस्त्वपेक्षाः सूत्रपदस्यैकस्यार्था बहवः। हेतुः कारणमात्रम्, अन्वयव्यतिरेकवान् वा। अनेकरूपज्ञेयालम्बना अध्यवसायविशेषा नैगमसंग्रहादयो नयाः हस्तिदर्शनेऽन्धानामध्यवसायवत् उत्तरोत्तरसूक्ष्मदर्शनात्। शब्दप्राभृताभिहितलक्षणाः साधुशब्दाः प्राकृताः संस्कृताश्च। शब्दप्राभृतं च पूर्वान्तःपाति, यत इदं प्राकृतव्याकरणं संस्कृतव्याकरणं चाकृष्टम्। अनन्तगमपर्यायार्थहेतुनय शब्दा एव रत्नानि व्याख्यातुर्गिरां मण्डनानि भूषणानि, एभिराढ्यं ऋद्धिमत्। आढ्यशब्दः प्रभूतवचनः। अनन्तशब्दो वा सर्वत्राभिसम्बध्यते—अर्थस्यानन्त्याद्धेतवो नयाः शब्दाश्चानन्ताः। तथा आढ्यशब्द आकुलवचनः, तेराढ्यम् 'आकुलं गहनम्' इति। तदेवंविधं सर्वज्ञशासनपुरं प्रवेष्टुम्-अन्तर्निपत्य ज्ञातुम्, अबहुश्रुतैः—अनधिगतसकलपूर्वार्थैः, दुःखम्—अशक्यमेव, 'वर्तते' इति शेषः, प्रवेष्टुमित्यर्थः ॥ २ ॥

अर्थ—यद्यपि अनन्त भङ्ग, पर्याय, अर्थ, हेतु, नय और शब्दरूपी रत्नोंसे भरपूर सर्वज्ञ-शासन रूप नगरमें अल्पज्ञानियोंका प्रवेश करना दुष्कर है।

भावार्थ—जिनशासन एक नगरके समान है। जैसे दुर्ग वगैरहके कारण नगरमें प्रवेश करना कठिन होता है, वैसे ही अनन्त भङ्ग, पर्याय वगैरहसे भरपूर होनेके कारण मेरे जैसे अल्प ज्ञानी उस जिनशासन नगरमें प्रवेश नहीं कर सकते। वस्तु कथञ्चित् है, कथञ्चित् नहीं है, इत्यादि सात भङ्गोंको गम कहते हैं। एक वस्तुमें क्रम-क्रमसे होनेवाली हालतोंको पर्याय कहते हैं। जैसे मिट्टीकी पर्याय घड़ा वगैरह। शब्दोंके

१ नास्ति [illegible] प० प्रतौ। २ [illegible] प०। ३ दुर्गं-दुर्ग—मु०। ४ पर्यायैश्च मु०। ५ पर्यायार्थ—मु०। ६ [illegible]

मात्रको अर्थ कहते हैं। कारणके अथवा साध्यके साथ जिसकी व्याप्ति हो उसे हेतु कहते हैं। जिस प्रकार अन्धे मनुष्योंको हाथीके एक एक अङ्गका ज्ञान होता है, उसी प्रकार अनेक धर्मात्मक वस्तुके एक एक धर्मको लेकर जो ज्ञानविशेष होते हैं, उन्हें नय कहते हैं। उनके भेद नैगम, संग्रह वगैरह हैं। इनका विषय उत्तरोत्तर सूक्ष्म होता है। चौदह पूर्वोंके अन्तर्गत शब्दप्राभृतमें जिनका लक्षण कहा गया है, उन संस्कृत और प्राकृतके शुद्ध शब्दोंको शब्द कहते हैं। शब्दप्राभृतके आधारपर ही संस्कृत और प्राकृतके व्याकरण बने हैं। अनन्त शब्द प्रत्येकके साथ लगाना चाहिए। इस तरह सर्वज्ञदेवका शासन अनन्त भङ्गोंसे, अनन्त पर्यायोंसे, अनन्त अर्थोंसे, अनन्त हेतुओंसे, अनन्त नयोंसे और अनन्त शब्दोंसे बड़ा गहन हो गया है। उसमें जो बहुश्रुत नहीं है, जिन्होंने अङ्ग-पूर्वरूप सकल शास्त्रोंका अध्ययन नहीं किया है, उनका प्रवेश पाना असाध्य ही है।

'यद्यपि' इति अपेक्षमाण इदमाह—

तथापि—

श्रुतबुद्धिविभवपरिहीणकस्तथाप्यहमशक्तिमविचिन्त्य ।
द्रमक इवावयवोञ्छकमन्वेष्टुं तत्प्रवेशेप्सुः ॥४॥

यद्यपि भगवत्प्रवेशं सर्वज्ञशासनपुरमस्मादृशेन तथापि श्रुतबुद्धिविभवपरिहीणोऽपि श्रुतविभवश्चतुर्दशपूर्वविभवस्तेन परिहीनः परित्यक्तः, तथा बुद्धिविभवपरिहीणकश्च— बुद्धिविभवः कोष्ठबुद्धित्वं बीजबुद्धित्वं पदानुसारित्वमित्यादि। 'अहम्' इति आत्मानं निर्दिशति प्रकरणकारः। अशक्तिमात्मगतामविचिन्त्य अनपेक्ष्य अनादृत्यात्मनोऽसामर्थ्यं सोऽहं समुद्यतः कर्तुं द्रमक इव। द्रमको निःस्वो रङ्कः। स हि देवताबलि-[illegible] सिक्थकणानि परिभ्रमन् करोति–लूनकेदारिक इव व्रीहिकणान् भुवि विकीर्णान् [illegible] विचिनोति। तेषां सिक्थकणानां संचयनमुञ्छमेव उञ्छकम्। एवमहमपि पूर्वसूरिभिर्महामतिभिरगृह्यमाणे प्रवचनार्थेऽनेकशो यदवयवजातमाकर्णितं शक्तिं विचिन्त्य तदन्वेष्टुं सर्वज्ञशासनपुरं प्रवेष्टुमिच्छामि। परिशाटितावयवोञ्छनमात्रकेण सर्वज्ञशासनपुरप्रवेशमिच्छामीत्यर्थः। आर्याद्वयस्य उपनयो यथा–यद्वत् रत्नाढ्यपुरमन्त-र्गन्तुमीहते द्रमकः तद्वत् सर्वज्ञशासनमवबोद्धुं प्रकरणकरणेन इत्यर्थः ॥४॥

अर्थ—शास्त्रज्ञान और बुद्धिकी सम्पदासे बिलकुल हीन होनेपर भी मैं अपनी असमर्थताको न गिनकर, जैसे कोई रंक मनुष्य धान्यके कणोंको बीननेके लिए नगरमें प्रवेश करना चाहता है, वैसे ही प्रवचनके कणोंको बीननेके लिए, मैं सर्वज्ञ शासनरूपी नगरमें प्रवेश करना चाहता हूँ।

भावार्थ—मैंने न तो समस्त शास्त्रोंका ही खूब खूब अभ्यास किया है, और न मेरी बुद्धि ही अतिशय है। अतः मेरे पास न तो शास्त्रकी सम्पदा है और न कोष्ठबुद्धि, बीजबुद्धि, पदानुसारी

१ [illegible] 'श्रुतबुद्धि' पर्यन्तः पाठो नास्ति मु० प्रतौ। २ श्रुतविभव—प०। ३—बुद्धि-प०। ४ प्रकरण—प०। ५—[illegible] प०। ६ 'आर्याद्वयस्य' इत्यारभ्य 'इत्यर्थः' पर्यन्तः पाठो नास्ति स० प्रतौ।

वगैरह बुद्धिकी ही सम्पदा है। फिर भी जिस प्रकार कोई दीन-हीन मनुष्य देवताको चढ़ाये गये प्रसादके इधर-उधर पड़े हुए कणोंको बीन-बीन कर अपना पेट भरता है, या खेतोंके काट लिए जानेपर जमीनमें गिरे हुए धान्यके कणों (सिला)से अपना निर्वाह करता है, उसी प्रकार मैं भी-पूर्वश्रेष्ठ पुरुषोंने अपनी बुद्धिसे अनेक बार प्रवचनके जिस अर्थका आलोडन किया है और ऐसा करते समय प्रवचनके अर्थके जो कुछ कण इधर-उधर छिटक गये हैं—उन्हें खोजनेके लिए सर्वज्ञ-शासनरूपी नगरमें प्रवेश करना चाहता हूँ। अर्थात् जिनशासनके अन्दर घुसकर उसके रहस्योंको निकालना मेरी शक्तिके बाहरकी बात है; किन्तु दूसरोंने उसमें घुसकर जो कुछ सोचा है, उनकी खोजके फलस्वरूप पड़े हुए कुछ ज्ञानके कण शायद मुझे भी मिल जावें, इसी लिए मैं जिनशासनमें प्रवेश करना चाहता हूँ। सारांश यह है कि जिनशासनको समझना बड़ा कठिन है।

तामेवोञ्छवृतितामात्मनो दर्शयति कारिकाद्वयेन—

दो कारिकाओंसे अपनी उसी पूर्व वृत्तिको दर्शाते हैं:—

बहुभिर्जिनवचनार्णवपारगतैः कविवृषैर्महामतिभिः ।
पूर्वमनेकाः प्रथिताः प्रशमजननशास्त्रपद्धतयः ॥ ५ ॥

टीका—'जिनवचनमर्णव इव, पारगमनाशक्यत्वान्मन्दमतिभिः। महामतिभिस्तु बुद्धिविभवप्राप्तेः सुगमपारः' इति दर्शयति। जिनवचनार्णवपारगतैर्बहुभिर्महामतिभिश्चतुर्दशपूर्वविद्भिः शास्त्रप्रतिबद्धकाव्यकरणनिपुणैः सत्कविभिः शब्दार्थदोषरहितकाव्यकारिभिः कविवृषैः कविप्रधानैः पूर्वं प्रथमतरमेव अनेकाः बहवः प्रशमजननशास्त्रपद्धतयः प्रथिताः प्रकाशिताः। प्रशमो वैराग्यम्, स जन्यते येन शास्त्रेण तत् प्रशमजननशास्त्रम्, तस्य पद्धतयो रचना 'वैराग्यवीथयः' इत्यर्थः। तैर्महामतिभिर्या विरचिताः शास्त्रपद्धतयः ॥ ५ ॥

अर्थ—जिन वचनरूप समुद्रके पारको प्राप्त हुए महामति कवियोंने पहले वैराग्यको उत्पन्न करनेवाले अनेक शास्त्र रचे हैं।

भावार्थ—जिनभगवान्के वचन समुद्रके समान हैं; क्योंकि मन्दबुद्धिवाले और उनका पार नहीं पा सकते। पर बुद्धिकी सम्पदासे युक्त महामति पुरुष उसे सुगमतासे पार कर सकते हैं। यही बात दर्शाते हुए शास्त्रकार कहते हैं कि मुझसे पहले चौदह पूर्वके जाननेवाले और शास्त्रके नियमको लेकर काव्य बनानेमें निपुण अनेक श्रेष्ठ कवियोंने वैराग्यको उत्पन्न करनेवाले शास्त्रोंकी रचना की है।

द्वितीयकारिकां वक्ति—दूसरी कारिकाको कहते हैं:—

ताभ्यो विसृताः श्रुतवाक्पुलाकिकाः प्रवचनाश्रिताः काश्चित् ।
पारम्पर्यादुत्सेपिकाः कृपणकेन संहृत्य ॥ ६ ॥

टीका—ताभ्यो विसृता विनिर्गता श्रुतग्रन्थानुसारिण्यो वाचः प्रधानार्थप्रतिबद्धाः या विप्लु(पु)ष इव पुलाकिकाः पुलओरूपा निस्सारा याः शटिताः प्रधानार्थाः। प्रवचनानुसारिण्यो द्वादशाङ्गार्थानुगताः। तत्रापि काश्चिदेव न सर्वाः संभाविताः। पारम्पर्यादुत्सेपिका इति गणधरशिष्यैश्चतुर्दशादिपूर्वधरैरेकादशाङ्गविद्भिश्च प्रवचनाभ्यवहारं[1] कुर्वद्भिरुत्सेपिकाः परिशाटीप्रायाः[2] कृताः, कृपणकेन रङ्केन इव[3] संहृत्य संपीड्य ॥ ६ ॥

अर्थ—उनसे निकले हुए श्रुतवचनरूप कुछ कण द्वादशाङ्गके अर्थके अनुसार हैं। परम्परासे वे बहुत थोड़े रह गये हैं; परन्तु मैंने उन्हें रङ्कके समान एकत्रित किया है।

भावार्थ—उन महामति आचार्योंने जो शास्त्र रचे हैं, उनमेंसे जो शास्त्र-वचनरूपी कण निकले हैं, उन कणोंमेंसे कुछ जिनशासनके अनुसार हैं; क्योंकि उन्हीं शास्त्रोंकी कुछ बातोंको लेकर मिथ्यादृष्टियोंने भी अपने आगम बना डाले हैं। अतः उनसे निकले हुए सभी वचन-कण जिनशासनके अनुसारी नहीं हैं। गणधरोंकी शिष्य-प्रशिष्य-परम्परासे उन वचन-कणोंको जब प्रवचनका रूप मिला तो वे और भी संक्षिप्त हो गये। गरीब रङ्कके समान उन्हीं कणोंको एकत्र करके मैंने यह शास्त्र रचा है।

'किं कृतम्' इत्याह—क्या किया? सो कहते हैं—

तद्भक्तिबलार्पितया मयाप्यविमलाल्पया स्वमतिशक्त्या।
प्रशमेष्टतयाऽनुसृता विरागमार्गैकपदिकेयम् ॥ ७ ॥

टीका—यस्मात् श्रुतवाक्पुलाकिका विसृता मुक्तास्तेषु भक्तिः प्रीतिसेवा[4] तासु, या श्रुतवाक्पुलाकिकासु भक्तिस्तावन्मात्रेणैव परितोषात्, तद्भक्तेर्बलं सामर्थ्यं तेन तद्भक्तिबलेन अर्पिता उपनीता स्वमतिशक्तिः विशेषात्तद्भक्तिरेव बलात्प्रोत्साहयति मे स्वमतिशक्तिं जनयति वा, तया तद्भक्तिबलार्पितया स्वमतिशक्तया, मयाऽपि तदुक्तयनुसारेण ग्रथिता। पुनः तस्या एव विशेषणम्, 'अविमलाल्पया' इति। ज्ञानावरणकर्मकलुषितत्वादविमला, अल्पा स्तोका। यतश्चतुर्दशपूर्वधरा अपि षट्स्थानपतिता भवन्ति किं पुनरस्मदादयः? कः पुनरयं नियोगोऽवश्यतया प्रकरणं कर्तव्यम्? इत्याह-प्रशमेष्टतया। इष्टस्य भाव इष्टता, प्रशमस्येष्टता प्रशमेष्टता प्रशमवल्लभता, तया हेतुभूतया, विरागमार्ग एव एकपदं यस्या विरागपथं स्थानम् आश्रयो यस्याः सेयं विरागमार्गैकपदिका कृतेति ॥ ७ ॥

अर्थ—श्रुतवचन रूप धान्यके कणोंमें मेरी जो भक्ति है, उस भक्तिके सामर्थ्यसे मुझे जो अविमल—मलसहित और थोड़ी बुद्धि प्राप्त हुई है, अपनी उसी बुद्धि-शक्तिके द्वारा वैराग्यके प्रेमवश मैंने वैराग्य-मार्गकी पगडंडीरूप यह रचना की है।

---

1 प्रवचनाभ्यवहारा—ब। 2 नास्ति पदमिदं प० प्रतौ। 3 इव च स—ब०। 4 प्रीतिः सेवा मु०। 5 नास्ति पदद्वयमिदं प० प्रतौ। विशेषाच- मु०। 6 एकं पदं मु०।

कोऽत्र निमित्तं वक्ष्यति निसर्गमतिसुनिपुणोऽपि वा ह्यन्यत् ।
दोषमलिनेऽपि सन्तो यद् गुणसारग्रहणदक्षाः ॥ ९ ॥

टीका—निसर्गः स्वभावः। स्वाभाविकी मतिः सहजा निःकृत्रिमा। सा किल अमोघा भवति। तया मत्या सुष्ठु निपुणोऽपि कुशलोऽपि कः खलु अत्र सतां सौजन्ये निमित्तं कारणमन्यद् वक्ष्यति स्वभावादृते ? न खलु मालतीपुष्पाणामामोदः सुरभिगन्धः केनापि ? स्वभावजन्यात्। हि शब्दो यस्मादर्थे। यस्मात् सुनिपुणोऽपि स्वभावमन्तरेण नान्यन्निमित्तं वर्णयितुं समर्थः, तस्मात् ' स्वभाव एवायं सतां परगुणोत्कीर्तनं दोषाभिधाने च मूकत्वम् ' इति पश्चार्द्धेन दर्शयति—दोषमलिनेऽपि दोषयुक्तेऽपि परकीयवचसि गुणान् सारभूतान् गृह्णन्ते सन्तः परगुणग्रहणनिपुणाः ॥ ९ ॥

अर्थ—स्वाभाविक बुद्धिसे कुशल मनुष्य भी इसमें दूसरा क्या कारण बतलावेगा कि सज्जन पुरुष दोषयुक्त वस्तुमेंसे भी सारभूत गुणोंको ही ग्रहण करनेमें निपुण होते हैं।

भावार्थ—स्वाभाविक बुद्धि अकृत्रिम होनेके कारण अव्यर्थ होती है। अर्थात् स्वाभाविक बुद्धिसे जो बात जानी जाती है वह बिल्कुल ठीक होती है। ऐसी बुद्धिवाला मनुष्य भी सज्जनोंकी सज्जनतामें स्वभावके सिवाय दूसरा क्या कारण बतला सकता है ? मालतीके फूलोंमें जो सुगन्ध होती है, उसका भी स्वभावके सिवाय दूसरा क्या कारण हो सकता है ? यतः बुद्धिमानसे बुद्धिमान् आदमी भी इसमें स्वभावके सिवाय दूसरा कारण नहीं बतला सकता, अतः दूसरोंके गुणोंको कहना और दोषोंको न कहना यह सज्जनोंका स्वभाव है। इसी बातको कारिकाके उत्तरार्द्धसे ग्रन्थकार कहते हैं, कि सज्जन पुरुष दूसरोंके गुण-ग्रहण करनेमें निपुण होते हैं, अतः वे दूसरोंके दोषयुक्त वचनमें भी सारभूत गुणोंको ही ग्रहण करते हैं।

जानाम्येवाहं पूर्वपुरुषोत्सेषिकाः पुलाकिकाः समुच्चित्य रचितेयं विरागमार्गपदिका, अतो न सम्मता विदुषाम्, तथापि—

मैं जानता हूँ कि पूर्वाचार्योंकी बची खुची बातोंको लेकर मैंने वैराग्य-मार्गकी यह पगडंडी तैयार की है, अतः यह विद्वानोंको सम्मत नहीं हो सकती। फिर भी—

सद्भिः सुपरिगृहीतं यत् किञ्चिदपि प्रकाशतां याति ।
मलिनोऽपि यथा हरिणः प्रकाशते पूर्णचन्द्रस्थः ॥१०॥

टीका—सन्तः सुजनास्तैः। सुपरिगृहीतम् आदरेण प्रतिपन्नम्। यत्किञ्चिदपि दोषवदपि निःसारमपि वा। प्रकाशतां याति, लोके प्रथते, 'विदुषां सुजनानां सम्मतमेतत्' इति परिगृहीतगुणेन प्रख्यातिमेति विद्वत्समाजेषु। तद्दर्शयति 'मलिनोऽपि' इत्यादिना। चन्द्रमण्डलमध्यवर्ती

१ गृह्णन्ति प०, गृह्णते मु०। २ नास्ति पदद्वयमिदं प० प्रतौ।

कुरङ्गः कृष्णिमानमपि बिभ्रन् प्रकाशते शोभते पूर्णचन्द्रस्थः। आश्रयगुणो हि अयं यन्मलिनोऽपि हरिणो भ्राजते। एवं यदेव सद्भिः परिगृह्यते निस्सारमपि तत्सदाश्रयादेव भ्राजत इति ॥१०॥

अर्थ—सज्जन जिस वस्तुको आदरके साथ ग्रहण कर लेते हैं, वह निःसार होनेपर भी प्रकाशमें आ जाती है। जिस प्रकार पूर्णमासीके चन्द्रमाके बिम्बके बीच रहनेवाला हिरन काला होनेपर भी प्रकाशमान होता है।

भावार्थ—यह आश्रयका ही गुण है कि चन्द्रमामें रहनेवाला काला हिरन भी सुन्दर मालूम देता है। इसी प्रकार सज्जन पुरुष जिस वस्तुको स्वीकार कर लेते हैं, वह निःसार होनेपर भी सज्जनोंका आश्रय पाकर सुन्दर लगने लगती है।

तथाऽन्यदपि अस्मिन्नेव सुजनव्यतिकरे प्रकरणकारः उदाहरति—

सज्जनोंके इसी व्यतिकरके सम्बन्धमें ग्रन्थकार दूसरा उदाहरण देते हैं:—

बालस्य यथा वचनं काहलमपि शोभते पितृसकाशे।
तद्वत्सज्जनमध्ये प्रलपितमपि सिद्धिमुपयाति ॥ ११ ॥

टीका—बालः शिशुः अनभिव्यक्तवर्णवचनः। तस्य वचनं काहलम्-ऋजु स्खलदक्षरगद्गदम्, पितुः समीपे विराजते परितोषजनकत्वात् कौतुकमावहते, पुनः पुनश्च तदेवानुबध्नाति पिता। 'तद्वत्' इति बालकाहलवचनवत् सज्जनानां मध्ये प्रलपितम्-असम्बद्धम् अपि प्रसिद्धिं प्रख्यातिमुपयातीति ॥ ११ ॥

अर्थ—जिस प्रकार बालककी अस्पष्ट बोली भी माता-पिताके पासमें प्यारी लगती है, उसी प्रकार सज्जनोंके बीचमें बकवाद भी प्रसिद्धि पा जाता है।

भावार्थ—जब बालक बोलना शुरू करता है, तो उसकी तुतलाती हुई सीधी गद्गद् वाणी माता-पिताको बड़ी मीठी और प्यारी लगती है। इसी प्रकार सज्जनोंके बीच जो कुछ कहा जावे वह असम्बद्ध और व्यर्थका ही प्रलाप क्यों न हो, गुण-सम्पन्न सज्जनोंको अच्छा ही मालूम होता है, और इससे उसे ख्याति ही मिलती है। सारांश यह है कि सज्जनोंका आश्रय पाकर मेरी असम्बद्ध रचना भी प्रसिद्ध हो जावेगी।

अत्राह परः—यदि पूर्वमनेकाः प्रथिताः प्रशमजननशास्त्रपद्धतयो महामतिभिः तत्कोऽयं प्रशमरतिप्रकरणकरणे पुनरादरः? ता एवाभ्यसनीयाः प्रशमकांक्षिणा। उच्यते—

कोई कहता है—जब महामति आचार्योंने वैराग्यको उत्पन्न करनेवाले अनेक शास्त्र रचे हैं, तो इस 'प्रशमरतिप्रकरण' को बनानेमें आपका इतना आदर क्यों है? वैराग्यके इच्छुक सज्जनोंको उन्हीं पूर्व शास्त्रोंका अभ्यास करना चाहिए। इसका समाधान कहते हैं:—

---

१ बिम्बं प्र—मु०। २ अस्मिन्नेव प०। ३ प्रकरणकारमुदा—मु०। ४ टद्वचनं का—मु०। ५ नास्ति वाक्यमिदं प० प्रतौ।

ये तीर्थकृत्प्रणीता भावास्तदनन्तरैश्च परिकथिताः।
तेषां बहुशोऽप्यनुकीर्तनं भवति पुष्टिकरमेव ॥ १२ ॥

टीका-प्रागर्थतस्तीर्थकरैः प्रणीताः। तदनन्तरा गणधराः साक्षाच्छिष्या भगवताम्, तैश्च सूत्रप्रतिबन्धेन परिकथिताः। भूयस्तदनन्तरैर्गणधरशिष्यैस्तच्छिष्यैश्च पारम्पर्येणाख्याताः। 'भावाः' इति जीवादयः पदार्था लक्षणविधानानुयोगद्वारप्रक्रमेण प्ररूपिताः। तेषां भावानाम्, बहुशः अनेकशः, पश्चात् कीर्तनम् अनुकीर्तनं मनोवाक्कायैर्बन्धमोक्षप्रक्रियानुग्रहणतया पुष्टिकरमेव भवति। पुष्टिरुपचयो ज्ञानदर्शनचारित्राणाम्। तदुपचयाच्च कर्मनिर्जरणम्, ततो मोक्ष इति नास्ति कश्चिद्दोषः ॥ १२ ॥

अर्थ—तीर्थकरोंने जिन पदार्थोंको बतलाया है और उनके पश्चात् गणधर वगैरहने जिनका विवेचन किया है, उनका बार बार कथन करना भी उनकी पुष्टि ही करता है।

भावार्थ—पहले तीर्थंकरोंने जीवादिक पदार्थोंका अर्थरूपसे कथन किया। उसके पश्चात् उनके साक्षात् शिष्य गणधरोंने उन्हें सूत्ररूपमें कहा। उसके पश्चात् गणधरोंके शिष्योंने तथा उनके शिष्योंके भी शिष्योंने परम्परासे लक्षण अनुयोगद्वार वगैरहके क्रमसे उनका कथन किया। उन पदार्थोंका मन, वचन और कायके द्वारा अनेक बार कथन करना, बन्ध और मोक्षकी प्रक्रियाका अनुग्राहक होनेसे पुष्टिका ही करनेवाला है। अर्थात् यदि उन पदार्थोंका मनमें चिन्तन किया जाय, वचनसे उनका कथन किया जावे, और कायसे उनका आचरण किया जावे तो सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्रकी वृद्धि ही होती है, और उनकी वृद्धि होनेसे कर्मोंकी निर्जरा होती है, और कर्मोंकी निर्जरा होनेसे मोक्ष होता है। अतः पूर्वाचार्योंके द्वारा वैराग्यके अनेक शास्त्रोंके रचे जानेपर भी इस 'प्रशमरति' को बनानेमें कोई दोष नहीं है।

'पुनरुक्तदोषोऽपि न ढौकते, प्रकारान्तरेण वैराग्यभ्यासादारोग्यार्थिनो भैषजोपयोगवत्' इत्याह—

तथा इसमें पुनरुक्त दोष भी नहीं है; क्योंकि आरोग्यके इच्छुक मनुष्यको औषधिके सेवनकी तरह इसमें प्रकारान्तरसे वैराग्यके अभ्यास करनेका ही कथन किया है। यही बात कहते हैं:—

यद्वदुपयुक्तपूर्वमपि भेषजं सेव्यतेऽर्तिनाशाय।
तद्वद् रागार्त्तिहरं बहुशोऽप्यनुयोज्यमर्थपदम् ॥ १३ ॥

टीका—लब्धप्रत्ययमुपयुक्तमौषधं प्रथमं पुनःपुनस्तदेवोपयुज्यते। तदुपयोगाच्च अभ्यसतः प्रतिदिनं व्याधेरुपशमप्रकर्षविशेषसमासादनं दृष्टम्। व्याधिकृतं दुःखम् अर्तिः-वेदना। 'उपयुक्तपूर्वमपि' इत्यनेन लब्धप्रत्ययत्वमाचष्टे। तद्वत् तथा। रागार्तिहरम्-रागग्रहणं द्वेषादीन्

१ नास्ति पदमिदं प० प्रतौ।

पिशुनयति। रागद्वेषोपात्तकर्मोदयप्रसूतायास्तीव्रादिवेदनार्तेरपहारकारि पुनः पुनरभ्यस्यमान-मप्यदुष्टमेव अर्थप्रधानं पदमदोषम्, अनुयोज्यम् अनुयोजनीयं वाक्प्रपञ्चेनानेकश इति ॥ १३ ॥

अर्थ—जिस प्रकार पहले सेवन की हुई भी औषधको पीड़ा दूर करनेके लिए फिरसे सेवन करते हैं, उसी प्रकार रागसे उत्पन्न हुई पीड़ाको दूर करनेवाले उपर्युक्त पदोंका भी अनेक बार प्रयोग करना चाहिए।

भावार्थ—जिस औषधपर विश्वास हो जाता है, दुबारा भी उसीका सेवन किया जाता है। उसका सेवन करनेसे प्रतिदिन रोगकी अधिक अधिक शान्ति देखी जाती है। उसी तरह राग-द्वेषसे बँधे हुए कर्मोंके उदयसे होनेवाली आन्तरिक पीड़ा जिन सारवान् वचनोंसे दूर होती है, उनका बार-बार भी दोहराना लाभदायक ही है।

तथा—

यद्वद्विषघातार्थं मन्त्रपदे न पुनरुक्तदोषोऽस्ति।
तद्वद् रागविषघ्नं पुनरुक्तमदुष्टमर्थपदम् ॥ १४ ॥

टीका—वृश्चिकादिदष्टानामपमार्जनं कुर्वन्तो मन्त्रवादिनः तद्विषजनितवेदनाविघातं विधित्सन्तः पुनः पुनस्तान्येव मन्त्रपदानि आवर्तयन्ति। दृष्टश्च प्रतिक्षणं विषविघातः। तद्वद् रागविषघ्नं वैराग्याग्निसन्धुक्षणप्रवणमनेकशोऽभ्यस्यमानं रागद्वेषविषविघातित्वात् न पुनरुक्तदोष-मासजतीति ॥ १४ ॥

अर्थ—जिस प्रकार विषको दूर करनेके लिए मन्त्रका बार-बार उच्चारण करनेमें पुनरुक्त दोष नहीं है, उसी प्रकार रागरूपी विषको घातनेवाले दोषरहित अर्थपदका बार-बार कथन करनेमें भी पुनरुक्त दोष नहीं है।

भावार्थ—जिन लोगोंको साँप बिच्छू आदि काट लेते हैं, उनका विष उतारनेके लिए मन्त्रवादी लोग बार बार मन्त्रके उन्हीं पदोंको दोहराते हैं, और जैसे-जैसे वे मन्त्रको दोहराते जाते हैं, विष उतरता जाता है, अतः दोहराना व्यर्थ नहीं है। इसी प्रकार रागरूपी विषको जलानेको वैराग्यरूपी अग्निको प्रज्व-लित करनेमें समर्थ वचनोंके बार-बार अभ्यास करनेमें भी पुनरुक्त दोष नहीं है। क्योंकि उनका निर-न्तर चिन्तन आदि करनेसे राग-द्वेषका घात होता है।

तथा परमप्युदाहरति अस्मिन्नेवार्थे—

इसी के समर्थनमें एक और भी उदाहरण देते हैं —

वृत्त्यर्थं कर्म यथा तदेव लोकः पुनः पुनः कुरुते।
एवं विरागवार्ताहेतुरपि पुनः पुनश्चिन्त्यः ॥ १५ ॥

१ नास्ति [illegible] प० [illegible] —प० । [illegible]—मु०।

टीका–वर्तनं वृत्तिः–आत्मनः कुटुम्बस्य वा पोषणम्। तदर्थं कृष्यादिकं कर्म करोति लोव समुचितधनधान्योऽपि प्रतिवर्षं महतीं सम्पदमिच्छन् प्रकर्षवतीम्। एवं विरागवार्ता—वृति रस्यां विद्यत इति वार्ता, वैराग्यवृत्तिः वैराग्ये वर्तनम्। तस्यां विरागवार्तायां यो हेतुः कार स पुनः पुनश्चिन्त्यः अभ्यसनीयः। स च हेतुः वैराग्यप्रख्यापकानि शास्त्राणि। यानि आलोच आलोच्य प्रतिक्षणं परित्यज्य रागादीन् वैराग्यमेवालम्बत इति ॥ १५ ॥

अर्थ—जिस प्रकार आजीविकाके लिए लोग बार-बार उसी धंधेको करते हैं, इसी प्रक वैराग्यके कारणका भी बार-बार चिन्तन करना चाहिए।

भावार्थ—धन धान्यसे भरपूर होनेपर भी लोग जिस प्रकार प्रतिवर्ष खूब धनी बननेव इच्छासे अपने अथवा अपने कुटुम्बके पोषणके लिए बार-बार खेती वगैरहका रोजगार करते हैं। इस प्रकार जिस कारणसे वैराग्यमें प्रवृत्ति हो, उसका बार-बार अभ्यास करना चाहिए। वह कारण वैराग्य कथन करनेवाले शास्त्र ही हैं, जिनकी आलोचना कर करके प्रतिसमय रागादिकको छोड़कर वैराग्य ही सहारा लिया जाता है।

'तच्च वैराग्यमविच्छेदेन यथा न त्रुट्यत्यन्तराल एव तथाऽनुष्ठेयम्' इत्याह—

वह वैराग्य बराबर बना रहे, बीचमें ही न छूट जावे, ऐसा प्रयत्न करना चाहिए। यही बा ग्रन्थकार बतलाते हैं:—

दृढतामुपैति वैराग्यभावना येन येन भावेन।
तस्मिंस्तस्मिन् कार्यः कायमनोवाग्भिरभ्यासः ॥ १६ ॥

टीका–वैराग्यवासना प्रतिदिनं येन येन भावेन जन्मजरामरणशरीराद्युत्तरकारण लोचनादिना न विच्छिद्यते, दृढतामेवोपैति, तत्र तत्र अभ्यासः कार्यः कायमनोवाग्भिः। अथव 'येन येन भावेन' इति मनःपरिणामेन अत्यर्थं [1]निर्वेदसंवेगरूपेण भाव्यमानेन दृढीभवि वैराग्यं तत्र विधेयोऽभ्यास इति ॥ १६ ॥

अर्थ—जिस जिस भावसे वैराग्यभावना दृढताको प्राप्त होती है, मन, वचन, और काय उस उसमें अभ्यास करना चाहिए।

भावार्थ—जन्म, बुढ़ापा, मरण और शरीर आदि उत्तर कारणोंकी आलोचना करना इत्या जिस जिस भावसे वैराग्यभावना प्रतिदिन मजबूत होती जाती है, मनसे, वचनसे, और कायसे उस उ भावका अभ्यास करना चाहिए। अथवा मनके जिस निर्वेद और संवेग परिणामकी भावना करने वैराग्य दृढ होता है, उसका अभ्यास करना चाहिए।

सुखावबोधग्रन्थरचनार्थं वैराग्यवाचिनः पर्यायशब्दानाचष्टे—

ग्रन्थकी रचना सुखपूर्वक समझमें आनेके लिए वैराग्यके अर्थवाची पर्याय शब्दोंको कहते हैं:—

१ निर्वेदरूपेण प०।

माध्यस्थ्यं वैराग्यं विरागता शान्तिरुपशमः प्रशमः ।
दोषक्षयः कषायविजयश्च वैराग्यपर्यायाः ॥ १७ ॥

टीका—अरागद्वेषप्रवृत्तिर्मध्यस्थः, तस्य भावः कर्म वा माध्यस्थ्यम् । विगतरागद्वेषत वैराग्यम् । विगतरागो विरागः, तद्भावो विरागता । शमः शान्तिः—तेषामेव रागादीनामनुद याद्यवस्था । वैराग्यस्य सामीप्येन शम उपशमः । प्रकृष्टः शमो रागादीनामेव प्रशमः दूषयन्तीति दोषाः अपूर्वकर्मोपादानेन जीवं कलुषयन्ति, त एव रागादयः, तेषां क्षयः— आत्यन्तिक उच्छेदः । कष्यन्तेऽस्मिन् जीवा इति कषः संसारः, तस्य, आया उपादानकारणा इति कषायाः, तेषां विजयः—अभिभवो निराकरणम् । एवमेते सर्व एव वैराग्यपर्याय कथिताः ॥ १७ ॥

अर्थ—माध्यस्थ्य, वैराग्य, विरागता, शान्ति, उपशम, प्रशम, दोष-क्षय और कषाय-विजय— सब वैराग्यके नामान्तर हैं ।

भावार्थ—जिसकी प्रवृत्ति राग और द्वेषसे रहित होती है, उसे मध्यस्थ कहते हैं और उस भाव अथवा कार्यको माध्यस्थ्य कहते हैं । राग और द्वेषके चले जानेको वैराग्य कहते हैं । रागरहित को विराग कहते हैं, और विरागके भावको विरागता कहते हैं । शम शान्तिको कहते हैं, अर्था उन्हीं रागादिकका उदय वगैरह न होना क्षय है । वैराग्यकी समीपतामें जो शान्ति होती है, उसे उपशम कहते हैं । रागादिकके ही उत्कृष्ट शमको उपशम कहते हैं नये नये कर्मोंको लाकर जो जीवको दूषित अर्थात् कलुषित करते हैं, उन्हें दोष कहते हैं वे दोष रागादिक ही हैं । उनका बिल्कुल नष्ट हो जाना, दोष-क्षय है । जिसमें जीव कं उसे 'कष्' अर्थात् संसार कहते हैं, और संसारके उपादानकारणोंको कषाय कहते हैं । उनक जीतना कषाय-विजय है । ये सभी वैराग्यके नामान्तर हैं ।

विगतो रागश्च विरागः । कः पुनरयं रागो नाम ? तमपि पर्यायद्वारेणाचष्टे—

रागरहितको विराग कहते हैं । अतः रागको समझानेके लिए ग्रन्थकार उसके भी नामान्त कहते हैं:—

इच्छा मूर्च्छा कामः स्नेहो गार्ध्यं ममत्वमभिनन्दः ।
अभिलाष इत्यनेकानि रागपर्यायवचनानि ॥ १८ ॥

टीका—इच्छा-प्रीतिः रमणीयेषु योषिदादिषु आत्मपरिणामः । मूर्च्छा बाह्यवस्तुभिः स एकीभवनाध्यवसायलक्षणः परिणामः । कामः प्रार्थनाविशेष इष्टस्य वस्तुनः । स्नेहः प्रति विशिष्टप्रेमादिलक्षणः । गृद्धता गार्ध्यम्-अभिकांक्षाऽप्राप्तवस्तुविषया । ममेदंवस्तु

१ तस्याः उपा— ब०, आया—नि इति प० । २ लक्षणपरिणाम मु० ।

अहमस्य स्वामी' इति चित्तपरिणामो ममत्वम्। इष्टवस्तुप्राप्तौ परितोषोऽभिनन्दः। अभिलषणमभिलाषः-इष्टप्राप्त्यर्थं मनोरथः। एवमेभिः पर्यायशब्दैर्योऽर्थोऽभिधीयते स रागः॥१८॥

अर्थ—इच्छा, मूर्च्छा, काम, स्नेह, गार्ध्य, ममत्व, अभिनन्द, अभिलाष इत्यादि अनेक रागके पर्यायवाची नाम हैं।

भावार्थ—सुन्दर स्त्री आदिमें जो प्रीति होती है, उसे इच्छा कहते हैं। बाह्य वस्तुओंके साथ एकमेक होने रूप जो परिणाम होता है, उसे मूर्च्छा कहते हैं। इष्ट वस्तुकी अभिलाषाको काम कहते हैं। विशिष्ट प्रेम वगैरहको स्नेह कहते हैं। अप्राप्त वस्तुकी इच्छा करनेको गार्ध्य कहते हैं। यह वस्तु मेरी है, इसका मैं स्वामी हूँ, ऐसे मनके भावको ममत्व कहते हैं। इष्ट वस्तुके मिलनेपर जो सन्तोष होता है, उसे अभिनन्द कहते हैं। इष्ट वस्तुकी प्राप्तिके लिए जो मनोरथ है, उसे अभिलाषा कहते हैं। ये सब शब्द रागके ही पर्यायान्तर हैं।

'दोषक्षयो वैराग्यम्' इत्युक्तम्। तत्र पर्यायकथनेन दोषं निरूपयति—

दोष-क्षयको वैराग्य कहा है। अतः दोषके पर्याय नाम कहते हैं :—

ईर्ष्या रोषो दोषो द्वेषः परिवादमत्सरासूयाः।
वैरप्रचण्डनाद्या नैके द्वेषस्य पर्यायाः॥ १९॥

टीका-'परविभवादिदर्शनाच्चित्तपरिणामो जायते वियुज्यतामेष एतेन विभवेन, ममैवास्तु विभवोऽन्यस्य मा भूत्' इति ईर्ष्या। तथा सौभाग्यरूप-लोकप्रियत्वादिविषयरोषः क्रोधः। दूषयतीति दोषः। अप्रीतिलक्षणो द्वेषः। परदोषोत्कीर्तनं परिवादः। मां छादयति छद्मयति सद्वेमान् इति मत्सरः। असूया तु अक्षमा। परस्परवधादिजनितकोपसमुत्थं वैरम्। प्रकृष्टं चण्डनं प्रचण्डनं प्रकोपः शान्तस्यापि कोपाग्नेः संधुक्षणम्। एवमाद्या बहवोऽन्येऽपि द्वेषपर्यायाः॥ १९॥

अर्थ—ईर्ष्या, रोष, दोष, द्वेष, परिवाद, मत्सर, असूया, वैर और प्रचण्डन इत्यादि अनेक द्वेषके पर्याय नाम हैं।

भावार्थ—दूसरेकी सम्पत्ति वगैरहको देखकर मनमें ऐसा भाव होना है कि इसकी यह सम्पत्ति नष्ट हो जावे, मेरे पास ही सम्पत्ति रहे, अन्य किसीके भी पास सम्पत्ति न रहे, इस भावको ईर्ष्या कहते हैं। दूसरेका सौभाग्य, रूप, और लोकप्रियता आदिको देखकर जो क्रोध उत्पन्न होता है, उसे रोष कहते हैं। जो दूषित करे वह दोष है। प्रीतिके न होनेको द्वेष कहते हैं। दूसरेके दोषोंको कहना परिवाद है। जो अपनेको अपने भ्रमसे अलग करे, वह मत्सर है। दूसरोंके गुणोंको न सह सकना असूया है। आपसमें मारपीट होनेसे उत्पन्न हुए कोपसे जो भाव पैदा होता है, वह वैर है। अत्यन्त तीव्र गुस्सेको अर्थात् शान्त हुई कोपाग्निको भी भड़काना प्रचण्डन है। इत्यादि अन्य भी अनेक द्वेषके नामान्तर हैं।

---

१ विभवस्य दर्श मु०। २ मत्सरं प०। ३ वधर्नोद् प०।

'काः पुनः क्रियाः कुर्वन्नयमात्मा रागद्वेषवशगो भवति?' इति कारिकात्रयेण कुलकमाह—

किन किन कार्मोके करनेसे यह आत्मा राग और द्वेषके अधीन हो जाता है, तीन कारिकाओंसे यह बतलाते हैं:—

रागद्वेषपरिगतो मिथ्यात्वोपहतकलुषया दृष्ट्या ।
पञ्चाश्रवमलबहुलार्तरौद्रतीव्राभिसन्धानः ॥ २० ॥
कार्याकार्यविनिश्चयसंक्लेशविशुद्धिलक्षणैर्मूढः ।
आहारभयपरिग्रहमैथुनसंज्ञाकलिग्रस्तः ॥ २१ ॥
क्लिष्टाष्टकर्मबन्धनबद्धनिकाचितगुरुर्गतिशतेषु ।
जन्ममरणैरजस्रं बहुविधपरिवर्तनाभ्रान्तः ॥ २२ ॥
दुःखसहस्रनिरन्तरगुरुभाराक्रान्तकर्षितः करुणः ।
विषयसुखानुगततृषः कषायवक्तव्यतामेति ॥ २३ ॥

टीका—पर्यायद्वारेणोक्तौ रागद्वेषौ, ताभ्यां परिगतः—तादृशपरिणामयुक्तः । मिथ्यात्वं तत्त्वार्थाश्रद्धानम्, अभिगृहीताअनभिगृहीत–सन्देहभेदात् त्रिविधम् । अभिगृहीतं त्रयाणां त्रिषष्ट्यधिकानां पाखण्डिशतानाम् । अनभिगृहीतम् अप्रतिपन्नदेवतापाखण्डरूपम् । सन्दिग्धम् एकस्याप्यक्षरस्य पदस्य वाऽप्यरोचनान्मिथ्यादर्शनम् । तेनोपहतत्वात् कलुषा दृष्टिः बुद्धिः 'मलिना' इत्यर्थः । तया इत्थंभूतया दृशा बुद्ध्या कारणभूतया । पञ्चाश्रवाः पञ्चेन्द्रियाणि प्राणातिपातादीनि वा । आश्रवन्ति–आददते कर्म इति आश्रवाः । पञ्चाश्रवोपात्तकर्मणैव मल-बहुल उपचितकर्मराशिः । आर्तं चतुर्धा । अमनोज्ञविषयसंम्प्रयोगे सति तद्वियोगैकतानो मनो-निरोधो ध्यानम् । तथाऽसद्वेदनायाः । तथा मनोज्ञविषयसंम्प्रयोगे तदविप्रयोगैकतानश्चित्त-निरोधः तृतीयमार्तम् । चक्रवर्त्यादीनामृद्धिदर्शनात् 'ममाप्यमुष्य तपसः फलमेवंविधमेव स्यादन्यजन्मनि' इति चित्तनिरोधश्चतुर्थमार्तं निदानकरणमात्रमिति । ऋतमिति दुःखं संक्लेशः, तत्र भवमार्तमिति । रुद्रः क्रूरो नृशंसः, तस्येदं रौद्रम् । तदपि चतुर्धा । तत्र प्रथमं हिंसानुबन्धि : अनेनानेन च उपायेन गलकूटपाशयन्त्रादिना प्राणिनो व्यापाद्या इति । तत्रैकतानो मनो-निरोधो रौद्रं ध्यानम् । द्वितीयमनृतानुबन्धि–येन येन उपायेन परो वञ्च्यते कूटसाक्षिदाना-दिना तत्रैकतानं मनो रौद्रम् । तृतीयं स्तेयानुबन्धि—येन येन प्रकारेण परस्वमादीयते घुघुरुक-कर्तरिकाछेदकखात्रखननादिना तत्रैकतानं मनो रौद्रम् । धनधान्यादिविषयसंरक्षणैकतानं मनो दिवानिशि तुरीयं रौद्रम् । अभिसन्धानमभिसन्धिः अभिप्रायः । स च आर्तरौद्रध्यान-योस्तीव्रः प्रकृष्टोऽभिसन्धिः । पञ्चाश्रवमलबहुलश्चासौ आर्तरौद्रतीव्राभिसन्धानश्चेति ॥ २० ॥

१ [illegible] मु० । २ [illegible] मु०

कार्यं जीवरक्षादिकम्। अकार्यं जीववधादिकम्। तयोर्विनिश्चयो निर्णयः स तथा। संक्लेशः कालुष्यम्। विशुद्धिः नैर्मल्यम्। तयोः क्लिष्टचित्ततानिर्मलचित्ततारूपयोर्लक्षणानि परिज्ञानानि। तथा तानि चेति समासः। तैः करणभूतैर्मूढः—मुग्धः। तथा आहारभयपरिग्रहमैथुनसंज्ञाः प्रसिद्धरूपाः। ता एव कलयः कलहाः कलिहेतुत्वात्। तैर्ग्रस्तः—आघ्रात इति ॥२१॥

गतिशतेषु बह्वीषु गतिषु पुनः पुनरावृत्त्या भ्रमणात्, क्लिष्टमष्टाभिः कर्मभिर्बन्धनं तेन बद्धः, बद्धनिकाचितत्वात् गुरुः, जन्मजरामरणानि तैरजस्रं पुनः पुनः, बहुविधपरिवर्तनमनेकाकारम्, अतो भ्रान्तः परिवर्तनेन ॥ २२ ॥

दुःखसहस्राणीति। बाहुल्यप्रतिपादनार्थं सहस्रग्रहणम्। दुःखसहस्राण्येव निरन्तराणि अव्यवच्छिन्नानि। नारकतिर्यङ्मनुष्यामरभवेषु गुरुभारः, तेनाक्रान्तत्वात्—अवष्टब्धत्वात्, कार्पितः कृशतां नीतो 'दुर्बलतां गतः' इति यावत्। करुणास्पदत्वात् करुणः। तृष्यतीति तृषः पिपासितः। विषयाः शब्दादयः, तज्जनितं सुखं विषयसुखमातद्नुगतः तत्रासक्तः। विषयसुखानुगतश्चासौ तृषश्चेति विषयसुखानुगततृषः। उपजातविषयसुखोऽपि पुनस्तृष्यति 'विशिष्टतरमभिलषति' इत्यर्थः। एवंविधो जीवः कषायाणां क्रोधादीनां वक्तव्यतामेति—क्रोधी, मानी, मायावी, लोभी चेति। उत्लक्षणः कषायशब्दः। कषायवक्तव्यः क्रोधादिभिरित्यर्थः॥ २३ ॥

अर्थ—जो राग और द्वेषसे युक्त है, जिसकी बुद्धि मिथ्यात्वसे ग्रस्त होनेके कारण मलिन है और मलिन बुद्धिके कारण पाँच इन्द्रियों अथवा हिंसादि पाँच पापोंके द्वारा होनेवाले कर्मोंके आगमनसे जिसकी आत्मामें खूब कर्ममल इकट्ठा होगया है, जिसके आर्तध्यान और रौद्रध्यान रूप तीव्र परिणाम होते हैं।

भावार्थ—राग और द्वेषके नामान्तर पहले बतला आये हैं। जो उनसे युक्त है, वही राग और द्वेषके अधीन होता है। तत्त्वार्थके श्रद्धान न करनेको मिथ्यात्व कहते हैं। वह तीन प्रकारका है—गृहीत, अगृहीत और सन्देह। तीनसौ त्रेसठ पाखण्डिमत गृहीत मिथ्यात्व हैं; क्योंकि दूसरोंके उपदेश आदिसे लोग उन्हें ग्रहण करते हैं। किसी पाखण्डी देवताको उपदेशपूर्वक ग्रहण न करना, अर्थात् जन्मसे ही उसमें अभिरुचि होना अगृहीत मिथ्यात्व है। श्रुतज्ञानके एक भी अक्षर अथवा पदमें रुचि न होनेसे सन्दिग्ध मिथ्यात्व होता है। जिसके मिथ्यात्व होता है, उसकी बुद्धि मलिन हो जाती है, और बुद्धिके मलिन हो जानेसे वह पाँचों इन्द्रियोंके विषयोंमें आसक्त हो जाता है। अथवा हिंसा, झूठ, चोरी, कुशील, और परिग्रह इन पाँचों पापोंको करता है। इससे उसके कर्मोंका आस्रव होता है, और कर्मोंके आस्रव होनेसे उसकी आत्मामें कर्ममलकी राशि इकट्ठी हो जाती है। ऐसा जीव भी राग और द्वेषके अधीन होता है।

आर्तध्यान चार प्रकारका है—अप्रिय वस्तुके सम्बन्ध हो जानेपर उसके दूर करनेके लिए जो रातदिन चिन्ताका करना है, वह पहला आर्तध्यान है। कोई रोग हो जानेपर उसके दूर करनेके लिए

---

१ ब दर ब—प०, ब दर ब ब—ब०। २ चरमिदं पु० प्रतौ नास्ति।

रात-दिन चिन्ता करते रहना, दूसरा आर्त्तध्यान है। इष्ट वस्तुके विछोह हो जानेपर उसकी पुनः प्राप्ति के लिए चिन्ता करना तीसरा आर्त्तध्यान है। चक्रवर्त्ती आदिकी सम्पत्तिको देखकर मुझे भी इस तपका फल परलोकमें इसी रूपमें मिले, ऐसा सोचते रहना निदान नामका चौथा आर्त्तध्यान है। ऋत दुःख अथवा संक्लेशको कहते हैं, उससे जो ध्यान होता है, वह आर्त्तध्यान है। क्रूर अथवा निर्दयको रुद्र कहते हैं, उसका जो ध्यान होता है, वह रौद्रध्यान है। वह भी चार प्रकारका है:—पहला हिंसानुबन्धि है, अर्थात् हिंसामें आनन्द मानना। झूठी गवाही देना वगैरह अमुक अमुक उपायसे दूसरे ठगे जाते हैं, इत्यादि उपाय सोचनेमें मनका तन्मय होना दूसरा असत्यानन्द रौद्रध्यान है। कैंची, फावड़ा, वगैरह जिन जिन उपायोंसे दूसरों का धन हरा जा सकता है. उन उपायोंके चिन्तनमें मनका एकाग्र होना स्तेयानुबंधि नामका तीसरा आर्त-ध्यान है। धन-धान्य आदि परिग्रहके संरक्षणमें रात-दिन मनका लगा रहना विषयानन्दि नामका चौथा रौद्रध्यान है। इन दोनों दुर्ध्यानोंमें आत्माके भाव बड़े तीव्र होते हैं, और जिनके वैसे भाव होते हैं, वह राग और द्वेषके अधीन होता है॥ २०॥

अर्थ—जो कार्य और अकार्यका निश्चय करनेमें मूढ़ है, संक्लेश और विशुद्धिके स्वरूपको नहीं समझता, आहार-भय-परिग्रह और मैथुन संज्ञारूपी कलहमें जो फँसा हुआ है।

भावार्थ—जीवकी रक्षा आदि कार्य हैं और जीवकी हिंसा वगैरह अकार्य हैं। कलुषित परिणामोंके होनेको कालुष्य कहते हैं, और निर्मल भावोंके होनेको विशुद्धि कहते हैं। इनको जो नहीं समझता तथा आहार वगैरहकी चाहमें फँसा हुआ है, वह रागादिकके आधीन है॥ २१॥

अर्थ—जो आठ प्रकारके क्लिष्ट कर्मोंके निकाचितबन्धसे भारी हो रहा है, तथा सैकड़ों गतियोंमें बार-बार जन्म लेने और मरनेके कारण अनेक प्रकारके परिभ्रमणके चक्रमें पड़ा हुआ है॥ २२॥

अर्थ—सर्वदा हजारों दुःखोंके गुरु भारसे आक्रान्त होनेके कारण जो दुर्बल हो रहा है, दयाका पात्र है, विषय-सुखमें आसक्त होकर उनकी और चाहना करता है, वह जीव कषायवाला कहा जाता है।

भावार्थ—दुःखकी अधिकता बतलानेके लिए 'हजारों दुःख' कह दिया है। अर्थात् नरकादिक गतियोंमें बराबर दुःख सहते-सहते जिसकी आत्मा दुःखोंके भारसे दब गई है, इसी लिए जो दया करनेके योग्य है, तथा जो विषय-सुखमें इतना आसक्त है कि विषय-सुखके मिलनेपर भी उसकी इच्छा शान्त होनेके बजाय और बढ़ती है। जो जीव इस प्रकारके होते हैं, वे राग और द्वेषके अधीन होते हैं। राग और द्वेषका ही नाम कषाय है। अतः वे कषायवाले अर्थात् क्रोधी, मानी, मायावी और लोभी कहे जाते हैं॥ २३॥

'स पुनः कषायवक्तव्यतां गत्वा किमवाप्नोति?' इत्याह—

अब कषायवान् आत्माकी क्या दशा होती है, यह बतलाते हैं:—

स क्रोधमानमायालोभैरतिदुर्जयैः परामृष्टः।
प्राप्नोति यानमर्थान् कस्तानुद्देष्टुमपि शक्तः॥ २४॥

टीका—स खलु एवंविधः समुपजातकषायपरिणामः क्रोधादिभिः परामृष्टः। अतीव दुर्जयै रिति। नाल्पसत्त्वैर्जेतुं शक्याः कषाया इति दुर्जयाः, तैः परामृष्टः परिभूतः 'कषायवशंगतः' इत्यर्थः। प्राप्नोति याननर्थान्–आपद्विशेषान् वधबन्धादीन्। कस्ताननर्थान् वचनमात्रेणापि व्याख्यातुं समर्थः? अनर्थभूयसि संसारे कियतोऽनर्थान् तान् नामग्राहं प्रतिपादयितुं शक्नुयात् इति।

अर्थ—अत्यन्त दुर्जय क्रोध, मान, माया और लोभ कषायोंके आधीन हुआ जीव जिन जिन कष्टोंको उठाता है, उन्हें कहनेके लिए भी कौन समर्थ है?

भावार्थ—कमजोर प्राणी कषायोंको नहीं जीत सकते, अतः उन्हें दुर्जय कहा है। जो इन दुर्जय कषायोंके चंगुलमें फँस जाता है, उसकी कुशल नहीं है। वह जिन जिन कष्टोंको भोगता है, उन्हें कोई कह भी नहीं सकता। ठीक भी है, जब संसार अनर्थोंका घर है, तो उनमेंसे कितने अनर्थोंके नाम लेकर गिनाया जा सकता है!

'यद्यपि सकलानर्थानाख्यातुमशक्यं तथापि स्थूलतरकतिपयानर्थानाख्यानमपायेभ्यो भव्यानामुपकाराय' इत्याह—

यद्यपि सब अनर्थोंको कहना शक्य नहीं है, तथापि कुछ मोटे-मोटे अनर्थोंको बतला देनेसे भव्य जीवोंकी उनसे रक्षा हो सकेगी, अतः उन्हें कहते हैं:—

क्रोधात् प्रीतिविनाशं मानाद् विनयोपघातमाप्नोति।
शाठ्यात्प्रत्ययहानिः सर्वगुणविनाशनं लोभात् ॥२५॥

टीका—क्रोधनं क्रोधः—आत्मनः परिणामो मोहकर्मोदयजनितः। तस्मादेवंविधात् परिणामा- दिष्टेष्वेव प्रीतिव्यवच्छेदो भवतीति विपर्ययमपि साक्षम्, व्यवच्छिन्नायाश्च प्रीतावनिर्वृति- रात्मनः। मानो गर्वस्तम्भः 'अहमेव ज्ञानी दाता शूरः' इत्यादिक आत्मपरिणामः। तस्माद् विनयोपघातमाप्नोति। विनयमूलश्च धर्मः।

देवगुरुमातृवृद्धेषु यथायोग्यं विनयः कार्यः। स च उपजातगर्वपरिणामस्य विहन्यते विच्छिद्यते इति यावत्। शाठ्यपरिणामो माया। तस्मात् प्रत्ययहानिः प्रत्ययो लोकव्यवहारप्रसिद्धया क्वचित् पुरुषे सत्यवादित्वं व्यापककल्याणपरत्वं इत्यादि। तद्धानिः—असत्यभाषणे शाठ्य- परिणामात् प्रत्ययहानिर्भवतीति। तृष्णा लोभपरिणाम आत्मनः। तस्माच्च सर्वगुणविनाशमाप्- नोति। सर्वे च ते गुणाश्च क्षमामार्दवादयः, तान् लोभाभिभूतः समूलकाषं कषति। 'आप्नोति' इति प्रत्यवर्तिना क्रियापदेन सर्वत्राभिसम्बन्धः ॥ २५ ॥

अर्थ—क्रोधसे प्रीतिका नाश होता है, मानसे विनयका घात होता है, मायाचारसे विश्वास उठ जाता है, और लोभसे सभी गुण नष्ट हो जाते हैं।

---

१ इत्थत मु०। २–वर्तिना मु०।

भावार्थ—मोहकर्मके उदयसे उत्पन्न हुए आत्माके क्रोध करनेरूप परिणामको क्रोध कहते हैं। क्रोध करनेसे इसी लोकमें अपने अत्यन्त प्रिय जनोंके साथ भी प्रेमका नाता टूट जानेसे आत्माको बहुत दुःख होता है। मैं ही ज्ञानी हूं, मैं ही दानी हूं. मैं ही शूरवीर हूँ, इत्यादि रूप आत्म-परिणामको घमंड या मान कहते हैं। मान करनेसे विनय नहीं रहती, और धर्मका मूल विनय ही है। देव, गुरु, साधु, और वृद्ध जनोंकी यथायोग्य विनय करनी चाहिए। किन्तु जब मानका उदय होता है, तो वह विनय नष्ट हो जाती है। अमुक मनुष्य सच बोलता है, और उसके पास जो कुछ धरोहर रक्खो उसे वह लौटा देता है, लोकव्यवहारके अनुसार इस तरहकी बातोंको प्रत्यय अर्थात् विश्वास कहते हैं। झूठ बोलनेसे और धरोहरको हड़प जानेसे वह विश्वास उठ जाता है। तथा तृष्णाको लोभ कहते हैं। लोभ करनेसे क्षमा मार्दव आदि सभी गुण नष्ट हो जाते हैं।

सम्प्रति एकैकस्य क्रोधादेः व्यसनोपायं दर्शयन्नाह—

अब क्रोधादिक प्रत्येक कषायको दुःख देनेवाली बतलाते हैं :—

क्रोधः परितापकरः सर्वस्योद्वेगकारकः क्रोधः।
वैरानुषङ्गजनकः क्रोधः क्रोधः सुगतिहन्ता ॥ २६ ॥

टीका—परितापो हि दाहज्वराभिभूतस्यैव क्रोधिनः परिदहनम्-अस्वस्थता। उद्वेगो भयम्। सर्वस्येति नारकतिर्यङ्मनुष्यदेवाख्यस्यात्मनो भयमुत्पादयति। कुतश्चिन्निमित्तादुत्पन्नो वधबन्धनाभिघातादिसन्तानो वैरम्। तस्य अनुषङ्गः-अनुबन्धः अन्वयः, तं जनयति-उत्पादयति। क्रोधः सुगतिः-मोक्षः, तां हन्ति। मुक्त्यप्रापणसामर्थ्याद् 'हन्ति' इत्युच्यते। क्रोधाविष्टाश्च सुभूमपरशुरामादयः श्रूयन्ते दुर्गतिगामिनः पारमर्षे प्रवचने। तस्मादिहपरलोकयोरपायकारी क्रोध इति युक्तः परिहर्तुम् ॥ २६ ॥

अर्थ—क्रोध परितापको करता है। क्रोधसे सभीको डर लगता है। क्रोध वैरको पैदा करता है और क्रोध सुगतिका घातक है।

भावार्थ—दाहज्वरसे पीड़ित मनुष्यके समान क्रोधीकी अन्तरात्मा क्रोधसे सर्वदा जला करती है। क्रोधीसे सभी गतियोंके जीव भय खाते हैं। क्रोधमें आकर किसीने किसीका वध कर दिया, या उसे जेलखानेमें भिजवा दिया तो उस वैरकी परम्परा पीढ़ी दरपीढ़ी तक चलती रहती है। क्रोध सुगति अर्थात् मोक्षका भी घातक है; क्योंकि क्रोधी मनुष्यकी मुक्ति नहीं होती। शास्त्रोंमें सुना जाता है कि सुभूम और परशुराम वगैरहको क्रोधके कारण दुर्गतिमें जाना पड़ा है। क्रोध इस लोक और परलोक दोनोंमें हानिकारक है। अत उसे छोड़ना ही योग्य है।

श्रुतशीलविनयसंदूषणस्य धर्मार्थकामविघ्नस्य।
मानस्य कोऽवकाशं मुहूर्तमपि पण्डितो दद्यात् ॥ २७ ॥

१ व्यसनोपायान् प०।

सम्प्रति बहुदोषकषायार्थमुपसंहरन्नाह—

अब बहुत दोषोंसे युक्त कषायके वर्णनका उपसंहार करते हैं:—

एवं क्रोधो मानो माया लोभश्च दुःखहेतुत्वात् ।
सत्त्वानां भवसंसारदुर्गमार्गप्रणेतारः ॥ ३० ॥

टीका—सर्व एवैते कषायाः तीव्रस्य प्रकर्षप्राप्तस्य नरकगत्यादिषु दुःखस्य हेतवः जनकाः कारणभूता इति। केषां दुःखहेतवः ? सत्त्वानां प्राणिनाम्। दुःखहेतुत्वाच्च भवसंसारदुर्गमार्गप्रणेतारो भवन्ति। भवो नरकादिजन्म, तदेव संसारः पुनः पुनर्गमनागमनाद् दुर्गः—विषमो भयानकः, तस्य यो मार्गः पन्थाः, तस्य प्रणेतारः प्रवर्तका नायका देशकाः। कः पुनरसौ मार्गः ? हिंसानृताद्याचरणलक्षणः ॥ ३० ॥

अर्थ—इस प्रकार दुःखोंके कारण होनेसे क्रोध, मान, माया, और लोभ प्राणियोंके चारगतिरूपी भयानक संसारके मार्गके प्रवर्तक हैं।

भावार्थ—ये सभी कषायें नरकादिक गतियोंमें प्राणियोंको तीव्र दुःखके देनेवाली होनेके कारण भयानक संसारके मार्गको दिखलानेवाली हैं। आशय यह है कि हिंसा, झूठ वगैरह पापोंका करना संसारका मार्ग है, और कषायके वशीभूत प्राणी इन पापोंको करता है। अतः कषाय संसारको बढ़ानेवाली है।

एतामेव कषायाणामाद्यविकल्पद्वयप्रदर्शनार्थमाह—

इन्हीं कषायोंके दो भेद बतलाते हैं:—

ममकाराहङ्कारावेषां मूलं पदद्वयं भवति ।
रागद्वेषावित्यपि तस्यैवान्यस्तु पर्यायः ॥ ३१ ॥

टीका—ममकारो ममत्वम् 'ममेदं ममेदम्' इति, मायालोभकषाययोर्ग्रहणम्। अहङ्कारो गर्वः, स च अभिमानक्रोधलक्षणः। मायामपि द्रव्योपादानाय वणिजः कुर्वन्ति क्रयविक्रयादिषु, अतो ममकारान्तर्गतैव। क्रोधो हि अभिमानादेव क्रियते—'किमित्ययं मामकोऽसमर्थान्ति माद्यति वा भवन्त मन' इति। अतोऽहङ्कार एव। 'एषाम्' इति क्रोधादीनां मूलं बीजमेतदेव पदद्वयं 'ममकारोऽहङ्कार' इति च। तथा च रागद्वेषावपि बीजभूतौ क्रोधादीनां द्रष्टव्यौ। तस्यैव पदद्वयस्यापरः पर्यायो ममकारः—रागः, अहङ्कारः—द्वेष ॥ ३१ ॥

अर्थ—इन कषायोंके मूल दो पद हैं—एक ममकार और दूसरा अहंकार। राग और द्वेष भी इन्हींके नामान्तर हैं।

भावार्थ—'यह मेरा है,' इस प्रकारके भावको ममकार कहते हैं। इसमें माया और लोभ कषायका ग्रहण होता है। गर्वको अहंकार कहते हैं। यह मान कषाय और क्रोध कषायका लक्षण है।

१ ममेदमिति मु०।

धन कमानेके लिए बनिये लोग लेन-देनमें मायाचार भी करते हैं, अतः माया ममकारके ही अन्तर्ग
क्रोध भी उसी भावसे ही किया जाता है। 'यह मामूली आदमी होकर भी मुझपर क्यों चिल्लाता
अथवा मुझे क्यों मारता है?' यह अहंकार ही है। अतः इन क्रोधादि कषायोंके मूल अर्थात् बीजक
ही पद हैं। तथा राग और द्वेष भी क्रोधादिके बीज जानने चाहिए। ये दोनों उन्हीं दो पदोंके नाम
हैं। ममकारका नाम राग है, और अहंकारका नाम द्वेष है।

अथैषां क्रोधादीनां चतुर्णां कषायाणां को रागः, को वा द्वेषस्तदित्याह—

इन क्रोधादि कषायोंमें राग और द्वेषका विभाग करते हैं:—

माया लोभकषायश्चेत्येतद्रागसंज्ञितं द्वन्द्वम्।
क्रोधो मानश्च पुनर्द्वेष इति समासनिर्दिष्टः ॥ ३२ ॥

टीका—उक्तलक्षणौ मायालोभौ। तावेव द्वन्द्वं मिथुनम्। रागसंज्ञितं रागनामकम्। क्रोधमानौ चोक्तलक्षणौ। एतदपि द्वन्द्वं द्वयं 'द्वेष' इति निर्दिश्यते संक्षेपतः ॥ ३२ ॥

अर्थ—संक्षेपमें माया और लोभ कषायके युगलका नाम राग है, और क्रोध तथा मान कषायके युगलका नाम द्वेष है।

भावार्थ—माया और लोभको राग कहते हैं, और मान तथा क्रोधको द्वेष कहते हैं।

तौ पुनर्ममकाराहङ्कारौ रागद्वेषौ वा किं केवलावेव ज्ञानावरणीयादिकर्मबन्धे पर्याप्तौ अथान्यमपि कञ्चित् सहायमपेक्षेते? इत्याह—

शङ्का—वे ममकार और अहंकार अथवा राग और द्वेष अकेले ही ज्ञानावरणादिक कर्मोंका बन्ध करानेमें समर्थ हैं या किसी दूसरेकी सहायता लेते हैं? ग्रन्थकार इसका उत्तर देते हैं:—

मिथ्यादृष्ट्यविरमणप्रमादयोगास्तयोर्बलं दृष्टम्।
तदुपगृहीतावष्टविधकर्मबन्धस्य हेतू तौ ॥ ३३ ॥

टीका—मिथ्यादर्शनं मिथ्यादृष्टिः। तत्पूर्वमुक्तं तत्त्वार्थाश्रद्धानलक्षणम्। अविरमण-
विरतिः– अनिवृत्तिः पापाशयात्। विषयेन्द्रियनिद्राविकथाख्यः चतुर्विधः प्रमादः। मनोवा-
ारब्धा योगाः। एतांश्चतुरः सहायानपेक्षेते ममकाराहङ्कारौ रागद्वेषौ वा कर्माणि बन्धितव्ये।
ः' इत्येतावेव सम्बध्येते। 'बलम्' इति उपकारकत्वम्। उपकारका मिथ्यादर्शनादयः
रागद्वेषयोः। तैश्चोपगृहीतावेतौ मिथ्यादर्शनादिभी रागद्वेषौ अष्टप्रकारस्य कर्मबन्धस्य
प्रतिपद्येते इति ॥ ३३ ॥

अर्थ—मिथ्यात्व, अविरति, प्रमाद और योग ये राग और द्वेषकी सेना है। उसकी सहायतासे
आठ प्रकारके कर्मबन्धके कारण होते हैं।

भावार्थ—मिथ्यात्वका लक्षण 'तत्त्वार्थका श्रद्धान न करना' पहले बतला आये
होनेको अविरति कहते हैं। विषय, इन्द्रिय, निद्रा और विक

१ कांक्षेत् प०।

पञ्च नव द्व्यष्टाविंशतिकश्चतुःषट्कसप्तगुणभेदः ।

द्विपञ्चभेद इति सप्तनवतिभेदास्तथोत्तरतः ॥३५॥

टीका—ज्ञानावरणस्योत्तरप्रकृतिभेदाः पञ्च मतिज्ञानावरणादयः । दर्शनावरणस्योत्तरप्रकृतयो नव चक्षुर्दर्शनावरणादिचतुष्टयं निद्रादिपञ्चकञ्च । वेदनीयं द्विविधं सद्वेद्यमसद्वेद्यञ्च । मोहोत्तरप्रकृतयोऽष्टाविंशतिः—सम्यक्त्वं मिथ्यात्वं सम्यग्मिथ्यात्वम्, अनन्तानुबन्धिनश्चत्वारः क्रोधादयः, अप्रत्याख्यानावरणाश्चत्वारः, प्रत्याख्यानावरणाश्चत्वारः, संज्वलनाश्चत्वारः, हास्यं रतिररतिः भयं शोको जुगुप्सा स्त्रीवेदः पुंनपुंसकवेदश्चेति । आयुषश्चतस्र उत्तरप्रकृतयः—नारकायुः, तिर्यगायुः, मनुष्यायुः, देवायुरिति । षट् सप्तगुणा द्विचत्वारिंशद् भवन्ति । अतो नामकर्मण उत्तरप्रकृतयो द्विचत्वारिंशद्, भवन्ति । प्रतिपदपाठात्तु श्रूयन्ते । तद्यथा-गतिनाम, जातिनाम, शरीरनाम, अङ्गोपाङ्गनाम, निर्माणनाम, बन्धननाम, संस्थाननाम, संघातनाम, संहनननाम, स्पर्शनाम, रसनाम वर्णनाम, गन्धनाम, आनुपूर्वीनाम, अगुरुलघुनाम, उपघातनाम, पराघातनाम, आतपनाम, उद्योतनाम, उच्छ्वासनाम, विहायोगतिनाम, प्रत्येकशरीरनाम, साधारणशरीरनाम, त्रसनाम, स्थावरनाम, शुभनाम, अशुभनाम, सुभगनाम, दुर्भगनाम, सुस्वरनाम, दुःस्वरनाम, सूक्ष्मनाम, बादरनाम, पर्याप्तनाम, अपर्याप्तनाम, स्थिरनाम, अस्थिरनाम, आदेयनाम, अनादेयनाम, यशोनाम, अयशोनाम, तीर्थकरनाम चेति । गोत्रस्योत्तरप्रकृतिद्वयम् । उच्चैर्गोत्रं नीचैर्गोत्रञ्च । अन्तरायोत्तरप्रकृतयः पञ्च—दानान्तरायम्, लाभान्तरायम्, भोगान्तरायम्, उपभोगान्तरायम्, वीर्यान्तरायञ्चेति । एवमेषामष्टानामपि कर्मणामुत्तरप्रकृतयः सप्तनवतिर्भवन्तीति । नामकर्मणः पुनश्चतुर्विधा गतिः इत्यादि नामभेदेन सप्तषष्टिरुत्तरप्रकृतयो भवन्ति । शेषाणां पञ्चपञ्चाशत् । एतदुभयमेकीकृतं द्वाविंशत्युत्तरं प्रकृतिशतं भवति । तत्रापि विंशत्युत्तरप्रकृतिशतस्य बन्धः, सम्यग्मिथ्यात्वयोर्नास्ति बन्धः । मिथ्यात्वदलिकमेव विशुद्धं सत् सम्यक्त्वमुच्यते, सम्यग्मिथ्यात्वमपि दलविशुद्धं मिथ्यात्वमेवोच्यत इति ॥ ३५ ॥

अर्थ—पाँच, नौ, दो, अट्ठाईस, चार, बयालीस, दो और पाँच इस प्रकार उत्तरकर्मबन्धके ९७ भेद होते हैं ।

भावार्थ—ज्ञानावरणकी उत्तरप्रकृतियाँ पाँच हैं:—मतिज्ञानावरण, श्रुतज्ञानावरण, अवधिज्ञानावरण, मनःपर्ययज्ञानावरण और केवलज्ञानावरण ।

दर्शनावरणकी उत्तरप्रकृतियाँ नौ हैं:—चक्षुदर्शनावरण, अचक्षुदर्शनावरण, अवधिदर्शनावरण और केवलदर्शनावरण तथा निद्रा, निद्रानिद्रा, प्रचला, प्रचलाप्रचला और स्त्यानगृद्धि ।

मोहकी उत्तरप्रकृतियाँ अट्ठाईस हैं:—सम्यक्त्व, मिथ्यात्व और सम्यग्मिथ्यात्व, अनन्तानुबन्धी-क्रोधादि चार, अप्रत्याख्यानावरण चार, प्रत्याख्यानावरण चार, संज्वलन चार, हास्य, रति, अरति, भय, शोक, जुगुप्सा, पुंवेद, स्त्रीवेद और नपुंसकवेद ।

---

१ निद्रापञ्चकं च मु

दश० वि० प० ।

आयुकी उत्तरप्रकृतियाँ चार हैं—नारकायु, तिर्यञ्चायु, मनुष्यायु और देवायु ।

छहको सातसे गुणा करनेपर बयालीस होते हैं । अतः नामकर्मकी उत्तरप्रकृतियाँ बयालीस होती हैं:—गति, जाति, शरीर, अङ्गोपाङ्ग, निर्माण, बन्धन, संस्थान, संघात, संहनन, स्पर्श, रस, गन्ध, वर्ण, आनुपूर्वी, अगुरुलघु, उपघात, परघात, आताप, उद्योत, उच्छ्वास, विहायोगति, प्रत्येकशरीर, साधारणशरीर, त्रस, स्थावर, शुभ, अशुभ, सुभग, दुर्भग, सुस्वर, दुःस्वर, सूक्ष्म, बादर, पर्याप्ति, अपर्याप्ति, स्थिर, अस्थिर, आदेय, अनादेय, यश, अयश और तीर्थंकर नाम ।

गोत्रकी उत्तरप्रकृतियाँ दो हैं:—उच्चगोत्र और नीचगोत्र ।

अन्तरायकी उत्तरप्रकृतियाँ पाँच हैं:—दानान्तराय, लाभान्तराय, भोगान्तराय, उपभोगान्तराय, और वीर्यान्तराय ।

इस प्रकार इन आठों कर्मोंकी उत्तरप्रकृतियाँ सत्तानवें होती हैं । नामकर्मकी उत्तरप्रकृतियोंके भेदोंको मिलानेसे, जैसे गतिके चार भेद हैं, नामकर्मकी उत्तरप्रकृतियाँ ६७ होती हैं । और शेष कर्मोंकी उत्तरप्रकृतियाँ पचपन होती हैं । दोनोंको मिलानेसे १२२ उत्तरप्रकृतियाँ होती हैं । उनमेंसे भी बन्ध १२० ही प्रकृतियोंका होता है । सम्यक्त्व और मिथ्यात्वके दलिक ही विशुद्ध होनेपर सम्यक्त्व कहे जाते हैं, तथा उसी मिथ्यात्वके विशुद्ध दलोंको सम्यग्मिथ्यात्व कहते हैं ।

प्रकृतिरियमनेकविधा स्थित्यनुभागप्रदेशतस्तस्याः ।
तीव्रो मन्दो मध्य इति भवति बन्धोदयविशेषः ॥ ३६ ॥

टीका—एवमियं प्रकृतिरनेकविधा ' द्वाविंशत्युत्तरशतभेदा ' इत्यर्थः । तस्याश्च प्रकृतेः स्थित्यनुभागप्रदेशबन्धेभ्यः स्थितिबन्धानुभागबन्धप्रदेशबन्धाः तेभ्यः प्रकृतिबन्धविशेषो भवति, तीव्र मन्दः मध्य इति वा । उदयविशेषोऽपि तीव्रादिभेदः प्रकृतीनां भवति । तीव्राशयस्तदा श्रवेषु वर्तमानस्तीव्रं प्रकृतिबन्धं करोति, मन्दाशयो मन्दम्, मध्याशयो मध्यमिति । बन्धविशेषाबोदय इति । तत्र स्थितिबन्धो ज्ञानदर्शनावरणवेद्यान्तरायाणां त्रिंशत्सागरोपमकोटीकोटय उत्कृष्टः । मोहस्य स्थितिबन्ध उत्कृष्टः सप्ततिसागरोपमकोटीकोटयः । नामगोत्रयोः स्थितिबन्धो विंशतिसागरोपमकोटीकोटय । उत्कृष्टः स्थितिबन्ध आयुषः त्रयस्त्रिंशत्सागरोपमाणि । वेदनीयस्य जघन्या बन्धस्थितिर्द्वादशमुहूर्ता । नामगोत्रयोरष्टौ मुहूर्ता । शेषकर्मणामन्तर्मुहूर्तं स्थितिः ।

अनुभागबन्धो विपाकाख्यः कर्मणः शुभस्याशुभस्य वा बन्धकाल एव रसविशेषं निर्वर्तयति । तस्यानुभवनं विपाकः । स यथा नामकर्मणः[1] गत्यादिस्थानेषु[2] विपच्यमानोऽनुभूयते । प्रदेशबन्धस्तु, एकस्मिन्नात्मप्रदेशे ज्ञानावरणपुद्गला अनन्ताः, तथा शेषकर्मणामपीति ॥ ३६ ॥

१ नामकर्मेति मु० । २ गत्यादिषु स्थानेषु मु० ।

अर्थ—इस प्रकृतिके अनेक भेद हैं। तथा स्थिति, अनुभाग और प्रदेशकी अपेक्षासे उसके बन्ध और उदयके तीव्र, मन्द और मध्यम भेद होते हैं।

भावार्थ—पूर्वोक्त प्रकारसे उत्तरप्रकृतियोंके एक सौ बाईस भेद होते हैं। स्थितिबन्ध, अनुभागबन्ध और प्रदेशबन्धकी अपेक्षासे वह प्रकृतिबन्ध तीव्र, मन्द अथवा मध्यम भेद होता है, तथा उसका उदय भी तीव्र, मन्द अथवा मध्यम होता है। तीव्र परिणामोंसे तीव्र प्रकृतिबन्ध होता है, और मध्यम परिणामोंसे मध्यम प्रकृतिबन्ध होता है। बन्धमें विशेषता होनेसे उदयमें भी होती है, आशय यह है कि जब प्रकृतिकी उत्कृष्ट स्थिति होती है, तब उसका अनुभव और प्रदेशबन्ध भी उत्कृष्ट होते हैं, और उससे उस उत्कृष्ट स्थितिमें बन्ध और उदय-दोनों तीव्र होते हैं। इसी प्रकार जब प्रकृतिकी स्थिति जघन्य होती है, तो अनुभव और प्रदेश भी जघन्य होते हैं, और उससे स्थितिका बन्ध-उदय मन्द होता है। इसी तरह मध्यममें जानना चाहिए।

ज्ञानावरण, दर्शनावरण, वेदनीय और अन्तरायका उत्कृष्ट स्थितिबन्ध तीस कोड़ाकोड़ी सागर प्रमाण होता है। मोहका उत्कृष्ट स्थितिबन्ध सत्तर कोड़ाकोड़ी सागर प्रमाण होता है। नाम और गोत्रका उत्कृष्ट स्थितिबन्ध बीस कोड़ाकोड़ी सागर प्रमाण होता है। वेदनीयका जघन्य स्थितिबन्ध बारह मुहूर्त होता है। नाम और गोत्रका जघन्य स्थितिबन्ध आठ मुहूर्त होता है। शेष कर्मोंका अन्तर्मुहूर्त स्थितिबन्ध होता है। विपाकको अनुभागबन्ध कहते हैं। शुभ अथवा अशुभकर्मका जब बन्ध होता है, उसी समय उसमें रस विशेष भी पड़ता है। उस रस विशेषके अनुभवको विपाक कहते हैं। जब गति वगैरह स्थानोंमें कर्मका उदय आता है, तब वह विपाक अपने अपने नामके अनुसार होता है।

कर्मदलिकोंके समूहको प्रदेशबन्ध कहते हैं। जिस प्रकार एक आत्म-प्रदेशमें अनन्त दलिक रहते हैं। तथा अन्यकर्मोंके भी अनन्त दलिक रहते हैं।

बन्धके कारण कहते हैं:—

तत्र प्रदेशबन्धो योगात्तदनुभवनं कषायवशात् ।
स्थितिपाकविशेषस्तस्य भवति लेश्याविशेषेण ॥ ३७ ॥

टीका—तत्र तेषु चतुर्षु बन्धभेदेषु प्रदेशबन्धस्तावत् योगात् मनोवाक्कायलक्षणात् भवति-'आत्मप्रदेशेषु ज्ञानावरणादिपुद्गलोपचयो जायते' इत्यर्थः। तस्य प्रदेशबद्धस्य कर्मणोऽनुभवनं कषायवशात् 'विपाकः' इत्यर्थः। स्थितिविशेषः पाकविशेषश्च तस्य लेश्याविशेषजनितो भवति 'उत्कृष्टः मध्यमः जघन्यः' इत्यर्थः॥ ३७॥

अर्थ—योगसे प्रदेशबन्ध होता है, कषायसे अनुभागबन्ध होता है, और लेश्याकी विशेषतासे स्थिति और विपाकमें विशेषता आती है।

भावार्थ—बन्धके चार भेदोंमें से प्रदेशबन्ध योगसे होता है। अर्थात् मनोयोग, वचनयोग, और काययोगके कारण आत्माके प्रदेशोंमें ज्ञानावरणादि कर्मपुद्गलोंका संचय होता है, और कषाय-

के कारण उन बँधे हुए कर्मोंका अनुभवन अर्थात् विपाक होता है, तथा जिस प्रकारकी लेश्या होती है, उसी प्रकारका उत्कृष्ट, मध्यम, और जघन्य स्थितिबन्ध होता है, और उसी प्रकारकी उसमें रस-शक्ति पड़ती है।

तत्र 'लेश्या' इति कः पदार्थः ? कति वा भवन्ति लेश्याः इत्याह—

लेश्याका स्वरूप तथा उसके भेद बतलाते हैं:—

ताःकृष्णनीलकापोततैजसीपद्मशुक्लनामानः ।
श्लेष इव वर्णबन्धस्य कर्मबन्धस्थितिविधात्र्यः ॥३८॥

टीका—षड् लेश्याः-मनसः परिणामभेदाः। स च परिणामस्तीव्रोऽध्यवसायोऽशुभो जम्बूफलभक्षकषट्पुरुषदृष्टान्तादिसाध्यः। अपरे त्वाहुः— 'योगपरिणामो लेश्या।' यस्मात् कायवाग्व्यापारोऽपि मनःपरिणामापेक्षस्तीव्र एवाशुभो भवति। अशुभशुभकर्मस्वरूपसदृशाः स्वात्मपरिणामा जायन्ते प्राणिनां वर्णकाश्चेति। काः (के)? हरितालहिंगुलिकादयः, तेषां कुड्यादौ चित्रकर्माणि स्थैर्यमापादयति श्लेषो वर्णानां बन्धे दृढीकरणम्। एवमेता लेश्याः कर्मबन्धस्थितिविधात्र्यः। तीव्रपरिणामाः स्थितिं कर्मणामतिदीर्घां विदधति दुःखबहुलां कृष्णनीलकापोताख्या निकाचनावस्थापनेन। तैजसीपद्मशुक्लनामानः शुभस्य कर्मबन्धस्यानुकूलदाः शुभफलदायिनीं कर्मस्थितिं विदधति मंदतीं विशुद्धां विशुद्धतरां विशुद्धतमां च उत्तरोत्तरं भवन्तीति ॥ ३८ ॥

अर्थ—कृष्ण, नील, कापोत, तैजस, पद्म और शुक्ल—ये लेश्याके छह भेद हैं। जिस प्रकार श्लेषसे रंग पक्का और स्थायी हो जाता है, उसी प्रकार ये लेश्याएँ भी कर्मबन्धकी स्थितिको दृढ़ करनेवाली होती हैं।

भावार्थ—लेश्याओंके छह भेद हैं। परिणामविशेषको लेश्या कहते हैं। जामुन खानेके इच्छुक पुरुषोंके दृष्टान्तको लेकर उन पुरुषोंके अपने अपने जैसे तीव्र, मन्द, या मध्यम परिणाम थे, वैसी ही उनकी लेश्या जाननी चाहिए। अन्य आचार्यों का मत है कि योगपरिणामको ही लेश्या कहते हैं। क्योंकि शरीर और वचनका व्यापार मनके परिणामकी अपेक्षासे ही तीव्र होता है, और तीव्र होनेसे अशुभ होता है। आशय यह है कि लेश्या मनमें होनेवाले भावोंकी दशाका नाम है। किन्तु अन्य आचार्य कायिक और वाचनिक क्रियाको भी लेश्या कहते हैं। उनका कहना है कि मनुष्य जब कुछ करता है, या बोलता है, तब भी उसके करने या बोलनेमें मनके भावोंकी ही मुख्यता रहती है। मनमें यदि क्रोध होता है, तो उसकी शारीरिक-क्रिया और वाचनिक-क्रियामें बराबर उसका असर पाया जाता है। अतः योग

१ षड् लेश्या [illegible] —मु० [illegible] —ब० ३ हिंगुलकाद— मु० ४ [illegible]

परिणामको लेश्या कहते हैं। जिस प्रकार दीवार वगैरहपर चित्रोंको स्थायी बनानेके लिए रंगोंमें सरेस डाल देते हैं, जिससे रंग पक्का और स्थायी हो जाता है। इसी प्रकार ये लेश्याएँ कर्मबन्धकी स्थितिको दृढ़ करती हैं। अर्थात् कृष्ण, नील, और कापोत लेश्यारूप तीव्र परिणामोंसे कर्मोंकी स्थिति अति दीर्घ और दुःख देनेवाली होती है। तथा तेजस, पद्म और शुक्ल लेश्यासे शुभ कर्मोंकी स्थिति अधिक और शुभ फल देनेवाली होती है। ये तीनों लेश्याएँ उत्तरोत्तर विशुद्ध, विशुद्धतर और विशुद्धतम होती हैं।

'तस्मिन् पुनः कर्मणि बद्धे आत्मसात्कृते किं भवति?' इत्याह—

आत्माके साथ कर्मोंका बन्ध होजानेपर क्या होता है? यह बतलाते हैं:—

कर्मोदयाद् भवगतिर्भवगतिमूला शरीरनिर्वृत्तिः।
देहादिन्द्रियविषया विषयनिमित्ते च सुखदुःखे ॥३९॥

टीका—उदिते विपाकप्राप्ते तस्मिन् कर्मणि भवो नरकादिगतयः तत्रोत्पत्तौ भवगतौ सत्यां नरकादिशरीरनिर्वृत्तिः। भवगतिःमूलं बीजं यस्याः सा भवगतिमूला शरीरनिर्वृत्तिः। देहनिर्वृत्तेश्च स्पर्शनादीन्द्रियनिर्वृत्तिः। ततः स्पर्शनादिविषयग्रहणशक्तिः। ततश्चेष्ट विषयनिमित्तः सुखानुभवः, अनिष्टविषयनिमित्तश्च दुःखानुभवः॥ ३९॥

अर्थ—कर्मके उदयसे जीवको नरकादिक गतियोंमें जाना पड़ता है। नरकादिक गतियोंमें जानेसे शरीर बनता है। शरीरमें इन्द्रियाँ होती हैं। इन्द्रियोंमें विषयको ग्रहण करनेकी शक्ति होती है और विषयोंके ग्रहण करनेसे सुख-दुःख होते हैं।

भावार्थ—बाँधा हुआ कर्म जब उदयमें आता है, तो वह जीवको नरकादिक गतियोंमें ले जाता है। वहाँ शरीर बनता है। शरीरमें इन्द्रियाँ होती हैं, और उनमें विषयोंको ग्रहण करनेकी शक्ति होती है। इष्ट विषयके भोगसे सुख और अनिष्ट विषयके भोगसे दुःख होता है।

'अत्र च स्वभावादेव सर्वः प्राणी सुखमभिलषति दुःखाच्चोद्विजते। मोहान्धो गुणदोषानविचार्य सुखसाधनाय यतमानो यां यां क्रियामारभते सा साऽस्य दुःखहेतुर्भवति' इति दर्शयति—

इस संसारमें स्वभावसे ही सभी प्राणी सुख चाहते हैं, और दुःखसे डरते हैं। मोहसे अन्धा हुआ जीव भले बुरेका विचार न करके सुखकी प्राप्तिके लिए जो जो काम करता है, वह उसके दुःखके ही कारण होते हैं। इसी बातको ग्रन्थकार निम्न कारिकासे बतलाते हैं:—

दुःखद्विट् सुखलिप्सुर्मोहान्धत्वाददृष्टगुणदोषः।
यां यां करोति चेष्टां तया तया दुःखमादत्ते ॥४०॥

टीका—दुःखं द्वेष्टीति दुःखद्विट्। सुखं लिप्सते तच्छीलश्च सुखलिप्सुः। मोहोऽज्ञानविज्ञानभेदः। तेनान्धो न गुणं दोषं वा पश्यति। चेष्टा कायिकी वाचिकी मानसी वा क्रिया

१— [illegible] देहनिर्वृत्तेश्च मु०

तेन यादृशी या क्रियते क्रिया तया तया दुःखमादत्ते-दुःखमनुभवति। कर्मैव वा दुःखम्, कारणे कार्योपचारात्। तदादत्ते-'दुःखकारणं कर्म बध्नाति' इत्यर्थः॥ ४०॥

अर्थ—दुःखका वैरी और सुखका चाहनेवाला प्राणी भले-बुरेका विचार न करता हुआ, मोहसे अन्धा होकर जो जो काम करता है, उससे दुःखको ही भोगता है।

भावार्थ—सुख पानेकी इच्छासे बिना विचारे मोहमें पड़कर प्राणी जो कुछ मनसे, वचनसे, और कायसे चेष्टा करता है, वह चेष्टा कर्मबन्धका कारण है, और कर्मबन्ध दुःखका कारण होनेसे दुःखरूप है। अतः कारणमें कार्यका उपचार करके 'चेष्टासे दुःखका अनुभव करता है' ऐसा कह दिया है। वैसे तो उस चेष्टासे कर्मबन्ध करता है, और कर्मबन्ध से दुःख भोगता है।

तत्र पञ्चसु इन्द्रियार्थेषु एकैकविषयप्रवृत्तावपि प्रत्यपायान् पञ्चभिर्दृष्टान्तैर्दर्शयति—

पाँचों इन्द्रियोंके पाँच विषय हैं। उनमेंसे एक एक विषयमें भी प्रवृत्ति करनेपर जो आपदाएँ आती हैं, उन्हें पाँच दृष्टान्तोंसे बतलाते हैं:—

कलरिभितमधुरगान्धर्वतूर्ययोषिद्विभूषणरवाद्यैः।
श्रोत्रावबद्धहृदयो हरिण इव विनाशमुपयाति॥ ४१॥

टीका—कला अस्मिन् विद्यन्त इति कलं मात्रायुक्तं ग्रामरागरीत्या युक्तम्। रिभितं मधुरं श्रोत्रसुखम्। गान्धर्वविशेषणान्येतानि। तूर्यं वादित्रविशेषः, तस्य ध्वनिः। योषितां विभूषणानि नूपुररसनाकिंकिणिकादिध्वनितानि, तेषां रवः शब्दः। एवमादिभिर्मनोहारिभिः शब्दैः। श्रोत्रेन्द्रियावबद्धहृदय-श्रोत्रे श्रोत्रेन्द्रियविषयेऽवबद्धं हृदयं येन स श्रोत्रावबद्धहृदयः। कुरङ्गो विनाशमाशु प्राप्नोति गोचर्यांखेटके। तद्वदपरोऽपि प्रमादीति॥ ४१॥

अर्थ—गायकके मनोहर और मधुर संगीत, वाद्य तथा स्त्रियोंके आभूषणोंके शब्द वगैरहसे जिसका हृदय श्रोत्रेन्द्रियके विषयमें आसक्त है, वह हिरनकी तरह विनाशको प्राप्त होता है।

भावार्थ—जिसमें कला है उसे कल कहते हैं। उतार-चढ़ाव तथा ग्राम-रागकी रीतिसे युक्त कानोंको सुख देनेवाला गायकोंका संगीत, बाजोंकी मधुर ध्वनि, और स्त्रियोंके बिछुए, करधनी, घुँघरू आदि आभूषणोंका शब्द—इस प्रकारके मनोहारी शब्दोंको सुनकर जिसका मन कर्णेन्द्रियके विषयमें फँस जाता है, वह उसी प्रकार अपना सर्वनाश करता है, जिस प्रकार शिकारीके संगीतकी ध्वनिमें आसक्त होकर हिरन अपना सर्वनाश कर बैठता है।

गतिविभ्रमेङ्गिताकारहास्यलीलाकटाक्षविक्षिप्तः।
रूपावेशितचक्षुः शलभ इव विपद्यते विवशः॥ ४२॥

टीका—गतेर्विभ्रमः-गमनप्रकारः 'सविकारा गति' इत्यर्थः। इङ्गितं निरीक्षितं स्निग्धया दृष्ट्याऽवलोकनम्। आकारः-तन्मुखेऽङ्गसन्निवेशविशेषः। हास्यं सविलासं 'सलीलं

१ वाद्यता मु०। २ पदमिदं टीकायामस्त नास्ति मु० प्रतौ। ३ इति मु०।

हसितम् ' इत्यर्थः । कटाक्षः-अपाङ्गसंनिवेशितेदृष्टिः सामर्षा । एभिर्विशेषणैः विक्षिप्तः प्रेरितो वनिताम्पादौ निवेदितचक्षुः शलभ इव विपद्यते विनश्यति । शलभो हि दीपशिखावलोकनाक्षिप्तोऽभिमुखः पतितः तत्रैव भस्मसाद् भवतीति ॥ ४२ ॥

अर्थ—मदमाती गति, प्रेमभरी चितवन, मुख, जाँघ वगैरह अवयव, मदभरी हँसी तथा कटाक्षसे पागल हुआ मनुष्य स्त्रीके रूपपर आसक्त होकर पतङ्गकी तरह विपत्तिका शिकार बनता है ।

भावार्थ—जिस प्रकार पतङ्ग दीप-शिखापर मुग्ध होकर उसीमें जलकर राख हो जाता है, उसी प्रकार मनुष्य भी स्त्रीकी प्रेमभरी चेष्टाओं और उसके रूपपर मुग्ध होकर अपना सब कुछ गँवा बैठते हैं ।

स्नानाङ्गरागवर्तिकवर्णकधूपाधिवासपटवासैः ।
गन्धभ्रमितमनस्को मधुकर इव नाशमुपयाति ॥ ४३ ॥

टीका—कतिपयसुरभिद्रव्यसमाहारः स्नानम् । अङ्गरागः-चन्दनकुंकुमादिविलेपनम् । धूपद्रव्यकृता वर्तिरेव वर्तिका । (सैव धूपो वर्तिकाधूप एवासौ संजायते ।) सैव दह्यमाना धूपायते । वर्णकाः कृष्णादयः । अधिवासो मालतीकुसुमादिभिः । पटवासो गन्धद्रव्यचूर्णः । एभिः स्नानादिभिर्गन्धैः भ्रमितम्- आक्षिप्तं मनो यस्यासौ गन्धभ्रमितमनस्कः । मधुकरः शिलीमुख इव विनाशं प्राप्नोति । सुरभिणा पद्मगन्धेन आकृष्टश्चञ्चरीकस्तन्मध्यवर्तिगन्धमाजिघ्रन्नस्तमिते सवितरि संकुचयत्यपि नलिने नाशमुपयाति । निरुद्धत्वाच्च तत्रैव परासुतां लभत इति ।

अर्थ—स्नान, अङ्गराग, धूपवत्ती, सुगन्धित लेप, अधिवास और पटवासकी सुगन्धसे पागल हुआ मनुष्य भौंरेके समान मृत्युको प्राप्त होता है ।

भावार्थ—इसमें कुछ सुगन्धित द्रव्योंको गिनाया गया है । चन्दन, केशर वगैरहका लेप करनेको अङ्गराग कहते हैं । धूपकी बनाई गई बत्तीको धूपवत्ती कहते हैं । उसे जब जलाते हैं तब वह धूपकी ही तरह सुगन्ध देती है । किसी चीजको मालती वगैरहके फूलोंकी सुगन्धसे सुवासित करनेको अधिवास कहते हैं । कपड़ोंको सुवासित करनेके लिए तैयार किये गये सुगन्धित चूर्णको पटवास कहते हैं । इनकी सुगन्धसे जिनका मन चंचल हो उठता है, वह भौंरेकी तरह नाशको प्राप्त हो जाता है । जिस प्रकार भौंरा कमलकी सुगन्धसे आकृष्ट होकर उसके भीतर बैठकर उसकी गन्ध लिया करता है । जब सूर्य डूब जाता है, तो कमल बन्द हो जाता है । कमलके बन्द होते ही वह उसके अन्दर बद हो जाता है । और उसके बन्द होनेसे वह वहीं मर जाता है ।

मिष्टान्नपानमांसौदनादिमधुररसविषयगृद्धात्मा ।
गलयन्त्रपाशबद्धो मीन इव विनाशमुपयाति ॥ ४४ ॥

टीका—मिष्टमत्यन्तस्वादु सर्वदोषरहितं भक्ष्यभोज्यं विविधम् । पानकादि मद्यं प्रसन्नादि वा पानम् । मांसं छागहरिणशूकरमशशलावकादीनाम् । शाल्योदनादि च । मधुरो रसः खण्डशर्करादि च । स एव विषयो रसनायाः । तस्मिन् गृद्धः सक्त आत्मा यस्य । लोहांकुशको गलः । यन्त्राणि जालादि-मर्माणि सिंहव्याघ्रद्वीपिमूषिकादिव्यापादनहेतोः क्रियन्ते । तन्तुमयाः पाशाः तित्तिरलावकमयूरादिव्यापत्तये निक्षिप्यन्ते । अथवा यन्त्रमानायः स एव पाशः तेन बद्धो वशीकृतो मीनः पृथुरोमा मृत्युमुखमाविशति ॥ ४४ ॥

अर्थ—मीठा स्वादिष्ट भोजन, मदिरा अथवा कोई अन्य मधुर पेय, मांस, सुगन्धित चावलोंका भात तथा खाँड़-शक्कर वगैरह, रसना इन्द्रियके विषयोंमें जिसकी आत्मा आसक्त है, वह लोहेके यंत्र अथवा जालमें फँसे हुए मीनके समान नाशको प्राप्त हो जाता है।

भावार्थ—लोहेके बने हुए यन्त्रको गल-यन्त्र कहते हैं, और उससे शेर व्याघ्र, चूहे वगैरह पकड़े जाते हैं। धागोंका बना पाश होता है। यह तीतर, लावा, मोर वगैरह पक्षियोंके पकड़नेके काम आता है। जिस प्रकार धीवर लोहेके काँटेको जलमें डालता है और उसमें लगे हुए मांसके खानेके लोभमें आकर मछली मृत्युके मुखमें चली जाती है, उसी प्रकार रसना इन्द्रियके विषयोंके लोभमें पड़कर यह प्राणी भी विपत्तिमें फँस जाता है।

शयनासनसंवाहनसुरतस्नानानुलेपनासक्तः ।
स्पर्शव्याकुलितमतिर्गजेन्द्र इव बध्यते मूढः ॥ ४५ ॥

टीका—शयनं स्वप्रमाणा शय्या तुल्योपधानकप्रच्छादनपटसनाथा । आसनमपि आसंदकादि व्यपगतोपद्रवं मृदुवस्तुपट्टादियुतम् । संवाहनम्-अङ्ग-मर्दनम् । सुरतं कोमलगात्रयष्टेः प्रियायाः चुम्बनालिङ्गनादि । स्नानानुलेपने पूर्वोक्ते । तेषु सक्तो-व्यसनी । शय्यादिसंस्पर्शेन प्रियाङ्गस्पर्शेन च व्याकुलितमतिः—मोहितबुद्धिः गजेन्द्र इव गणिकाकरिणीभिः कराग्रैः संस्पर्शमानः—वीज्यमानश्च सत्कुसुमैः पल्लवैः काश्चित् सूप ? काश्चिन् दन्तकाण्डेन प्रेरयन्, काश्चिदग्रेकृत्वा, काश्चिन् पृष्ठतो विधाय, पार्श्वतश्चान्यां स्वच्छन्दचारी क्रीडन्ननेकविधां (कथा) वारि' (री) पञ्जरमध्यमानीतः, ततश्चाधोरणेनाधिरूढस्तीक्ष्णाङ्कुशाग्रग्राहग्रस्तमस्तकः परवशोऽनेकप्रकारं दुःखमनुभवतीति ॥ ४५ ॥

अर्थ—बिछावन, तकिया वगैरहसे सुसज्जित शय्या, कोमल आसन, अंगमर्दन, संभोग, स्नान और अनुलेपनमें आसक्त हुआ मनुष्य, प्रियाके शरीरके आलिङ्गनसे पागल हुए मूर्ख हाथीके समान बन्धको प्राप्त होता है।

---

१ भक्ष्यमद्यं मो—प० । २ पानकादिकम—ब० । ३ छागहतहरिण—प० । ४ शूकरशश—प० । ५ गलोयन्त्राणि आ० । ६ छागादिगात्राणि आ० । ७ स्नायुम—प० म० । ८ प्रमाणा शय्या मु०, आत्मप्रमाणा म० आ० । ९ नास्ति पदमिदं म० आ० पुस्तकयोः । १०—निवात्रा-मु० ११ वारी म० आ० ।

भावार्थ—हाथीको पकड़नेके लिए अनेक हथिनियाँ छोड़ी जाती हैं। वे उसे अपनी सूँड़ोंसे छूती हैं, फूलों और पत्तोंसे भरी टहनियोंको मुँहमें दबाकर उसके ऊपर ढोती हैं। उनके स्पर्शसे मोहित हुआ हाथी किसी हथिनीको स्पर्श करता है, किसीको दाँतोंसे धक्का देता है। किसीको आगे करता है, किसीको पीछे करता है, और किसीको अपनी बगलमें करता है। इस प्रकार क्रीड़ा करते हुए उस हाथीको वे हथिनियाँ हाथी पकड़नेके स्थानपर ले जाती हैं, वहाँ उसके पकड़े जानेपर हाथीवान् उसपर सवार हो जाता है और उसके मस्तकमें अङ्कुश गड़ागड़ाकर उसे वशमें कर लेता है। इसी प्रकार स्पर्श इन्द्रियके फेरमें पड़कर मनुष्यको भी बहुत दुःख सहना पड़ता है।

'इत्यमेकेन्द्रियविषयगृद्धानामपायद्वारमात्रमुक्तम्' इति उपसंहरति—

इस प्रकार एक एक इन्द्रियके विषयोंमें आसक्त हुए जीवोंके दुःखोंका संकेतमात्र करके उसका उपसंहार करते हैं:—

एवमनेके दोषाः प्रणष्टशिष्टेष्टदृष्टिचेष्टानाम् ।
दुर्नियमितेन्द्रियाणां भवन्ति बाधाकरा बहुशः ॥ ४६ ॥

टीका—एवम्-उक्तप्रकारेण प्रत्यक्षप्रमाणसमधिगम्य एकैको दोषः प्रदर्शितः। तद्द्वारेण च परलोकेऽप्यनिवृत्तविषयसङ्गानां बहवो दोषा नारकतिर्यग्योनिभवादिषु भवन्ति। केषामेते दोषाः ? प्रणष्टशिष्टेष्टदृष्टिचेष्टानाम्। शिष्टा विवेकिनः परलोकपथप्ररूपणानुष्ठाननिपुणाः, तेषामिष्टा दृष्टिचेष्टा। दृष्टिः सन्मार्गोपदेशि ज्ञानम्। चेष्टा क्रियानुष्ठानम्। उभयमेते शिष्टेष्टदृष्टिचेष्टे प्रणष्टे येषां ते प्रणष्टशिष्टेष्टदृष्टिचेष्टाः, तेषाम्। दुर्नियमितेन्द्रियाणाम्—दोषेषु न नियमं ग्राहितानि इन्द्रियाणि यैः—श्रोत्रादिविषयव्यसनानि दोषाः-तेषां दुर्नियमितेन्द्रियाणाम्। बाधाकराः पीडाकराः शारीरमानसाशर्मकारिणोऽनेकशः संसारोदधौ परिवर्तनमाचरतामिति ॥ ४६ ॥

अर्थ—जिनके शिष्ट जनोंके योग्य ज्ञान और चारित्र नहीं हैं, तथा जिनकी इन्द्रियाँ भी वशमें नहीं हैं, उनमें इस प्रकारके पीड़ा पहुँचानेवाले प्रायः अनेक व्यसन पाये जाते हैं।

भावार्थ—इस प्रकार उक्त रीतिसे इन्द्रियोंके विषयोंमें आसक्त करनेकी एक एक बुराई बतलाई है, जो प्रत्यक्षगोचर है। जो समझदार मनुष्य परलोकके उपयोगी मार्गका कथन और आचरण करनेमें निपुण होते हैं उन्हें शिष्ट कहते हैं। उन्हें सन्मार्गका उपदेश करना और स्वयं उसका आचरण करना प्रिय होता है। जो ऐसे नहीं हैं और विषयोंके संगसे विरत नहीं हुए हैं, उन्हें उनके कारण नरक, तिर्यञ्च आदि योनियोंमें अनेक शारीरिक और मानसिक पीड़ाएँ भोगनी पड़ती हैं।

'अपि चैते कुरङ्गादयो विनाशभाजः संवृत्ता एकैकविषयासक्ताः। यः पुनः पञ्चस्वपि इन्द्रियार्थेषु सक्तः स किल यज्जीवति तदेव चित्रम्' इति उपसंहरन्नाह—

१ इत्यमेवेन्द्रिय—मु०। २ सम्प्राप्ता मु०।

तथा ये हिरन वगैरह एक एक इन्द्रियके विषयमें आसक्त होकर विनाशको प्राप्त होते हैं, किन्तु जो पाँचों ही इन्द्रियोंके विषयोंमें आसक्त होकर भी जीता है, उसका जीना अचरजकी ही बात है। उपसंहार करते हुए इसी बातको कहते हैं:—

एकैकविषयसंगाद् रागद्वेषातुरा विनाशास्ते ।
किं पुनरनियतात्मा जीवः पञ्चेन्द्रियवशार्तः ॥ ४७ ॥

टीका—शब्दाद्येकैकविषयसंगाद् रागद्वेषवशगतत्वादातुरास्ते कुरङ्गादयो विनाशं गताः। मान्द्याभिभूतापथ्यादयातुरवत् । 'किं पुनरनियतात्मा ?' इति । नात्मा नियमं ग्राहितः—न निवारितः शब्दादिविषयेषु प्रीतिमनुबध्नन् पञ्चानामिन्द्रियाणां वशवर्ती । अत एव आर्तः—अप्राप्तान् विषयानभिलषन् प्राप्तांश्चावियोगतश्चिन्तयत्वाति ॥ ४७ ॥

अर्थ—जब राग और द्वेषसे पीड़ित वे हिरन वगैरह एक एक विषयके सम्बन्धसे विनाशको प्राप्त हुए तब पाँचों इन्द्रियोंकी पराधीनतासे पीड़ित असंयमी जीवका कहना ही क्या है ?

भावार्थ—मन्दाग्निसे पीड़ित अपथ्यसेवी बीमारकी तरह, राग और द्वेषसे पीड़ित उक्त हिरन वगैरह जन्तु शब्दादिक एक एक विषयके संसर्गसे मृत्युके मुखमें चले जाते हैं, तब जो शब्दादिक विषयोंमें प्रीति करनेसे अपनी आत्माको नहीं रोकता है तथा पाँचों इन्द्रियोंकी विषय-तृष्णासे पीड़ित होकर अप्राप्त विषयोंकी इच्छा करता है, और प्राप्त विषयोंके विछोह न होनेकी चिन्ता करता है, उसका तो कहना ही क्या है !

'न च कश्चिच्छब्दादिर्विषयः समस्ति योऽभ्यस्यमानः सर्वथा तृप्तिं करिष्यति' इत्येतद् प्रदर्शयन्नाह—

अब यह बतलाते हैं कि ऐसा कोई विषय नहीं है, जिसके बार-बार सेवन करनेसे सर्वथा तृप्ति होती हो—

न हि सोऽस्तीन्द्रियविषयो येनाभ्यस्तेन नित्यतृषितानि ।
तृप्तिं प्राप्नुयुरक्षाण्यनेकमार्गप्रलीनानि ॥ ४८ ॥

टीका—नैवास्ति इन्द्रियविषयः स शब्दादिः, येनाभ्यस्तेन-पुनः पुनरासेव्यमानेन, नित्यतृषितानि-नित्यमेव साभिलाषाणि सपिपासानि तृप्तिं प्राप्नुयुः अक्षाणि-इन्द्रियाणि, अनेकस्मिन् मार्गे शब्दादावनेकभेदे प्रकर्षेण लीनानि तन्मयतां गतानि तदासक्तानि, पुनः पुनराकांक्षन्त्येव स्वविषयान् ॥ ४८ ॥

अर्थ—इन्द्रियका ऐसा कोई विषय नहीं है, जिसके बार-बार सेवन करनेसे सर्वदाकी प्यासी और अनेक विषयोंमें आसक्त इन्द्रियोंकी तृप्ति हो सकती हो ।

---

१ विषयेषु समस्तेषु अभ्य—म० आ० । २ नित्यं तृ—म० आ० ।

भावार्थ—ये इन्द्रियाँ अपने अपने विषयोंमें एकरस नहीं हैं। अपने विषयोंको भोगते हुए भी इनकी विषयोंकी चाह बनी ही रहती है।

'अपि च, एतानि इन्द्रियाणि स्वविषयेषु नैकरसानि, यस्मादिष्टमप्यनिष्टमनिष्टमपीष्टं मन्यते' इति दर्शयन्नाह—

अब यह बतलाते हैं कि इष्ट विषय भी अनिष्ट लगने लगता है, और अनिष्ट विषय भी इष्ट लगने लगता है:—

कश्चिच्छुभोऽपि विषयः परिणामवशात्पुनर्भवत्यशुभः ।
कश्चिदशुभोऽपि भूत्वा कालेन पुनः शुभीभवति ॥ ४९ ॥

टीका—इष्टोऽपि कश्चिद्विषयो वेणुवीणागायनादीनां यथा ध्वनिः, बुभुक्षार्तस्य पिपासितस्य वा रागपरिणामवशात् प्रागिष्टः पश्चात् द्वेषपरिणामादनिष्ट आपद्यते । स एव पुनरशुभः कालान्तरेण रागपरिणामादिष्टो जायत इति। अनवस्थितप्रेमाणीन्द्रियाणि इति। अतस्तज्जनितं सुखमनित्यमिति ॥ ४९ ॥

अर्थ—परिणामोंके वशसे कोई इष्ट भी विषय अनिष्ट हो जाता है, और कोई अनिष्ट भी होकर कालान्तरमें पुनः इष्ट हो जाता है।

भावार्थ—बाँसुरी, गायन आदिकी ध्वनि पहले मीठी लगती है, बादको भूख अथवा प्याससे पीड़ित होनेपर वही मधुर ध्वनि कर्णकटु लगने लगती है। सारांश यह है कि इन्द्रियोंका प्रेम अस्थिर है, अतः उनसे होनेवाला सुख भी अनित्य है।

'तस्मात् प्रयोजनापेक्षाणि व्यापार्यन्ते जीवेन' इत्याह—

अतः जीव प्रयोजनके अनुसार इन्द्रियोंका व्यापार करता है, यह बतलाते हैं:—

कारणवशेन यद्यत् प्रयोजनं जायते यथा यत्र ।
तेन तथा तं विषयं शुभमशुभं वा प्रकल्पयति ॥ ५० ॥

टीका—रागाध्मातमानसो गीतध्वनिमाकर्णयिषुः श्रोत्रं व्यापारयति । एवमभीष्टरूपालोकयिषया चक्षुर्व्यापारयति । एवं शेषेन्द्रियविषयेष्वपि प्रयोजनवशाद् व्यापारयति घ्राणादीनि। तेन प्रयोजनेन तथा तथा उत्पन्नेन तं विषयं शब्दादिकमिष्टतयाऽनिष्टतया वा रागद्वेषवशात् परिकल्पयति।

अर्थ—कारणके वशसे जहाँ जैसा जो जो प्रयोजन होता है, उस प्रयोजनके अनुसार वैसा ही उस विषयको इष्ट अथवा अनिष्ट कल्पना कर लेता है।

---

१ एकः कश्चिदाग—मु०। २—माकर्णयिषुः म० मा०।

अनिष्ट होता वह सभीको अनिष्ट ही होना चाहिए। परन्तु लोकमें ऐसा नहीं देखा जाता । एक पदार्थमें भी दो मनुष्य अपने अपने प्रयोजनके अनुसार इष्ट और अनिष्टकी कल्पना किया करते हैं।

'इहलोकपरलोकयोश्च कर्मबन्धाद् ऋते न कश्चिदपि गुणः संभाव्यते रागिणो द्वेषिणो वा' इति दर्शयन्नाह—

अब 'रागी और द्वेषी जीवके इस लोक और परलोकमें कर्मबन्धके सिवाय अन्य किसी गुणकी संभावना नहीं की जा सकती,' यह कहते हैं:—

रागद्वेषोपहतस्य केवलं कर्मबन्ध एवास्य।
नान्यः स्वल्पोऽपि गुणोऽस्ति यः परत्रेह च श्रेयान् ॥ ५३ ॥

टीका—रागद्वेषाभ्यामुपहतमानसस्य विभाव्यते नापरः श्रेयान् गुणः परलोके कश्चिदिहलोके वा विद्यत इति ॥ ५३ ॥

अर्थ—राग और द्वेषसे युक्त जीवके केवल कर्मबन्ध ही होता है। इसके सिवाय कोई थोड़ा भी गुण ऐसा नहीं होता, जो इस लोक और परलोकमें कल्याणकारी हो।

भावार्थ—रागी और द्वेषी मनुष्य अपनी राग-द्वेषमयी परणतिके कारण निरन्तर कर्मबन्ध ही किया करता है। कर्मबन्धके कारण उसका संसार-त्रास हल्का नहीं हो पाता, और वह सदैव सांसारिक कष्टों का ही सामना किया करता है। इस राग-द्वेषपूर्ण परिणतिसे उसका तनिक भी कल्याण नहीं होता।

'कथं पुनः कर्मबन्धादन्यो गुणो नास्ति?' इति विभावयन्नाह—

कर्मबन्ध होनेके सिवाय अन्य गुण न होनेका कारण बतलाते हैं:—

यस्मिन्निन्द्रियविषये शुभमशुभं वा निवेशयति भावम्।
रक्तो वा द्विष्टो वा स बन्धहेतुर्भवति तस्य ॥ ५४ ॥

टीका—शब्दादिके विषये भावं-चित्तपरिणामं शुभमिष्टं रागयुतो निवेशयति। अशुभं वाऽनिष्टं भावं द्वेषयुतः स्थापयति। स स भावस्तस्यात्मनो ज्ञानावरणादिकर्मणोऽष्टविधस्य बन्धहेतुर्भवति। 'सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलान् आदत्ते स बन्धः' इति वचनात् ॥५४॥

अर्थ—जिस इन्द्रियके विषयमें इष्ट अथवा अनिष्ट भावको करता है, राग अथवा द्वेषसे युक्त होनेके कारण उसका वह भाव बन्धका ही हेतु होता है।

भावार्थ—तत्त्वार्थसूत्रमें कहा है कि—'जीव कषायसे युक्त होनेके कारण कर्मोंके योग्य पुद्गलोंको ग्रहण करता है, इसीको बन्ध कहते हैं।' अतः जब जीव किसी इन्द्रियके विषयमें राग अथवा द्वेष करता है तो उसके कर्मबन्धके सिवाय और क्या हो सकता है?

'कथं पुनरात्मप्रदेशेषु कर्मपुद्गला लगन्ति?' इत्याह—

आत्माके प्रदेशोंसे कर्मपुद्गल किस प्रकार चिपटते हैं। यह बतलाते हैं:—

स्नेहाभ्यक्तशरीरस्य रेणुना श्लिष्यते यथा गात्रम्।
रागद्वेषाक्लिन्नस्य कर्मबन्धो भवत्येवं ॥ ५५ ॥

टीका—तैलादिना स्नेहेनाभ्यक्तवपुषो यथा रजःकणाः श्लिष्यन्ति नातिसूक्ष्मस्थूलाः तथा रागद्वेषपरिणामस्नेहार्द्रस्य ज्ञानावरणादिवर्गणायोग्याः कर्मपुद्गलाः प्रदेशेषु आत्मनो लगन्तीत्यर्थः ॥ ५५ ॥

अर्थ—जिस प्रकार जिसके शरीरपर तेलकी मालिशकी गई है, उसके शरीरपर धूलिके कण आकर चिपट जाते हैं, वैसे ही राग और द्वेषसे भीगी हुई आत्माके कर्मबन्ध होता है।

भावार्थ—आत्माके योगपरिणामसे कर्म आते हैं, यह पहले बतला आये हैं। और आये हुए कर्म जीवके राग और द्वेषरूप भावोंका निमित्त पाकर आत्मासे उसी तरह चिपट जाते हैं, जैसे हवासे उड़कर आनेवाले धूल-कण चिकनाईका निमित्त पाकर शरीरसे चिपट जाते हैं।

साम्प्रतं रागद्वेषप्रधानान् कर्मबन्धहेतून् समस्तानेव उपसंहरन्नाह—

अब राग-द्वेष प्रमुख कर्मबन्धके सभी कारणोंको बतलाते हुए उपसंहार करते हैं:—

एवं रागद्वेषौ मोहो मिथ्यात्वमविरतिश्चैव।
एभिः प्रमादयोगानुगैः समादीयते कर्म ॥ ५६ ॥

टीका—उक्तलक्षणौ रागद्वेषौ। मोहः-मोहनीयम्। मिथ्यात्वं तत्त्वार्थाश्रद्धानलक्षणम्। अविरतिः-अनिवृत्तिः कर्माश्रवेभ्यः। एभिः रागादिभिर्विकथादिप्रमादपञ्चकसहितैर्मनोवाक्काययोगानुगतैः कर्म आदीयते-गृह्यते, 'स्वप्रदेशेषु आत्मना विधीयते' इत्यर्थः। ततश्च पर्यायपरम्परया रागादीनां कर्मबन्धहेतुत्वं कर्मणोऽपि रागादिपरिणामः ॥ ५६ ॥

अर्थ—इस प्रकार प्रमाद और योगसे सहित राग, द्वेष, मोह, मिथ्यात्व और अविरतिसे यह जीव कर्मोंको ग्रहण करता है।

भावार्थ—राग द्वेषका लक्षण पहले कह आये हैं। विकथादि पाँच प्रमादों और मनोयोग तथा काययोगसे सहित रागादिकके द्वारा जीव कर्मबन्ध करता है। रागादिक और कर्मबन्धका परस्परमें निमित्तनैमित्तिक सम्बन्ध है। रागादिकसे कर्मबन्ध होता है और कर्मबन्धसे रागादिक परिणाम होते हैं।

अतः—

कर्ममयः संसारः संसारनिमित्तकं पुनर्दुःखम्।
तस्माद्रागद्वेषादयस्तु भवसंततेर्मूलम् ॥ ५७ ॥

टीका—कर्मविकारो नारकत्वं तिर्यक्त्वं मनुष्यत्वं देवत्वम्। नारकादिरूपसंसारकारणं दुःखं शारीरं मानसं वा। न हि अनारको नरके दुःखमनुभवति एवमितरत्रापि। तस्मात् रागद्वेषादयः पञ्चकर्मबन्धहेतवो नारकादिभवसन्ततेः भवपरम्परायाः मूलं बीजं प्रतिष्ठेति ॥५७॥

अर्थ—यह संसार कर्ममय है और संसारके निमित्तसे दुःख होता है। इसलिए राग-द्वेष वगैरह संसारकी परम्पराके मूल हैं।

भावार्थ—यह संसार चार गतिरूप है और चारों गतियाँ कर्मोंके उदयसे ही होती हैं। गतियोंमें जानेसे शारीरिक और मानसिक दुःख होता है। उससे राग-द्वेष होते हैं। राग-द्वेष आदिसे पुनः गति होती है। गतिमें सुख-दुःख होता है, उससे राग-द्वेष होते हैं। इस प्रकार राग-द्वेष वगैरह संसारकी जड़ हैं।

'कः पुनरस्य रागद्वेषादिजनितस्य संसारचक्रस्य भङ्गोपायः?' इत्याह—

अब राग-द्वेपसे उत्पन्न हुए संसार-चक्रके तोड़नेका उपाय बतलाते हैं :—

एतद्दोषमहासंचयजालं शक्यमप्रमत्तेन।
प्रशमस्थितेन घनमप्युद्वेष्टयितुं निरवशेषम् ॥ ५८ ॥

टीका—दोषाणां रागद्वेषादीनां तज्जनितकर्मणाञ्च महासञ्चयः—उपचयः। दोषमहासञ्चय एव जालम्। जालमिव जालम्। यथा मीनमकरादीनामादायकं जालं जीवनापहारि, तद्वदेतदपि जन्मान्तरेषु सत्वानामनेकदुःखसंकटावतारणे प्रत्यलं जीवितापहारि चेति। तदेतच्छक्यमप्रमत्तेन उद्वेष्टयितुं-विनाशयितुम्। प्रमादः कषायनिद्रादिः, तद्रहितेन, प्रशमस्थितेनेति, प्रशमार्पितमनसा प्रशमैकरसेन, घनं गहनम्, एतत् जालं निरवशेषम्-आमूलादुद्धर्तुमिति ॥ ५८ ॥

अर्थ—जो अप्रमादी है और वैराग्यमें स्थित है, वह इस रागादि दोषोंके महान् संचयरूप घने जालको पूरी तरहसे नष्ट करनेमें समर्थ है।

भावार्थ—जिस प्रकार मगर मच्छको पकड़नेके लिए बनाया हुआ जाल जीव-घातक होता है, वैसे ही राग-द्वेष वगैरह तथा उनसे संचित कर्मोंका यह जाल भी जन्मान्तरोंमें प्राणियोंको अनेक दुःखपूर्ण संकटोंमें डालनेवाला है। जो कषाय-निद्रा वगैरह प्रमादोंसे रहित है तथा जिसका मन वैराग्यके रसमें डूबा हुआ है, वही इस घने कर्म-जालको छिन्न-भिन्न कर सकता है।

अस्य तु मूलनिबन्धं ज्ञात्वा तच्छेदनोद्यमपरस्य।
दर्शनचारित्रतपःस्वाध्यायध्यानयुक्तस्य ॥ ५९ ॥
प्राणवधानृतभाषणपरधनमैथुनममत्वविरतस्य।
नवकोट्युद्गमशुद्धोञ्छमात्रयात्राधिकारस्य ॥ ६० ॥
जिनभाषितार्थसद्भावभाविनो विदितलोकतत्त्वस्य।
अष्टादशशीलाङ्गसहस्रधारणे कृतप्रतिज्ञस्य ॥ ६१ ॥

न कंचन सत्त्वमपघ्नन्ति । उद्गममेव उद्गमात्रम्, तेन तादृशा यात्रायामधिकारो यस्य स उद्गमात्रयात्राधिकारः । यात्रा तु अहोरात्राभ्यन्तरं विहितक्रियानुष्ठानम्, तत्राधिकृतस्य 'नियुक्तस्य' इत्यर्थः ॥ ६० ॥

जिनभाषितोऽर्थं उत्पादव्ययध्रौव्ययुक्तो जीवादिः सप्तविधः । स गणधरैः सूत्रेण सूचितः । तस्यार्थस्य सद्भावं भावयति तच्छीलस्य । एवमेनन-'तद्यथा भगवद्भिरुक्तं गणधरैर्दृब्धं तथैवायम्, नान्यथा' इति जिनभाषितार्थसद्भावभाविनः । विदितम्-अवगतं लोकतत्त्वं येनासौ विदितलोकतत्त्वः । जीवाजीवाधारक्षेत्रं लोकः, तस्य तत्त्वं परमार्थः—नास्त्यत्र वालाग्रप्रमाणोऽपि प्रदेशो यत्र त्रसत्वेन स्थावरत्वेन वा नोत्पन्नो मृतो वा यथासंभवम् । अथवा अधोमुखमल्लकाकृतिः, मध्ये स्थालाकारः उपरि मल्लकसमुद्गाकारो नारकतिर्यग्मानुषदेवाधिवासो जन्मजरामरणोपद्रवबहुलः । अष्टादशाङ्गशीलाङ्गसहस्रधारणे कृतप्रतिज्ञस्य-अष्टादशशीलाङ्गसहस्राणि उपरि वक्ष्यमाणानि 'धर्माद्भूम्यादीन्द्रिय' इत्यस्यां कारिकायाम् । 'अष्टादशशीलाङ्गसहस्राणि धारयितव्यानि यावज्जीवं मया' इति आरूढप्रतिज्ञस्य ॥ ६१ ॥

विशुद्धिप्रकर्षयोगादपूर्वः परिणाम उच्यते मनसः, तमनुप्राप्तस्य । शुभभावनाध्यवसितस्य । अध्यवसितमध्यवसायः । शुभभावनाः-पञ्चानां महाव्रतानां पञ्चविंशतिर्भावनाः परिपठिताः, अनित्यत्वादिका वा वक्ष्यमाणा द्वादश भावनाः, तदध्यवसायस्य । समये-सिद्धान्ते । अन्योन्यम्-परस्परम् । 'द्वयोर्विशेषयोरयमुत्तरः प्रधानम्, अमुष्मादप्ययं विशेषः प्रधानतरः' इत्यादिविशेषमतिशयं पश्यतो भावनामयेन ज्ञानेनेति ॥ ६२ ॥

वैराग्यपथप्रस्थितस्य । सम्यग्दर्शनादित्रयं वैराग्यमार्गः । संसारवासचकितस्य 'त्रस्तस्य' इत्यर्थः । स्वहितम्-ऐकान्तिकादिगुणयुक्तं मुक्तिसुखम्, तदेवार्थः । स्वहितार्थे आभिमुख्येन रता यद्वा प्रीतिर्मतिर्यस्य तस्यैवंप्रकारस्य शुभेयमुत्पद्यते चिन्ता । 'इयम्' इति वक्ष्यमाणा, निर्जराहेतुत्वात् शुभा, जायते चिन्ता । अत्र कुलकपरिसमाप्तिः ॥ ६३ ॥

अर्थ—इस दोष-जालके मूल कारणको जानकर जो उसको छेदनेमें युक्त है, सम्यग्दर्शन, सम्यक्चारित्र, तप, स्वाध्याय और ध्यानसे युक्त है, हिंसा, झूठ, चोरी, मैथुन और ममत्वसे विरक्त है, नवकोटि और उद्गमसे शुद्ध अल्प आहार मात्रसे अपना निर्वाह करता है, जिनभगवान्के द्वारा कहे गये जीवादि तत्त्वोंके अस्तित्वको मानता है, लोकके स्वरूपको जानता है, शीलके अट्ठारह हजार भेदोंका पालन करनेकी प्रतिज्ञा ले चुका है, अपूर्व परिणामवाला है, शुभ भावनाओंमें निश्चल है, आगमके विषयमें परस्परमें जो उत्तरोत्तर विशेषता है, उसे जानता है, वैराग्यके मार्गमें स्थित है, संसारके निवाससे भयभीत है, और अपने हित-मोक्षमें लवलीन है, उसीको आगे कही गई शुभ चिन्ता उत्पन्न होती है ।

भावार्थ—पहली कारिकामें जो दोषोंका जाल बतलाया गया है, उसके मूल कारणको जानकर जो उसके छेदनेमें उत्साह करता है कि 'मुझे यह महाजाल छिन्न-भिन्न करना चाहिए' तथा जिसमें ऊपर कही अन्य बातें पाई जाती हैं, उसको ही आगे कही गई शुभ चिन्ता उत्पन्न होती है ।

१ त्रसेतरि०-मु० ।　२ अष्टादशशीलाङ्गसहस्रधारण--मु० ।　३ शुद्धय-मु० ।
४ मनस्त मु० ।　५ आनित्यत्वादिका वक्ष्य-मु० ।

तत्त्वार्थका श्रद्धान करनेको सम्यग्दर्शन कहते हैं। सामायिक वगैरहको चारित्र कहते हैं। तपके अनशन वगैरह बारह भेद हैं। स्वाध्यायके वाचना पृच्छना वगैरह पाँच भेद हैं। किसी वस्तुमें मनके एकाग्र करनेको ध्यान कहते हैं। धर्म्य और शुक्ल शुभ ध्यान हैं। धर्मविषयक एकाग्र चिन्तनको धर्म्यध्यान कहते हैं। उसके चार भेद हैं:—आज्ञाविचय, अपायविचय, विपाकविचय और संस्थानविचय। अनन्तविशुद्ध परिणामी जीवके शुक्लध्यान होता है। उसके चार भेद हैं:—पृथक्त्ववितर्क, एकत्ववितर्क, सूक्ष्मक्रियाप्रतिपाति और व्युपरतक्रियानिवृत्ति।

प्रमादके योगसे किसीके घात करनेको हिंसा कहते है। असत्यवचन अनेक प्रकारका होता है:—१ सत्को असत् कहना, जैसे, आत्मा नहीं है। २ असत्को सत् कहना, जैसे–आत्मा व्यापक है। ३ विपरीत वचन, जैसे, गायको घोड़ा कहना। ४ कडुवे वचन बोलना। ५ सावद्य वचन—इस मार्गमें हिरनोंका झुण्ड गया है, ऐसा शिकारीको बतला देना। हिंसाके कारण होनेसे कटुक सावद्य वचन भी असत्य ही कहे जाते हैं। चुरानेकी बुद्धिसे परके धनको हरना चोरी है। स्त्रीवेद, पुंवेद और नपुंसकवेदके उदयसे रमण करनेको मैथुन कहते हैं। 'यह मेरी वस्तु है,' 'मैं इसका स्वामी हूँ' इस तरहके ममत्वको परिग्रह कहते हैं; क्योंकि तत्त्वार्थसूत्रमें ममत्वको ही परिग्रह कहा है। परिग्रह अथवा चोरीके लक्षणमें रात्रिभोजनका अन्तर्भाव कर लिया गया है। क्योंकि रात्रिभोजन अति लालसाका सूचक है। इस प्रकार मूलगुणोंको कहकर उत्तरगुणोंको कहते हैं:—

न स्वयं मारता है, न दूसरेसे मरवाता है और न दूसरेको मारता हुआ देखकर उसकी अनुमोदना करता है। ये तीन कोटियाँ हैं। तथा, न स्वयं पकाता है, न दूसरेसे पकवाता है और न किसीको पकाता हुआ देखकर उसकी अनुमोदना करता है। ये भी तीन कोटियाँ हैं। तथा, न स्वयं खरीदता है, न दूसरेसे खरीदवाता है और न दूसरेको खरीदते हुए देखकर उसकी अनुमोदना करता है। ये भी तीन कोटियाँ हैं। इस प्रकार मिलकर ये नौ कोटियाँ होती हैं। ये दो प्रकारकी होती हैं:—एक अविशुद्ध कोटि और दूसरी विशुद्ध कोटि। आदिकी छह कोटियाँ अविशुद्ध कोटियाँ हैं और अन्तकी तीन विशुद्ध कोटियाँ हैं।

आहारके खोजनेको उद्गम कहते हैं। जो आहार उससे शुद्ध होता है वह उद्गमशुद्ध है। काटे गये खेतमें पड़े हुए धान्यके कणोंके चुगनेको उञ्छ कहते हैं। जिस प्रकार उञ्छ किसी किसान वगैरहको कष्टदायक नहीं होता, वैसे ही जो आहार न स्वयं बनवाया गया है, न गृहीताके संकल्पसे बनाया गया है और न उसकी उसमें अनुमति ही है, उस आहारको लेनेसे किसी प्राणीके घातका भय नहीं रहता। इस प्रकारके आहारसे जीवन-यात्रा करनेमें जिसका अधिकार है, अर्थात् जिनभगवान्ने उत्पाद, व्यय और ध्रौव्यसे युक्त जीवादि सात पदार्थोंका कथन किया है। और गणधरदेवने उन पदार्थोंको द्वादशांगरूपमें संकलित किया है। जैसा भगवान्ने कहा है और गणधरोंने अवधारण किया है—'जीवादि सात तत्त्व वैसे ही हैं, अन्यथा नहीं हैं' इस प्रकारसे जो उनका सद्भाव मानता है।

जहाँपर जीव और अजीव द्रव्य रहते हैं, उसे लोक कहते हैं। उसके तत्त्वको अर्थात् इस लोकमें बालकी नोकके बराबर भी ऐसा कोई स्थान नहीं है, जहाँ त्रस और स्थावररूपसे यह जीव

उत्पन्न हुआ और मरा न हो। अथवा नीचा मुख किये हुए मल्लकके आकार अधोलोक है। थालीके आकार मध्यलोक है। ऊपर मुख किये हुए मल्लकके आकार ऊर्ध्वलोक है। इस लोकमें नारक, तिर्यञ्च मनुष्य और देव बसते हैं, तथा जन्म, मरण, बुढ़ापा आदि उपद्रवोंसे यह व्याप्त है। लोकके इस तत्त्वको जो जानता है। शीलके अट्ठारह हजार भेदोंको आगे कहेंगे। जिसने उनके धारण करनेकी प्रतिज्ञा की है। शुद्धिका प्रकर्ष होनेसे जिसके परिणाम अपूर्व हैं। पाँच महाव्रतोंकी पचीस भावनाएँ बतलाई गई हैं। अथवा आगे अनित्यत्व आदि बारह भावनाओंका कथन करेंगे। उन भावनाओंका जो चिन्तन करता रहता है। तथा आगममें वर्णित अमुक बात प्रधान है और अमुक बात उससे भी प्रधान है, इत्यादि विशेषको जो जानता है। सम्यग्दर्शन, सम्यग्ज्ञान, और सम्यग्चारित्ररूप वैराग्यके मार्गमें स्थित है। संसारमें रहनेसे डरता है। अपने हित—मोक्ष-सुखमें ही जो मुख्यतासे प्रीति करता है, उसके ही आगे कही जानेवाली शुभ चिन्ता होती है। निर्जराका कारण होनेसे इस चिन्ताको शुभ कहा है।

तामेव चिन्तां स्पष्टयन्नाह—

उसी चिन्ताको स्पष्ट करते हैं :—

भवकोटीभिरसुलभं मानुष्यं प्राप्य कः प्रमादो मे।
न च गतमायुर्भूयः प्रत्येत्यपि देवराजस्य ॥ ६४ ॥

टीका—कोटिशब्द संख्यावाची। स च अनन्तसंख्यायाः सूचकः। भवा नारकतिर्यग्देवाख्याः, तेषां वह्वीभिः कोटिभिः अनन्ताभिरतीताभिरपि न सुलभं दुर्लभमेव, मनुष्यस्य भावो मानुष्यम्, 'मनुष्यजन्म' इत्यर्थः। तदेवंविधमतिदुःप्रापं प्राप्य कोऽयं मम प्रमादोऽवबुध्यमानस्यैव-मननुष्ठानम्। प्रमादो ज्ञानादिषु मुक्तिसाधनेषु। कदाचिदिदमाशङ्केत 'मम मनुष्यत्वमेवास्तु सर्वदा सुन्दरमक्षीणम्' इति। तच्च न, यतः 'न च गतमायुः' इत्यादि। प्रतिक्षणमुदयप्राप्तं वेद्यमानमनुभूयते, अनुभवाच्च परिगलति। न च क्षीणं पुनरावर्तते, सौधर्माधिपतेरपि शक्रस्य न प्रत्यागच्छति किं पुनर्नरस्येति ॥ ६४ ॥

अर्थ—करोड़ों भवोंमें दुर्लभ मनुष्य पर्यायको प्राप्त करके मुझे यह प्रमाद क्यों! देवराज इन्द्रको भी बीती हुई आयु पुनः लौटकर नहीं आती।

भावार्थ—यहाँ कोटि शब्द संख्याका वाचक है। और वह अनन्तका सूचक है। अर्थात् अनन्त भव बीतनेपर भी मनुष्यका भव मिलना बड़ा ही दुर्लभ है। इस प्रकारके दुर्लभ मनुष्य-जन्मको पाकर मोक्षके साधन ज्ञान वगैरहमें मुझे प्रमाद नहीं करना चाहिए। शायद कोई यह सोचे कि मनुष्य-पर्याय सर्वदा बनी रहेगी; किन्तु ऐसा सोचना ठीक नहीं है; क्योंकि प्रतिसमय उदयमें आनेवाली आयु अपना फल देकर क्षीण होती जाती है, और क्षीण हुई आयु तो सौधर्मस्वर्गके इन्द्रकी भी लौटकर नहीं आती—मनुष्य की तो बात ही क्या है!

१ कोटिशब्दः मु०। २ नारकति—मु०। ३—मनुष्ठानम् मु० ४ वेद्यमानमनुभवाच्च परिगलति मु०।

न च निर्द्वन्द्वं मनुष्यजन्म, यस्मात्—
और मनुष्य-जन्म निर्द्वन्द्व भी नहीं है; क्योंकि—

आरोग्यायुर्बलसमुदयाश्चला वीर्यमनियतं धर्मे ।
तल्लब्ध्वा हितकार्ये मयोद्यमः सर्वथा कार्यः ॥ ६५ ॥

टीका—नीरुजत्वमारोग्यम् तच्चलम् 'अनित्यम्' इत्यर्थः। नीरुजोऽपि रोगान् लभन्ते सनत्कुमारादिवत्। आयुरपि शुक्रबिन्दोराधा नात् प्रभृति गर्भकौमार्ययौवनस्थविरावस्थासु प्रतिक्षणं क्षययुक्तम्, अध्यवसानादिभिश्च प्रकारैः सप्तभिर्भेदमुपैति। बलं प्राणः। उत्साहो वीर्यान्तरायक्षयोपशमजः सामर्थ्यविशेषः। स च बलवतो दृष्टः, पुनस्तस्यैव दुर्बलावस्थायां न संभवतीति अनित्य एव। समुदया इति धनधान्यादिनिचयाः क्षणभङ्गुराः। वीर्यञ्च उत्साहः। परीषहजयादौ तदनियतं विनश्वरम्। धर्मे क्षान्त्यादिके तल्लब्ध्वा-प्राप्य, हितकार्ये—हितं ज्ञानादि, तदेव कार्यम्, तत्र। मया उत्साहः सर्वथा सर्वप्रकारमविश्रान्त्या कार्य इति ॥ ६५ ॥

अर्थ—आरोग्य, आयु, बल और लक्ष्मी ये सभी चञ्चल हैं। धर्ममें उत्साहकी स्थिरता नहीं है। इन्हें प्राप्त करके मुझे सब प्रकारसे हितकारी कार्यमें प्रयत्न करना चाहिए।

भावार्थ—नीरोगता सर्वदा नहीं रहती। नीरोग मनुष्य भी सनत्कुमार चक्रवर्ती की तरह रोगी हो जाते हैं। आयु भी गर्भ, बाल, जवानी और बुढ़ापेमें प्रतिक्षण नष्ट होती रहती है। वीर्यान्तरायके क्षयोपशमसे होनेवाला बल भी बलवान्में ही देखा जाता है। वही जब दुर्बल हो जाता है, तब बल नहीं रहता। अतः बल भी अनित्य है। धन-धान्य आदि लक्ष्मी भी क्षणभङ्गुर है। परीषहके जीतने वगैरहमें मनुष्यका जो उत्साह रहता है, वह भी सर्वदा नहीं रहता। अतः इन्हें प्राप्त करके ज्ञानाभ्यास वगैरह कार्योंमें मुझे सब प्रकारसे प्रयत्न करना चाहिए।

'किं पुनस्तद्धितम्'? इत्याह—
हित क्या है? यह बतलाते हैं :—

शास्त्रागमादृते न हितमस्ति न च शास्त्रमस्ति विनयमृते ।
तस्माच्छास्त्रागमलिप्सुना विनीतेन भवितव्यम् ॥ ६६ ॥

टीका—शास्त्रलक्षणमुपरिष्टाद् वक्ष्यते 'शान्ति' इत्यादौ। शासनात्-उपदेशदानात् त्राणाच्च शास्त्रम्। भगवतो मुखपङ्कजादर्थनिर्गमः, गणधरास्यकमलेभ्यः सूत्रनिर्गमः। उभयमेतद् शास्त्रशब्दवाच्यम्। शास्त्रमेवागमः शास्त्रागमः, गणधरप्रभृत्याचार्यपरम्परया आगत इति आगमः। शास्त्रागमादृते शास्त्रागमादिना नापरं हितमस्ति। न च शास्त्रलाभो भवत्यविनीतस्य, आचार्यादिशुश्रूषया विनीतेन शास्त्रं प्राप्यते। तस्माच्छास्त्रागमलाभमिच्छता शास्त्रागमलिप्सुना विनीतेन भवितव्यमिति ॥ ६६ ॥

---

१ शुक्रबिन्दुरा—मु०। २ यवमुक्तमध्य—मु०। ३ समुदायाश्च इति धन—मु०। ४ तत्र मु० प्रतौ नास्ति। ५—स्यविनयस्य मु०

अर्थ—शास्त्रके ज्ञानके बिना हित नहीं हो सकता, और विनयके बिना शास्त्रका ज्ञान नहीं हो सकता। इसलिए जो शास्त्रके ज्ञानका इच्छुक हो उसे विनयी होना चाहिए।

भावार्थ—शास्त्रका लक्षण आगे कहेंगे। जो सन्मार्गका उपदेश देता है और दुर्गतिसे बचाता है वह शास्त्र है। भगवान्के मुखकमलसे निकला हुआ अर्थ और गणधरदेवके मुखकमलसे निकले हुए सूत्र—ये दोनों ही शास्त्र शब्दसे कहे जाते हैं। शास्त्रको ही आगम कहते हैं; क्योंकि गणधर वगैरह आचार्य-परम्परासे चला आता है। शास्त्रज्ञानके बिना कोई हित नहीं हो सकता, और शास्त्रका ज्ञान विनयके बिना नहीं हो सकता। आचार्य आदि की सेवासे ही विनयीको शास्त्रकी प्राप्ति होती है। इसलिए जो शास्त्रज्ञानका लाभ चाहता है, उसे विनयी होना चाहिए।

'सत्स्वपि' अनेकेषु गुणेषु पुंसां विनय एव भूषणं परम्, 'नान्वयरूपसौभाग्यादीनि' इति दर्शयन्नाह—

अनेक गुणोंके होनेपर भी पुरुषोंका विनय ही प्रधान भूषण है। वंश, रूप, सौभाग्य वगैरह भूषण नहीं है, यही बतलाते हैं:—

कुलरूपवचनयौवनधनमित्रैश्वर्यसम्पदपि पुंसाम् ।
विनयप्रशमविहीना न शोभते निर्जलेव नदी ॥ ६७ ॥

टीका—विशिष्टान्वयः कुलं क्षत्रियादि। रूपं शरीरावयवानां लक्षणान्वितः सन्निवेशविशेषः। वचनं मधुरं प्रियमाविन्यवाग्मित्वादि। यौवनं यूनो भावः। युवात्र मन्दरूपोऽपि शोभते प्रायो यौवनगुणादेव। धनं हिरण्यसुवर्णमणिमुक्ताप्रवालादि गोमहिष्यजाविकादि वा। मित्रं स्नेहवान् पुरुषो विश्रम्भस्थानम्। ऐश्वर्यमीश्वरत्व-भावः प्रभुत्वम्। सम्पच्छब्दः प्रत्येकमभिसम्बन्धनीयः—कुलसम्पद्, रूपसम्पद् इत्यादि। सम्पत् प्रकर्षविशेषः। एषाऽपि कुलादिसम्पद् न भ्राजते पुरुषाणां विनयप्रशमविहीनत्वात्। विनयः अभ्युत्थानासनप्रदानाञ्जलिप्रग्रहादिरूपचारात्मकः। प्रशमो माध्यस्थ्यमौदासीन्यम्। आभ्यां रहिता न शोभते निर्जलेव नदी। यथा सलिलशून्या हंससारसक्रौञ्चचक्रवाककुलैरासेव्यमाना न भ्राजते अतिदीर्घविगतसलिलसम्पर्कावष्टब्धकमेव भवतीति। एवं विनयरहितः पुमानिति॥ ६७॥

अर्थ—[illegible] विनय और [illegible]

भावार्थ—[illegible] कहते

[illegible]

अहर्निशं पादसेवा, सम्यक् क्रियानुष्ठानम्, नृजलमल्लकढौकनम्, दण्डकग्रहणम्, तत्प्रवृत्तौ गमनं निर्विचारम्, तदभिहितानुष्ठानम्, इत्याद्याराधनम्—अभिमुखीकरणम्। तत्परेणेति। तदुपयुक्तेन भवितव्यमिति ॥ ६९ ॥

अर्थ—यतः शास्त्रके सभी आरंभ गुरुके स्वाधीन हैं, अतः जो अपना हित चाहता है, उसे गुरुकी सेवामें तत्पर होना चाहिए।

भावार्थ—जो शास्त्रके अर्थका कथन करते हैं, उन्हें गुरु कहते हैं। सूत्रोंके पढ़ने और उनके अर्थको सुननेमें प्रवृत्त होना, काल-ग्रहण, स्वाध्याय आदि शास्त्रके आरम्भ कहे जाते हैं। ये सभी आरंभ गुरुकी कृपापर निर्भर हैं। अतः रात-दिन गुरुकी पाद-सेवाके लिए तैयार रहना चाहिए। जैसा वे कहें, वैसा करना चाहिए। उनके उपकरण वगैरह रखने उठानेमें तत्पर रहना चाहिए।

गुरौ चोपदिशति 'पुण्यवानहमिति, य एवमनुग्राह्यो गुरूणाम्, बहुमन्तव्य एव न विकार्यः'

अब यह बतलाते हैं कि जब गुरु उपदेश देते हों तो उस समय ऐसा विचारे कि मैं बड़ा पुण्यवान् हूँ जो मुझपर गुरुका इतना अनुग्रह है।—ऐसा विचारना चाहिए

धन्यस्योपरि निपतत्यहितसमाचरणधर्मनिर्वापी।
गुरुवदनमलयनिसृतो वचनसरसचन्दनस्पर्शः ॥ ७० ॥

टीका—धनं ज्ञानादि तल्लब्धा धन्यः पुन्यवान्। तस्योपरि निपतति 'वचनसरस-चन्दनस्पर्शः' इति वक्ष्यति कीदृगसौवचनसरस चन्दनस्पर्शः? अहितसमाचरणधर्म-निर्वापी। अहितम्-उत्क्रमम्, समाचरणम्-क्रियानुष्ठानम्, अहितसमाचरणमेव धर्मः—ताप-विशेषः, तं निर्वापयति—अपनयति निरस्यति तच्छीलश्चेति। 'गुरुवदनमलयनिसृतः' इति। गुरोः—आचार्यादेर्वदनं मुखम्, तदेव मलयपर्वतः, तस्मान्निसृतो निर्गतः। वचनमेव सरस-चन्दनं स्नेहोपबृंहितहितोपदेशगर्भम्, तदेव वदनम्, तस्य स्पर्शः शीतो घर्मापनयनसमर्थः। मलये तु सरसं चन्दनमार्द्रमभिनवच्छिन्नम्, तस्य स्पर्शो घर्मापहारी भवति सुतराम्। अथवा रसश्चन्दनस्पर्शः। रसो द्रवता 'चन्दनपङ्कः सपानीयः' इत्यर्थः ॥ ७० ॥

अर्थ—शास्त्र विरुद्ध आचरणरूपी तापको दूर करनेवाला गुरु महाराजके मुखरूप मलय पर्वतसे निकलनेवाले वचनरूपी सरस चन्दनका स्पर्श किसी ही पुण्यवान्को प्राप्त होता है।

भावार्थ—जिस प्रकार सरस चन्दनको लगानेसे शरीरकी दाह मिट जाती है, वैसे ही गुरु महाराजके स्नेह युक्त हितकारी वचनोंको सुनकर भव्यजनोंका अहितरूपी संताप मिट जाता है। गुरु महाराजका उपदेश सुनकर वे शास्त्र विरुद्ध आचरणको छोड़कर शास्त्रविहित आचरण करने लगते हैं। [illegible] यह [illegible] किसी ही पुण्यशाली [illegible] प्राप्त होती है। [illegible]श्चन्दनस्पर्श' ऐसा भी [illegible] है।

'एवं च हितोपदेशेनानुगृह्णतः शिष्यान् आचार्यस्य कः प्रत्युपकारः शिष्येण विधेयः' इत्याह-

इस प्रकार हितकारक उपदेशके द्वारा शिष्योंका उपकार करनेवाले आचार्यका शिष्यको जो प्रत्युपकार करना चाहिए, वह बतलाते हैं :—

दुष्प्रतिकारौ मातापितरौ स्वामी गुरुश्च लोकेऽस्मिन् ।
तत्र गुरुरिहामुत्र च सुदुष्करतरप्रतीकारः ॥ ७१ ॥

टीका—दुःखप्राप्यः प्रतीकारो दुष्कर इति वा दुष्प्रतीकारः । मातापितरौ तावद् दुष्प्रतीकारौ । माता तु जातमात्रस्यैवाभ्यङ्गस्नानस्तनक्षीरदानमूत्राशुचिक्षालनादिनोपकारेण वृद्धिमुपनयति, कल्पवार्ताद्याहारप्रदानेनोपकारवती, अदृष्टपूर्वस्या कृतोपकारस्य चाऽपत्यस्य दुष्प्रतीकारा। नहि तस्याः प्रत्युपकारः शक्यते कर्तुम्। पिताऽपि हितोपदेशदानेन शिक्षाग्राहणेन भक्तपरिधानप्रावरणादिनोपग्रहेण अनुगृह्णानो दुष्प्रतीकारः । स्वामी राजादिर्भृत्यानां जलदानाकरादिना कृत्वा भवन्युपकारकः। भृत्यास्तु न तथा प्रत्युपकारसमर्थाः। प्राणव्ययमहार्घा यद्यपि श्रियमानयन्ति स्वामिनो भृत्यास्तथापि पूर्वमकृतोपकाराणामेव भृत्यानामुपकारकः स्वामी, भृत्यास्तु कृतोपकाराः प्रत्युपकुर्वन्ति। गुरुः—आचार्यादिः। स च दुष्प्रतिकारः सन्मार्गोपदेशदायित्वात्, शास्त्रार्थप्रदानात्, संसारसागरोत्तारणहेतुत्वात्। इहामुत्र च—इहलोके सुदुर्लभतरः प्रतीकारो यस्य गुरोः परत्र सु दुर्लभतरः प्रतीकार इति ॥ ७१ ॥

अर्थ—इस लोकमें माता पिता स्वामी और गुरुका प्रत्युपकार करना बड़ा कठिन है। उसमें गुरुका प्रत्युपकार तो इस लोकमें भी अत्यन्त दुष्कर है, और परलोकमें भी अत्यन्त कठिन है।

भावार्थ—माता-पिताका प्रत्युपकार बड़ा दुष्कर है। माता तो बच्चेके जन्म लेते ही तेलकी मालिश करना, दूध पिलाना, मूत्र वगैरह गन्दगीको धोना आदि उपकारके द्वारा उसका पालन-पोषण करती है। जिस बच्चेको पहले उसने कभी देखा भी नहीं था और जिसने उसका कोई उपकार भी नहीं किया है, उसे वह दूध पिलाकर और आरोग्यवर्धक आहार देकर उसका उपकार करती है। अतः माताके उपकारका बदला चुकाना बड़ा कठिन है। पिता भी हितकारक उपदेश देता है। पढ़ाता-लिखाता है, भोजन-वस्त्र वगैरहसे लालन-पालन करता है। अतः उसके उपकारका बदला चुकाना भी कठिन है। स्वामी राजा वगैरह अन्न-जल देकर सेवकोंका उपकार करते हैं। सेवक उस उपकारका बदला नहीं चुका सकता। यद्यपि सेवक अपने प्राण देकर स्वामीकी लक्ष्मीको बढ़ाता है, तथापि स्वामी पहले-पहल कोई उपकार किये बिना ही सेवकोंका उपकार करते हैं, किन्तु सेवक स्वामीका उपकार पाकर ही उसका उपकार करते हैं। अतः उनके उपकारका बदला चुकाना भी कठिन है। किन्तु गुरु तो सन्मार्गका उपदेश देते हैं, शास्त्रोंका अर्थ बतलाते हैं और संसार-समुद्रसे पार लगाते हैं। अतः उनके उपकारका बदला चुकाना तो न इस जन्ममें ही शक्य है और न अगले जन्म में ही शक्य है।

---

१ कल्प (ल्य) वा-मु०। २—मेव भृत्यानामिति नास्ति—प०। ३ कृतोपकारकः-मु०।

सम्प्रति विनयस्य पारम्पर्येण पर्यन्तवर्ति मोक्षाख्यं फलं दर्शयन्नाह—

अब यह बतलाते हैं कि परम्परासे विनयका फल मोक्ष है :—

विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञानम् ।
ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोधः ॥ ७२ ॥

टीका—विनयस्य फलं शुश्रूषा—श्रोतुमिच्छा। यदाचार्य उपदिशति तत् सम्यक् शुश्रूषते, श्रुत्वा च अनुतिष्ठति। गुरोः सकाशादाकर्ण्य किं फलमिहावाप्यते? अत आह—गुरुशुश्रूषायाः फलं श्रुतज्ञानम्—'आगमज्ञानलाभः' इत्यर्थः। ज्ञानस्य किं फलम्? विरतिः—आस्रवद्वारेभ्यो निवृत्तिः। विरतेः फलमाश्रवद्वारस्थगनम्। विरतौ सत्यामाश्रवद्वाराणि स्थगितानि भवन्ति। ततश्चाश्रवद्वारस्थगनात् संवरो जायते। फलभूतः संवृतात्मा भवति, अपूर्वकर्मप्रवेश निरोधः॥ ७२ ॥

अर्थ—विनयका फल सुननेकी इच्छा है। गुरुके सुननेका फल श्रुतज्ञानकी प्राप्ति है। ज्ञानका फल विरति है, और विरतिका फल आस्रवका रुकना—संवर है।

भावार्थ—आचार्य जो उपदेश देते हैं, उसे भले प्रकार सुनता है और सुनकर उसका पालन करता है। यह विनयका फल है। गुरुके मुखसे शास्त्रश्रवण करनेसे आगमोंका ज्ञान होता है। यह गुरुसे सुननेका फल है। शास्त्रज्ञानके होनेपर उन कार्योंका करना छोड़ देता है, जिनके करनेसे कर्मोंका आस्रव होता है। यह ज्ञानका फल है। उन कार्योंसे विरत होनेपर आस्रवके द्वार बन्द हो जाते हैं। अतः आस्रवके द्वारोंके बन्द हो जानेसे संवर होता है। अतः विरतिका फल नये कर्मोंके आस्रवको रोकना है।

संवरफलं तपोबलमथ तपसो निर्जराफलं दृष्टम् ।
तस्मात् क्रियानिवृत्तिः क्रियानिवृत्तेरयोगित्वम् ॥ ७३ ॥

टीका—संवरस्य फलं तपोऽनुष्ठानं प्राक्तनकर्मक्षपणार्थम्। तपसि बलं तपोबलम्—तपसि कर्तव्ये शक्तिविशेषः। तपसस्तु निर्जराफलं कर्मपरिशाटनम्। तस्मात् कर्मापगमात् क्रिया निवर्तते, सैव फलं निर्दिष्टम्। क्रियानिवृत्तेर्निरुद्धयोगत्वात् अयोगित्वात् ॥ ७३ ॥

अर्थ—संवरका फल तपस्या करनेकी शक्तिका होना है। तपका फल निर्जरा देखा गया है। संचित कर्मोंकी निर्जरा होनेसे निवृत्ति होती है, और क्रियाकी निवृत्तिसे मन, वचन और कायकी प्रवृत्तिरूप योग रुक जाता है।

भावार्थ—विनयका [illegible] ही [illegible] नहीं है [illegible] कारिकाने कहे गये क्रमके अनुसार विनयसे [illegible] प्राप्ति होती है और [illegible] है [illegible] निर्जराका कारण है, और निर्जराको [illegible] है [illegible] क्रिया-निवृत्तिसे मन वचन कायरूप योगोंका निरोध होता है। [illegible] विनयगुणके द्वारा योगोंका [illegible] जाता है

योगनिरोधाद्भवसन्ततिक्षयः सन्ततिक्षयान्मोक्षः ।
तस्मात् कल्याणानां सर्वेषां भाजनं विनयः ॥ ७४ ॥

टीका—योगनिरोधस्य फलं जन्मजरामरणप्रबन्धलक्षणाया नरकादिभवसन्ततेरात्यन्तिकः क्षयः। जन्मादिसन्ततिक्षयाच्च मोक्षावाप्तिः। ऐकान्तिकात्यन्तिकादिगुणयुक्तं स्वात्मन्यवस्थानं मोक्षः। तस्मात् पारम्पर्यद्वारेण सर्वकल्याणानां भाजनम्-आश्रयो विनयः। सर्वकल्याणरूपो मोक्षः। अथवा गुरुशुश्रूषादिकल्याणं यावदयोगित्वं भवसन्ततिक्षयश्च, सर्वाण्येतानि कल्याणानि, येषां फलं मोक्ष इति।

अर्थ—योगोंके रुकनेसे नरकादिरूप भवोंकी परम्पराका नाश हो जाता है। भव-परम्पराके नाश हो जानेसे मोक्षकी प्राप्ति होती है। अतः विनय सब कल्याणोंका मूल है।

भावार्थ—विनयका फल योग-निरोध ही नहीं है। योग-निरोधसे नरक, तिर्यञ्च, मनुष्य और देवरूप भवोंकी कड़ी नष्ट हो जाती है, और इस भव-परम्पराके नाशसे अविनश्वर मोक्षकी प्राप्ति हो जाती है। इस तरह विनयका महान् फल है। इस गुणके कारण परम्परासे मोक्षतक प्राप्त हो जाता है, और यह जीव सदाके लिए संसारके अनन्त दुःखोंसे छूट जाता है।

'ये पुनरविनीतास्तेषां कः फलविपाकः ?' इत्याह—

अब अविनयी मनुष्योंको जो कुछ फल भोगना पड़ता है, उसे बतलाते हैं:—

विनयव्यपेतमनसो गुरुविद्वत्साधुपरिभवनशीलाः ।
त्रुटिमात्रविषयसंगादजरामरवन्निरुद्विग्नाः ॥ ७५ ॥

टीका—उक्तलक्षणो विनयः। तस्माद् व्यपेतं विगतं मनो येषां विनयव्यपेतमनसः। गुरूणाम् आचार्यादीनाम्। विद्वांस:-अन्येऽपि चतुर्दशपूर्वधरादयः। ज्ञानादिसाधनत्रयेण मोक्षमभिसाधयन्त: साधयन्तः साधवः। तेषां परिभवः-अनादरो वन्दनाभ्युत्थानादिप्रतिपत्तेरकरणम्, तदेव च शीलं स्वभावो येषाम्। त्रुटिरनन्तपरमाणुसंहतिलक्षणोऽल्पकः सवितृकिरणप्रकाशित-गवाक्षादिषु भ्रमन् दृश्यते। तन्मात्रो विषयसङ्गस्वल्पको निःसारः शब्दादिविषयेषु यः सङ्गस्तस्मात्सङ्गात् अल्पकालमागामिनमचेतयन्त:। अजरामरवन्निरुद्विग्नाः। जरा च मरणं च जरामरणे, अविद्यमाने जरामरणे यस्यासौ अजरामरः, तद्वन्निरुद्विग्नाः-निर्भया मुग्धा एव अजरामराः सर्वसङ्गविमुक्ता, स्वात्मानं मन्यते 'नाहं जरां प्राप्स्यामि न च मरणम्, स्वकृतकर्मफलभुगसत्त्वात्' इति ॥ ७५ ॥

अर्थ—जो अविनयी हैं, वे गुरुओं, विद्वानों और साधुओंका अनादर करते हैं और तुच्छ विषयोंके कारण निश्चिन्त होकर अजर अमर मुक्तात्माके समान निर्भय हो जाते हैं।

भावार्थ—जिनके मनमें विनयका लेश भी नहीं रहता है, वे आचार्यों, चौदह पूर्व और के धारी विद्वानों और साधुओंका अनादर करनेमें स्वभावतः प्रवृत्त रहते हैं। इन्द्रियोंके द्वारा भोगे

जाली सूर्य-किरणोंके प्रकाशमें जो धूलके कण दिखाई पड़ते हैं, उन्हें त्रसरेणु कहते हैं। उसके बराबर अति तुच्छ विषयोंको भी पाकर वे उन्हींमें आसक्त हो जाते हैं। और अपनेको अजर-अमर मानकर आगामी संकटका भय नहीं करते।

एतदेव प्रत्यपायादिदर्शयिषया स्पष्टतरमभिधत्ते—

अब उसी संकटका खुलासा करते हैं :—

केचित् सातर्द्धिरसातिगौरवात् साम्प्रतेक्षिणः पुरुषाः ।
मोहात्समुद्रवायसवदामिषपरा विनश्यन्ति ॥ ७६ ॥

टीका—केचिदविदितपरमार्थाः। सातं सुखं सद्वेद्यम्। ऋद्धिर्विभवः कनकरजतपद्मरागेन्द्रनीलमरकतादिमणिसम्पत् गोमहिष्यजाविककरितुरगरथादिसंपच्च। रसाः तिक्तकटुककषायाम्लमधुरलवणाख्याः। एतेषु सातादिषु गौरवम्-आदरः सुखार्थः, सम्पदर्थः इष्टरसाभ्यवहारार्थश्चादरः। अतीव सुष्ठु गौरवम्। अतिगौरवाद्धेतोः साम्प्रतमेव वर्तमानकालमेवेक्षन्ते नागामिनम्। त एवंविधाः पुरुषाः मोहात् अज्ञानात् मोहकर्मोदयाद्वा समुद्रवायसवदामिषपरा विनश्यन्ति मृतकरिकलेवरापानप्रविष्टमांसास्वादनगृद्धकाकवत्। जलधिमध्यमध्यास्यमाने कलेवरे विनिर्गत्य तेनैवापानमार्गेण सकलं दिग्मण्डलमवलोक्य विश्रान्तिस्थानमपश्यन् निलीयमानश्च पयसि निधनमुपगतः। 'आमिषपराः' इति रसगौरवस्यैव प्रत्यपायबहुलतां दर्शयामास प्रकरणकारः। न तथा सातर्द्धिगौरवे बहुप्रत्यपाये यथा रसगौरवम्, मद्यमांसकुणपादिषु प्रवृत्तिः प्राणव्ययमन्तरेण दुःसम्पाद्या ॥ ७६ ॥

अर्थ—कुछ अविवेकी मनुष्य सुख, ऋद्धि और रसमें अत्यन्त आदर रखनेके कारण केवल वर्तमान कालको ही देखते हैं। और मोहके वशीभूत होकर मांसके लोभी समुद्री कौवेकी तरह नाशको प्राप्त होते हैं।

भावार्थ—जो परमार्थको नहीं जानते वे सांसारिक सुख, सम्पत्ति और इष्ट रसका स्वाद लेनेमें ही मग्न रहते हैं और उन्हींकी प्राप्तिका प्रयत्न किया करते हैं। अतः वे केवल वर्तमानको ही देखते हैं, आगेका विचार नहीं करते। ऐसे मनुष्य अज्ञानके वशीभूत होकर मरे हुए हाथीके शरीरमें गुदामार्गसे घुसकर मांस खानेमें आसक्त कौवेकी तरह नाशको प्राप्त होते हैं। जैसे एक कौवा मांस खानेके लिए हाथीके पेटमें घुस गया। जोरकी वर्षाके कारण हाथी बहकर समुद्रमें जा पहुँचा। बेचारा कौवा हाथीकी गुदासे निकलकर स्थान पानेके लिए इधर-उधर उड़ा और कोई स्थान न पाकर पुनः उसी हाथीके पेटमें जा घुसा, और इस तरह अन्तमें पानीमें डूबकर मर गया। इसी प्रकार विषय-सुखके लालची मनुष्य भी संसार-समुद्रमें डूब जाते हैं। 'मांसके स्वादका लोभी' (आमिषपरा) विशेषण लगानेसे ग्रन्थकारने रसनेन्द्रियके विषयकी आसक्तिको अधिक बुरा बतलाया है। क्योंकि हिंसा किये बिना मद्य, मांस वगैरहकी प्रवृत्ति नहीं होती।

---

१ त्रसरेणु–फ० ब०   २–प्राणव्यय–प०।

ते जात्यहेतुदृष्टान्तसिद्धमविरुद्धमजरमभयकरम् ।
सर्वज्ञवाग्रसायनमुपनीतं नाभिनन्दन्ति ॥ ७७ ॥

टीका—त एवं सुखर्द्धिरसगौरवेषु सक्ताः । जात्या हेतवःस्वाभाविकास्तथ्याः । उत्पत्तिः स्थितिर्व्ययश्च यदस्ति । तदुत्पद्यतेऽवतिष्ठते विनश्यति च, तस्माद् उत्पत्तिमत्वात्, स्थितिमत्वाद् विनष्टत्वाश्च सर्वे पदार्था नित्याश्चानित्याश्च इति सप्तभङ्गीमन्तो भवन्ति। दृष्टान्ताश्चाङ्गुल्यादयः। यथा एकस्मिन्नेव कालेऽङ्गुली मूर्तत्वेनावस्थिता, वक्रत्वेन विनष्टा, ऋजुत्वेनोत्पन्ना उत्पादस्थितिव्ययवर्ती, तथा आत्मादयः सर्वे पदार्था, जात्यहेतुभिर्दृष्टान्तैश्च सिद्धं प्रतिष्ठितमव्याहतमविरुद्ध मिति । न खलु नित्यानित्ययोर्विरोधोऽस्ति द्रव्यार्थतया नित्यत्वमन्वयं समङ्गीकृत्य घटकपालशकलादिषु सर्वत्राविशिष्टात् 'मृद्' इति प्रत्ययः । पर्यायास्तु घटकपालादयः पर्यायनयाङ्गीकरणान् तैरनित्यत्वम् । भिन्ननिमित्तत्वाच्च न सहानवस्थानलक्षणो विरोधोऽस्ति। तस्मादविरुद्धम् । सर्वज्ञवाग्रसायनम्-सर्वज्ञवाग् द्वादशाङ्गप्रवचनं तदेव रसायनम् । यथा रसायनमुपयुज्यमानं नीरुजं वपुः करोति वलीपलितवर्जितम्, तथा भवद्वचनमप्युपयुज्यमानं विधिना सकलरुजापहारि भवति जन्ममरणप्रपञ्च निरासश्चेति। अविद्यमाना जरा यत्र तदजरम्। विगतशरीरत्वाद्भयमपि मरणादिकमत एव तत्र नास्ति। जरामरणाभावत्वाद् 'अजरमभयकरम्' इत्युक्तम्। उपनीतं ढौकितमर्पितं वा नाभिनन्दन्ति-न परितुष्टास्तदुपयोगं कुर्वन्ति ॥७७॥

अर्थ—वे स्वाभाविक हेतुओं और दृष्टान्तोंसे सिद्ध विरोध रहित अजर और अभयकारी सर्वज्ञदेवके वचनरूपी रसायनको पाकर भी उसका आदर नहीं करते हैं।

भावार्थ—जो कुछ सत् है वह उत्पन्न होता है, ठहरता है और नष्ट होता है। अतः उत्पत्ति, स्थिति और विनाशसे युक्त होनेके कारण सभी पदार्थ नित्य भी होते हैं और अनित्य भी होते हैं। जिस प्रकार मुड़ी हुई अङ्गुलीको फैलानेपर एक ही समयमें उसमें तीनों धर्म पाये जाते हैं। अङ्गुली रूपसे वह अवस्थित रहती है, टेढ़ेपनकी अपेक्षासे वह नष्ट होती है, और सीधापनकी अपेक्षासे वह उत्पन्न होती है। क्योंकि टेढ़ीसे सीधी करनेपर टेढ़ापन चला जाता है और सीधापन आ जाता है। इसी प्रकार आत्मा आदिक सभी पदार्थ स्वाभाविक हेतुओं और दृष्टान्तोंसे सप्तभंगीमय सिद्ध हैं। तथा वह विरोध रहित भी है; क्योंकि नित्यता और अनित्यतामें कोई विरोध नहीं है। द्रव्यकी अपेक्षासे नित्य मानकर ही घट, कपाल वगैरहको मिट्टी कहा जाता है। और पर्यायार्थिकनयको माननेपर वे घट-कपाल वगैरह अनित्य हैं। अतः नित्यताका निमित्त भिन्न है और अनित्यताका निमित्त भिन्न। इसलिए दोनों धर्म एक जगह रह सकते हैं और दोनोंमें कोई विरोध नहीं है। अतः निर्दोष हेतुओं और दृष्टान्तोंसे सिद्ध तथा विरोध रहित सर्वज्ञभगवान्का द्वादशाङ्गरूप प्रवचन रसायनके समान है। जैसे रसायनके सेवनसे शरीर झुर्रियों और सफेद बालोंसे रहित होकर नीरोग हो जाता है, उसी प्रकार

---

१. विनष्टत्वाच्च इति प्रतिभाति । २ द्रव्यार्थितया—प० । ३—मन्वयाधमङ्गी—प० । ४—घटघटकपालादिषु—फ०ब० । ५—पर्यायनयैर्नेरिति—प० । ६ वचना—प० । ७ मुपयुज्य—फ०ब० । ८—रासश्चे—फ० ब० । ९—त्वोरिति—फ०।

विधिपूर्वक जिनभगवान्‌के वचनोंका आचरण करनेसे जन्म-मरणरूपी प्रपञ्च नष्ट हो जाता है। इसी लिए जिनभगवान्‌के वचनको अजर-अमर और अभयकारी कहा है। उक्त रीतिसे जो सांसारिक सुख, ऋद्धि और रसमें आसक्त रहते हैं, वे उस रसायनके मिलनेपर भी प्रसन्न चित्तसे उसका सेवन नहीं करते हैं।

एनमेवार्थं दृष्टान्तेन समर्थयति—

इसी बातके समर्थनमें दृष्टान्त देते हैं।

यद्वत् कश्चित् क्षीरं मधुशर्करया सुसंस्कृतं हृद्यम्।
पित्तार्दितेन्द्रियत्वाद्वितथमतिर्मन्यते कटुकम्॥ ७८॥

टीका—'कश्चिद्' इति पित्तबहुलः प्रकुपितपित्तधातुः। क्षीरं गोमहिष्यादीनां स्वभावेनैव स्वादु किं पुनर्मधुशर्करायुतम्। सुसंस्कृतमिति सुक्वथितं निरुपहतभाजनस्थम्। हृद्यं हृदयेष्टम्। पित्तार्दितेन्द्रियत्वादिति-पित्तेनार्दितो व्याप्तः पित्तोदयेनाकुलीकृतान्तःकरणो वितथमतिः-विपरीतबुद्धिः मन्यतेऽवगच्छति 'कटुकम्' इति मधुरमपि सदिति॥ ७८॥

अर्थ—इन्द्रियों के पित्तसे पीड़ित होनेके कारण विपरीत बुद्धि हुआ कोई मनुष्य मधु और शक्करसे युक्त उत्तम रीतिसे तैयार किये गये दूधको कड़ुवा समझता है।

सम्प्रति दृष्टान्तेन दार्ष्टान्तिकमर्थं समीकुर्वन्नाह—

दृष्टान्तको दार्ष्टान्तमें घटाते हैं—

तद्वन्निश्चयमधुरमनुकम्पया सद्भिरभिहितं पथ्यम्।
तथ्यमवमन्यमाना रागद्वेषोदयोद्वृत्ताः॥ ७९॥

जातिकुलरूपबललाभबुद्धिवाल्लभ्यकश्रुतमदान्धाः।
क्लीबाः परत्र चेह च हितमप्यर्थं न पश्यन्ति॥ ८०॥

टीका—यद्यपि मुहूर्त [illegible] तथापि निश्चयं पर्यन्तकाले मधुरम् [illegible]। अनुकम्पया सद्भिः - [illegible] पथ्यम् [illegible]। [illegible] अनादिमाना [illegible] न हितार्थम् [illegible] इति ॥ ७९, ८॥

[illegible]

[illegible]

वाल्लभ्यकं लोकस्य प्रियपिण्डकत्वम्। श्रुतमागमः शास्त्रपरिज्ञानम्। एतदेव जात्यादिश्रुतान्तं मदहेतुत्वात् मदो गर्वः, तेनान्धाः। यथान्धाश्चक्षुर्विकला न किञ्चित्प्रेक्षणीयं पश्यन्ति, तथा जात्यादिगर्वाष्टकान्धा हिताहितविचारणारहिताः क्लीबा विषयगृद्धाद्रमका इवावृताः। तन्मात्रपरितोषादिह परलोकहितं न पश्यन्ति न कुर्वन्ति चेति॥ ८०॥

अर्थ—वैसे ही परिणाममें मधुर और गणधरादिकके द्वारा दया बुद्धिसे कहे गये हितकारक सत्यको निरादर करनेवाले, राग और द्वेषके उदयसे स्वच्छन्दचारी होते हैं।

जाति, कुल, रूप, बल, लाभ, बुद्धि, लोकप्रियता और शास्त्रज्ञानके मदसे अन्धे हुए विषयलोलुपी मनुष्य इस लोक और परलोकमें हितकारक वस्तुको भी नहीं देखते हैं।

भावार्थ—यद्यपि गणधर वगैरहने भव्यजीवोंके कल्याणके लिए जो सत्य और हितकारक उपदेश दिया है, वह असह्य परीषह और इन्द्रियोंको रोकने वगैरहके कारण प्रारंभमें दुख देनेवाला लगता है; किन्तु अन्तमें उसका फल मीठा ही होता है। परन्तु स्वच्छन्दचारी मनुष्य उसकी ओर ध्यान नहीं देता।

जिस प्रकार अन्धे मनुष्य देखने योग्य वस्तु भी नहीं देख सकते हैं वैसे ही जाति वगैरहके मदसे अन्धे हुए विषय-लोलुपी मनुष्य भी हित और अहितका विचार नहीं करते हैं।

'संसारे परिभ्रमतां सत्त्वानां स्वकर्मोदयात् कदाचिद् ब्राह्मणजातिः, कदाचिच्चाण्डालजातिः, कदाचित् क्षत्रियादिजातयः, न नित्यैकैव जातिर्भवति' इति दर्शयन्नाह—

संसारमें भ्रमण करते हुए जीवोंको अपने अपने कर्मके उदयसे कभी ब्राह्मण जाति, कभी चाण्डालकी जाति और कभी क्षत्रिय वगैरहकी जाति होती है। कोई जाति सर्वदा नहीं रहती। यही कहते हैं :—

ज्ञात्वा भवपरिवर्ते जातीनां कोटिशतसहस्रेषु।
हीनोत्तममध्यत्वं को जातिमदं बुधः कुर्यात्॥ ८१॥

टीका—भवो नारकादिजन्म, तस्य परिवर्तः परिभ्रमणम्-नारको भूत्वा तिर्यग्योनौ मनुष्यजातौ वा जायते स्वकर्मवशात्, पृथ्वीकायिकद्वित्रिचतुःपञ्चेन्द्रियजातावुत्पद्यते। तत्र एकेन्द्रियाणां स्वस्थाने शर्करावालुकादिभेदा बहवः। एवमप्तेजोवायुवनस्पतीनामपि यावत्पञ्चेन्द्रियस्थानेष्वपि जातिशतसहस्राणि। तथा देवानामपीति। अतएव चतुरशीतियोनिलक्षः संसारः। स चोत्पद्यमानो हीनोत्तममध्यमेषु कुलेषु जन्म लभते। एवंविधमममभ्रमं वा संसार [illegible] ज्ञात्वा को नाम विद्वान् जातिमदमालम्बेत॥ ८१॥

अर्थ—संसारमें परिभ्रमण करते हुए लाखों-करोड़ों जातियोंमें अधम, उत्तम और मध्यमपने को जानकर कौन बुद्धिमान् जातिका मद करेगा।

टीका—पित्रन्वयः कुलम् । तच्च विस्तीर्णं लोकख्यातम् । तत्र चोत्पन्नो रूपपरिहीणक पुरुषो योषिद्वा विरूपा यस्यावयवा हुंडवामनादयः । बलं शारीरम् तेन परिहीणः सर्वस्य परिभूतः । श्रुतेन परिहीनोऽत्यन्तमूर्खः निकृष्टो मातृकामपि जानाति । मतिः—बुद्धिः, साऽपि हिताहितप्राप्तिपरिहारक्षमा नास्तीत्येतया परिहीणकः । शीलं सदाचारता द्यूतपरदाराऽनृतभाषणतस्करत्वनिष्ठुरत्वादिपरित्यागलक्षणम् । विभवो धनधान्यकनकरजतादिसम्पत् । विपुलेषु कुलेषूत्पन्नानपि ...वान् विरूपादिकानवलोक्य । ननु नियमेनैव कुलमानो गर्वः परिहर्तव्यः गर्भावकाशाभावादेव।८३।

अर्थ—लोक-प्रसिद्ध कुलमें उत्पन्न हुए मनुष्योंको भी रूप, बल, शास्त्र ज्ञान, बुद्धि, सदाचार और सम्पत्तिसे शून्य देखकर कुलका मद निश्चय ही छोड़नेके योग्य है ।

भावार्थ—बड़े भारी कुलमें जन्म लेनेपर भी स्त्री अथवा पुरुष यदि कुरूप हुआ, निर्बल हुआ, अत्यन्त मूर्ख हुआ, हित और अहितका विचार करनेकी बुद्धि न हुई, जुवारी, परस्त्रीगामी (पर पुरुषगामी), असत्यवादी और चोर हुआ, पासमें धन–धान्य सम्पदा न हुई, तो सभी उसका तिरस्कार करते हैं । अतः कुलका मद नियमसे नहीं करना चाहिए । क्योंकि उसमें गर्वके लिए कोई स्थान नहीं है ।

अपि च—

और भी—

यस्याशुद्धं शीलं प्रयोजनं तस्य किं कुलमदेन ।
स्वगुणाभ्यलङ्कृतस्य हि किं शीलवतः कुलमदेन ॥८४॥

टीका—शीलमेव यस्योपहतमसदाचारानुष्ठानात् तस्यैं त्याज्य एव कुलमदः प्रयोजनाभावात् । शुद्धे तु शीले भवतु नाम गर्वः, दुःशीलस्य हि गर्वो दौःशील्यमेव संवर्द्धयति । स्वगुणा रूपबलश्रुतबुद्धिविभवादयो यस्य सन्ति सः तैरेवालङ्कृतः अतः शीलवतोऽपि न किंचित् कुलमदेन । इति परित्यक्तु कुलमदः, इति परिहार्यः ॥ ८४ ॥

अर्थ—जिसका शील दूषित है, उसका कुलके मद करनेसे क्या प्रयोजन है ! और जो शीलवान् है, वह अपने गुणोंसे ही भूषित है । उसे भी कुलका मद करनेसे क्या प्रयोजन है !

भावार्थ—शीलके शुद्ध होनेपर गर्व करना ठीक भी है, दुःशील मनुष्यका गर्व तो दुःशीलता को ही बढ़ाता है । किन्तु जो रूप, बल, श्रुत, बुद्धि, सम्पत्ति वगैरहसे भूषित होते हुए शीलवान् है, उसे भी कुलका मद करना शोभा नहीं देता; क्योंकि उसके गुण ही मद करनेके लिए पर्याप्त हैं । उसे कुलका मद करनेसे क्या लाभ !

' रूपमदोऽपि न कार्यः ' इति दर्शयति—

रूपका भी मद न करना चाहिए, यह बतलाते हैं —

१–[illegible] । २–[illegible] । ३–[illegible] । ४–[illegible]
[illegible] । ५–[illegible] ।

कः शुक्रशोणितसमुद्भवस्य सततं चयापचयिकस्य ।
रोगजरापाश्रयिणो मदावकाशोऽस्ति रूपस्य ॥ ८५ ॥

टीका—शुक्रं पित्रा निसृष्टं वीर्यम् । शोणितं मातुर्योनौ स्फुटितस्फोटकश्रुतम् । एतस्माद्द्वयात् समुद्भवस्य शरीरस्य । बीजबिन्दोराधानात्प्रभृति कललार्बुदमांसपेश्याद्याकारेणोपचयं गच्छन् गर्भः शिरोग्रीवाबाहूरःस्थलोदरादिभावेन वर्द्धते, रसहारिण्या च जनन्यभ्यवहृताहाररसोपयोगात् सम्पूर्णाङ्गावयवो नवमे मासि दशमे वा मातुरुदरान्निर्गच्छति । ततोऽपि स्तनक्षीरपीतकाभ्यवहारात् कुमारयौवनमध्यमस्थविरावस्थाभिः शरीरं चयापचययुक्तम् । पथ्येष्टाहारपरिणतेरुपचयो वृद्धिः अपथ्यानिष्टान्नपानोपयोगादपचयो हानिः । तौ चयापचयौ यस्य तच्चयापचयिकम् । निरुजस्य वा उपचयः, मान्द्यादिभिरपचयः । रोगा ज्वरातीसारकासश्वासादयः । जरा पूर्वावस्थात्यागेनोत्तरावस्थावस्कन्दनं यावदत्यन्तस्थविरावस्थेति । रोगजरयोरपाश्रयिस्थानं शारीरकमाश्रयः । एवंविधे शुक्रादिसंपर्कनिष्पन्ने देहे को मदावकाशः किं गर्वस्थानं रूपस्येति ? ॥ ८५ ॥

अर्थ—यह रूप रज और वीर्यसे उत्पन्न होता है । सदैव घटता-बढ़ता रहता है । रोग और जराका घर है । उसमें मद करनेका क्या स्थान है ?

भावार्थ—पिताके वीर्य और माताके रजसे शरीर बनता है । गर्भाधानसे लेकर कलल, अर्बुद मांसपेशी वगैरह आकार धारण करता हुआ गर्भ, सिर, गर्दन, हाथ, छाती, उदर वगैरह रूपसे बढ़ता है, और माताके द्वारा खाये गये भोजनके रससे अङ्ग उपाङ्ग पूरे बन जानेपर नौवें अथवा दसवें महीने माताके उदरसे बाहर आता है । उसके बाद भी माताके स्तनोंका दूध पीकर कुमार, यौवन, प्रौढ़ और वृद्ध अवस्थाको धारण करता है । अतः शरीर हानि और वृद्धिसे युक्त है । पथ्य और रुचिकर भोजनके मिलनेसे पुष्ट होता है और अपथ्य तथा अरुचिकर भोजनके मिलनेपर दुर्बल हो जाता है । अथवा नीरोग दशामें पुष्ट होता है और मन्दाग्नि वगैरह होनेसे दुर्बल हो जाता है । ज्वर, अतीसार, खाँसी, श्वास वगैरह रोगोंका तथा बुढ़ापेका घर है । ऐसे शरीरमें कौन ऐसी बात है, जिससे इसके रूपका मद किया जाये ?

नित्यं परिशीलनीये त्वङ्मांसाच्छादिते कलुषपूर्णे ।
निश्चयविनाशधर्मिणि रूपे मदकारणं किं स्यात् ॥ ८६ ॥

टीका— नित्यमिति सततं परिशीलनीये त्वङ्मांसाच्छादिते ...
[illegible]

संस्कारमार्जनादि प्रतिक्षणमयमाचरति, अनिर्विण्णो रूपवान्। त्वचा चर्मणाऽसृजाऽवतता मांसेन चाच्छादिते स्थगिते। कलुषं मूत्रपुरीषरुधिरमेदोमज्जाऽस्थिस्नायुप्रभृति, तेन पूर्णे व्याप्ते। विनाशधर्मो यस्यास्ति तद्विनाशधर्मि। निश्चयेन-भवदर्यंतया अभ्यङ्गोद्वर्तनस्नानानुलेपनप्रति-विशिष्टाशनपानलालितमपि विनश्यति पर्यन्ते, कृम्यादिपुञ्जो वा भस्मराशिर्वा शुष्कचर्मास्थि-कलेवरमात्रं वा भवति। एवंविधे च रूपे किं पुनर्भवेत् मदकारणं येन माद्यन्ति निर्विवेका रूपभाजः॥ ८६॥

अर्थ—यह नित्य ही संस्कार करने योग्य है। चर्म और माँससे ढका हुआ है। मलसे भरा है और निश्चयसे नष्ट होनेवाला है। ऐसे रूपमें मदका क्या कारण है?

भावार्थ—शरीरमें नौ मलद्वार हैं। उनसे सदा कीच, नाक, थूक, खार, वीर्य, मूत्र, विष्ठा, पसेव वगैरह मल बहा करता है। रूपवान् रागी मनुष्य हरसमय उसकी सफाईका ध्यान रखता है। चर्म और रक्त माँससे यह ढका हुआ है। किन्तु उसके अन्दर मूत्र, विष्ठा, खून, चर्बी, मज्जा, हड्डी, नसें वगैरह गन्दी चीजें भरी हुई हैं। तेल, उबटना, स्नान, लेप और अच्छे-अच्छे खान-पानसे इसका लालन पालन करनेपर भी यह प्रायः नष्ट होता है। अन्तमें यह या तो कीड़ोंका ढेर बन जाता है या राखका ढेर बन जाता है, अथवा हड्डी और चमड़ा मात्र रह जाता है। ऐसे रूपमें मद करनेका क्या कारण है? जिससे नासमझ मनुष्य उसका मद करते हैं।

बलका मद नहीं करना चाहिए :—

बलसमुदितोऽपि यस्मान्नरः क्षणेन विबलत्वमुपयाति।
बलहीनोऽपि च बलवान् संस्कारवशात् पुनर्भवति॥ ८७॥

टीका—बलेन शारीरेण समुदितः समन्वितो बलवानपि यस्मात् क्षणेन-स्वल्पेनैव कालेन [illegible] विगतबलो भवति। बलहीनोऽपि दुर्बलः सन्नपि पुष्टिकर [illegible] संस्कारवशात् [illegible] बलसमन्वितो भवति जायते। संस्कारो वासना [illegible], 'वीर्यान्तरायक्षयोपशमविशेषात्' इत्यर्थः॥ ८७॥

अर्थ—बलवान् मनुष्य भी क्षणभरमें बलहीन हो जाता है और बलहीन भी पुष्टिकर [illegible] अथवा वीर्यान्तरायकर्मके क्षयोपशमसे बलवान् हो जाता है।

भावार्थ—मनुष्यको अपने बलका भी मद नहीं करना चाहिए। क्योंकि यह बल [illegible] वस्तु नहीं है। बड़ेसे बड़ा बलवान् भी प्रबल रोग आदिके निमित्तसे क्षणभरमें बलहीन देखा जाता है और बलहीन मनुष्य भी वीर्यान्तरायके क्षयोपशम और [illegible] से बलवान् देखा जाता है। अतः बल भी मद करनेकी वस्तु नहीं है।

[illegible]

तस्मादनियतभावं बलस्य सम्यग्विभाव्य बुद्धिबलात् ।
मृत्युबले चाऽबलतां मदं न कुर्याद्बलेनापि ॥ ८८ ॥

टीका—अनियतो भावः सत्ता यस्य, ' कदाचिद्भवति कदाचिन्न भवति ' इति बलम् उक्तेन न्यायेन इति सम्यग् विभाव्य विज्ञाय यथावत् । ' कथं पुनरभावो बलस्य ? ' इत्याह— ' बुद्धिगम्यमेतत् ' इति प्रतिपादयति । मृत्युबले चोपतिष्ठमाने न शरीरबलं न स्वजनबलं न द्रव्यबलं क्रमते प्रतिक्रियायै । अतो मदं न कुर्यात् सम्यग्विभावितत्वादसमर्थो बलेनापि ॥८८॥

अर्थ—अतः बुद्धिकी शक्तिके द्वारा बलकी अस्थिरताको भलीभाँति जानकर तथा मौतके सामने शारीरिक बलकी निर्बलताको देखकर बलका मद नहीं करना चाहिए।

भावार्थ—बल सर्वदा नहीं बना रहता, यह बात हरेककी बुद्धिमें समा सकती है। और मौत सामने आनेपर तो सभी बल बेकार होजाते हैं। अतः बलका मद नहीं करना चाहिए।

लाभका मद नहीं करना चाहिए :—

उदयोपशमनिमित्तौ लाभालाभावनित्यकौ मत्वा ।
नालाभे वैक्लव्यं न च लाभे विस्मयः कार्यः ॥ ८९ ॥

टीका—लाभान्तरायकर्मणः क्षयोपशमाल्लाभो भवति भक्तपानवस्त्रपात्रप्रतिश्रय-पीठफलकादेः । लाभान्तरायकर्मोदयाच्च न लभते किञ्चिदपि । अतो नास्ति नित्यो लाभः, नाप्यलाभः । नित्यानित्यौ च लाभालाभौ विज्ञाय नालाभे वैक्लव्यं दीनता कार्या, नातिलाभे सति विस्मयो गर्वः कार्यः । यदि लभ्यते ततो धर्मसाधनं शरीरकमार्थं दशविधचक्रवालसामाचारी समाचरणसमर्थं भविष्यति । न चेल्लब्धं तथाप्यदीनचेतसः सावोनिर्जराभाक्त्वं भविष्यति । कर्मोदयक्षयोपशमजनितः खल्वयंभावो न स्वतो लाभालाभलक्षण इति ॥ ८९ ॥

अर्थ—लाभान्तरायकर्मके क्षयोपशमसे लाभ होता है और लाभान्तरायकर्मके उदयसे कुछ भी लाभ नहीं होता। अतः लाभ भी नित्य नहीं है और अलाभ भी नित्य नहीं है। ऐसा जानकर अलाभमें दीनता नहीं करनी चाहिए और लाभके होनेपर गर्व नहीं करना चाहिए।

भावार्थ—यदि साधुको आहारादिकका लाभ हुआ तो वह [illegible] और यदि लाभ न हुआ तो भी [illegible] कर्मोंकी निर्जरा होती है [illegible] नहीं करना चाहिए।

[illegible]
[illegible]

परशक्त्यभिप्रसादात्मकेन किञ्चिदुपभोगयोग्येन ।
विपुलेनापि यतिवृषा लाभेन मदं न गच्छन्ति ॥ ९० ॥

टीका—परो दाता गृहस्थादिः, तस्य दानान्तरायक्षयोपशमजनिता शक्तिः, स्वशक्त्यनुरूपं ददाति । अभिप्रसादात्मकेनेतिः—दातुर्यद्यभिप्रसन्नं चेतो भवति साधुं प्रति, 'मुक्तिसाधनं प्रवृत्तोऽयं तपस्वी निःसङ्गः समारम्भादिषु, पात्रभूतोऽस्मै दत्तं बहुफलं भवति। एवं लाभः परप्रसादात्मकः। सर्वमपि तद्वस्त्रादि किञ्चिदेवोपभोगान्तरं साधयति, न पुनराजीवितावधेस्तृप्तिं करोति। एवं वस्त्रादेरपि अनित्यत्वात् किञ्चिदुपभोगयोग्यत्वम्। एवंविधेन लाभेन यतिवृषा यतिप्रधानभूताः विपुलेन विस्तीर्णेन बहुना न मनागपि मदमुद्वहन्ति ॥ ९० ॥

अर्थ—दाताकी शक्ति और प्रसन्नताके अनुरूप प्राप्त हुए कुछ उपभोगके योग्य बड़े भारी लाभसे भी मुनीश्वरोंको मद नहीं होता है।

भावार्थ—दानान्तरायके क्षयोपशमसे दातामें दान देनेकी शक्ति प्रकट होती है। दाता अपनी उसी शक्तिके अनुसार दान देता है। तथा यदि दाताका चित्त साधुके प्रति प्रसन्न होता है कि यह साधु मुक्तिकी साधनामें लगा हुआ है, तपस्वी है, आरम्भ और परिग्रहसे रहित है, सत्पात्र है, इसे दान देनेसे बड़ा पुण्य होगा, तो दाता उसे अपनी शक्तिके अनुसार दान देता है। अतः लाभ दाताकी शक्ति और प्रसन्नतापर भी निर्भर है। तथा दानमें प्राप्त हुआ अन्न वगैरह कुछ ही समयके लिए शरीरको तृप्ति करता है। अतः ऐसे लाभसे, भले ही वह बड़ा भारी हो, श्रेष्ठ मुनि कभी मदको प्राप्त नहीं होते।

बुद्धिका मद करना योग्य नहीं है :—

ग्रहणोद्ग्राहणनवकृतिविचारणार्थावधारणाद्येषु ।
बुद्ध्यङ्गविधिविकल्पेष्वनन्तपर्यायवृद्धेषु ॥ ९१ ॥
पूर्वपुरुषसिंहानां विज्ञानातिशयसागरानन्त्यम् ।
श्रुत्वा साम्प्रतपुरुषाः कथं स्वबुद्ध्या मदं यान्ति ॥ ९२ ॥

टीका—अपूर्वसूत्रार्थयोर्ग्रहणसमर्था बुद्धिः, गृहीतं सूत्रमर्थो वा उद्ग्राह्यः—अन्यस्मै प्रतिपाद्यं बुद्धिविशेषेण। नवकृतिरिति—नवम्-अभिनवं स्वयमेव प्रकरणाद्योपनिबन्धनादि करोति। विचारणा नाम सूक्ष्मेषु आत्मकर्मबन्धमोक्षादिषु युक्त्यनुसारिणी जिज्ञासा। आचार्योपाध्यायादिवचनविनिर्गतस्य शब्दार्थस्य सकृदेव ग्रहणं न विस्मृतिः। 'एवमाद्येषु' इति आदि

१–ग्रहणोद्ग्राहणनवकृतिविचारणार्थावधारणाद्येषु—ब०। २–स्वबोधेन—ब०। ३–न हि बहुना क०, ब०। ४–बुद्धिषु—ब०। ५–तदुत्पन्नमर्थो ब०। ६–स सूक्ष्मतर्थो—ब०। ७–वादादु—ब, क, ब०, मु०। ८–पूर्वं ह ब०। ९–अर्थोत्पादनसाधनादिवचनवि- [illegible] शब्दार्थस्य सकृदेव ग्रहणं न विस्मृतिरुत्पादनादिकार्यम्—मम०।

शब्दाद् धारणा परिगृह्यते । बुद्धेरङ्गानि शुश्रूषाप्रतिप्रश्नग्रहणादीनि, तेषां विधिः—विधान मागमेन प्रतिपादनम्, तस्य विधेर्विकल्पास्तेषु । कियत्सु ? अनन्तैः पर्यायैर्वृद्धेषु । क्षयोपशमजा बुद्धिविकल्पाः परस्परमनन्तैः पर्यायैर्वृद्धाः असर्वपर्यायसर्वद्रव्यविषयत्वाद् मतिश्रुतयोः, समस्तरूपिद्रव्यनिबन्धनत्वाच्चावधेः तदनन्तभागवर्तिरूपिद्रव्यनिबन्धनत्वाच्च मनःपर्यायबुद्धेः । इत्येवं बुद्ध्यङ्गविधिविकल्पेषु अनन्तपर्यायवृद्धेषु सत्सु ॥ ९१ ॥

पूर्वपुरुषा गणधरप्रभृतयश्चतुर्दशपूर्वधरादयो यावदेकादशाङ्गविदवसानाः । सिंहा इव सिंहा इव सिंहाः, शौर्येणोपमानम् । परीषहकषायेन्द्रियकुरङ्गनिहननात् पूर्वपुरुषसिंहाः । विज्ञानातिशयो विज्ञानप्रकर्षः, स एव सागरः समुद्रो विस्तीर्णत्वात् । अनन्तस्य भाव आनन्त्यं 'बहुत्वम्' इत्यर्थः । क्षयोपशमजज्ञानस्य प्रकर्षापकर्षवत्वादनन्ता विज्ञानातिशयसागराः 'बहवः' इत्यर्थः । अथवा श्रुते सर्वश्रुतग्रन्थे वैक्रियतेजोलेश्याकाशगमनसंभिन्नश्रोत्रादयोऽतिशया बहुप्रकाराः, त एव सागराः एकस्याप्यतिशयस्य दुरवगाहत्वात् । तदेतत् पूर्वपुरुषसिंहानां श्रुत्वा साम्प्रतपुरुषा दुःषमांशवर्तिनः कथं केन प्रकारेण स्वल्पया स्वधिषणया माद्यन्तीति ॥ ९२ ॥

अर्थ—ग्रहण, उद्ग्राहण, नवीन रचना करना, विचारणा तथा अर्थको अवधारण करना वगैरह और बुद्धिके अङ्गोंका आगममें जो विधान है, उसके अनन्त पर्यायोंकी वृद्धिको लिए हुए भेदोंमें पूर्व महापुरुष सागरके समान महान् ज्ञानकी अनन्तताको सुनकर आज-कलके पुरुष अपनी बुद्धिका गर्व कैसे करते हैं !

भावार्थ—अपूर्व सूत्रों और उनके अर्थको ग्रहण करनेमें, दूसरोंको समझानेमें, नवीन प्रकरण वगैरह रचनेमें, सूक्ष्म पदार्थोंका विचार करनेमें, आचार्य वगैरहके मुखसे निकले हुए अर्थका एक बारमें ही अवधारण करने वगैरहमें हमारे पूर्वज बड़े दक्ष थे । तथा शास्त्रोंमें बुद्धिके 'सुननेकी इच्छा' वगैरह जो अङ्ग बतलाये हैं उनके भेद मतिज्ञान आदि हैं, जो परस्परमें अनन्त पर्यायोंकी वृद्धिको लिए हुए हैं । क्योंकि मति और श्रुत सब द्रव्योंको विषय करते हैं । अवधि समस्त रूपी द्रव्यको जानता है, और मनःपर्यय उसके अनन्तवें भाग रूपी द्रव्यको जानता है । इस प्रकार परस्परमें अनन्त पर्यायोंकी वृद्धिको लिए हुए जो बुद्धिके भेद हैं, वे भी हमारे उन चौदह पूर्वके पाठीसे लेकर ग्यारह अङ्गके ज्ञाता पूर्वजोंमें पाये जाते थे । इस प्रकार उनका ज्ञान सागरके समान गम्भीर और अनन्त था । उनके इस ज्ञानातिशयको सुनकर आजकलके थोड़ी बुद्धिवाले मनुष्योंको अपने ज्ञानका गर्व नहीं करना चाहिए ।

द्रमकैरिव चाटुकर्मकमुपकारनिमित्तकं परजनस्य ।
कृत्वा यद्वाल्लभ्यकमवाप्यते को मदस्तेन ॥ ९३ ॥

टीका—रङ्कैरिव चाटुशब्देन समानार्थश्चटुशब्दोऽपि विद्यते। बहुलवचनाद्वा उकारान्त्यस्यो भवति। चटुकर्मैव चटुकर्मकम्। 'अनुवृत्तिः तत्प्रयोजनानुष्ठानं तद्गुणप्रशंसा विष्टरादिदानम्' इत्येवं कुर्वाणो लोकस्य वल्लभो भवति। आचार्यादीनामामोदितमभ्युत्थानादि क्रियमाणं चटुकर्म न दोषमावहति। उपकारो निमित्तं यस्य चटुकर्मणः तदुपकारनिमित्तकम्। उपकारोऽनेन प्राग् मम कृतः करिष्यते वाऽतश्चटुकर्म करोति। 'परजनस्य' इति गृहस्थादिसूचनम्। तच्चटुकर्म कृत्वा यदवाप्यते वाल्लभ्यकं को मदस्तेनेति—श्ववावलेहनादिदायिनः पुरः स्थित्वा श्रवणपुच्छचालनादि कृतोपकारस्य यद्वाल्लभ्यकमवाप्नोति किं तत्र चित्रमिति॥ ९३॥

अर्थ—उपकारके निमित्त दीन मनुष्योंके समान दूसरे लोगोंकी चापलूसी करके जो उनका प्रेम प्राप्त किया जाता है, उसका क्या मद !

भावार्थ—इसने मेरा उपकार किया है, अथवा आगे करेगा, यह सोचकर मनुष्य भिखारियोंकी तरह दूसरोंकी चापलूसी करता है। उसके पीछे-पीछे लगा रहता है, उसका काम करता है, उसकी बड़ाई करता है, और उसे बैठनेको आसन देता है। जिस प्रकार कुत्ता रोटीका टुकड़ा डालनेवालेके आगे खड़ा होकर अपने कान और पूछ हिलाता है। इस तरहके कामोंसे दूसरोंका जो प्रेम प्राप्त होता है, उसमें कोई अचरज नहीं है। अतः उसका मद करना बेकार है।

गर्वं परप्रसादात्मकेन वाल्लभ्यकेन यः कुर्यात् ।
तद्वाल्लभ्यकविगमे शोकसमुदयः परामृशति ॥ ९४ ॥

टीका—गर्व-अभिमानं 'बहुजनवल्लभोऽहम्' इति परप्रसादेन जनितः। परो हि चाटुकर्मकारिणं परितुष्टः कश्चित् प्रसादं करोति वस्त्रान्नपानादिकम्। तावन्मात्रेण च गर्वितो भवति। तं चाटुकर्मकारिणं वाल्लभ्यकविगमे विगते-वल्लभत्वे द्वेष्यत्वे जाते, शोकसमुदयः परामृशति स्पृशति-तदनुशोचनेनोऽयमकस्मात् एव निःस्नेहो जातः। यावन्ति चाटुकर्माणि कृतानि तावन्त एव शोकसमुदयास्तेन स्पृश्यन्ते। शोकादिवचनपीडाविशेषः॥ ९४॥

अर्थ—दूसरोंके अनुग्रहसे प्राप्त हुए प्रेमका जो मनुष्य गर्व करता है, उस प्रेमके नष्ट हो जानेपर उसे बड़ा भारी रंज होता है।

भावार्थ—चापलूसी करनेवालेसे प्रसन्न होकर दूसरे मनुष्य उसपर अनुग्रह करते हैं, उसे अन्न-वस्त्र देते हैं। उतने ही से वह गर्व करता है कि मैं बहुतसे मनुष्योंको प्रिय हूँ। किन्तु जब प्रेमका अन्त हो जाता है तब उसने जितनी भी खुशामद की थी, उतना ही उसे रंज भी उठाना पड़ता है कि इतनी खुशामद करनेपर भी अमुक मनुष्य एकदम ही दुश्मन बन गया।

श्रुतका मद नहीं करना चाहिए :—

माषतुषोपाख्यानं श्रुतपर्यायप्ररूपणां चैव ।
श्रुत्वाति विस्मयकरं विकरणं स्थूलभद्रमुनेः ॥ ९५ ॥

१—[illegible]

सम्पर्कोद्यमसुलभं चरणकरणसाधकं श्रुतज्ञानम् ।
लब्ध्वा सर्वमदहरं तेनैव मदः कथं कार्यः ॥ ९६ ॥

टीका—स्वल्पेनापि श्रुतेन भावतो गृहीतेन जडमतिनाऽपि निर्वाणं साध्यते। स नासमर्थो बहुमागममध्येतुं करणजडत्वान् मेधावारणाविरहाच्च। तस्यैवंविधस्य गुरुभिरनुकम्पया पदद्वयमर्पितम् 'मा रूस' 'मा तूस' इति रागद्वेषनिग्रहगर्भम्। तस्य तद् घोषयतः करण-वैकल्यादन्यथा स्थिरीभूतम् 'मापतुष' इति। श्रूयते च तस्य निर्वाणावाप्तिः। तस्माद् 'बह्वधीतं मयाऽर्थश्च परिज्ञायते' इति निष्कारणो गर्वः। श्रुतपर्यायप्ररूपणा चैवम्—श्रुत-मागमः, तस्य पर्याया भेदाः—कश्चिदेकार्थव्याख्याकारी, कश्चिदर्थद्वयभाषी, तथाऽपरो बह्वर्थाख्यायी एकस्यैव सूत्रस्येति श्रुतपर्यायश्चाकर्ण्य। अतिविस्मयकरश्च विकरणं वैक्रिय-सिंहरूपनिर्माणं स्थूलभद्रमहर्षेर्जामिआर्यिकाणां दर्शनाय, आगमाभियोगजनितं लब्धिविकरणं श्रुतसम्प्रदायविच्छेदं च तस्य श्रुत्वा को नामैहिकापायभीत्याऽपि श्रुतमदं कुर्यात् ॥ ९५ ॥

आगमस्य बहुश्रुतराचार्यादिभिः सह सम्पर्कः-संसर्गः, उद्यम-उत्साहोऽध्येतव्यार्थश्रवणे च। सम्पर्कोद्यमाभ्यां सुलभम्-अनायासेन प्राप्यम्। चरणं मूलगुणाः, करणमुत्तरगुणाः, तेषां साधकम्-निष्पादकम्। श्रुतज्ञानं लब्ध्वा-समासाद्य, सर्वेषां जात्यादिमदानामपनयनकारि भूयस्तेनैव कथं मदमादधीत आत्मनि ! न हि विषापहारि प्रयुज्यमानमगदं विषवृद्धिं करोतीति ॥ ९६ ॥

अर्थ—मापतुष मुनिके कथानकको सुनकर, श्रुतज्ञानके भेदोंकी प्ररूपणाको सुनकर और स्थूलभद्र मुनिकी अत्यन्त आश्चर्यजनक विक्रियाको सुनकर कौन मनुष्य श्रुतका मद करेगा ! बहुश्रुत आचार्योंके संसर्गसे और अपने उत्साहसे अनायास प्राप्त होनेवाले, मूलगुण और उत्तरगुणोंके साधक तथा सब मदोंको हरनेवाले शास्त्रज्ञानको प्राप्त करके उसका मद कैसे किया जा सकता है !

भावार्थ—भावपूर्वक ग्रहण किये हुए थोड़ेसे भी श्रुतसे जड़बुद्धि मनुष्यको भी निर्वाण प्राप्त हो सकता है। मापतुष मुनि जड़बुद्धि होनेके कारण बहुत आगे पढ़नेमें असमर्थ थे। उनपर दया करके गुरु महाराजने उन्हें दो पद लिखा दिये—'मा रूस' और 'मा तूस' अर्थात् राग मत करो और द्वेष मत करो। उन पदोंका उच्चारण करते करते उन्हें 'मापतुष' याद रह गया। इतने मात्रसे ही उन्हें निर्वाणकी प्राप्ति सुनी जाती है। अतः 'मैंने बहुत पढ़ा है, और मैं अर्थको सब जानता हूँ' ऐसा गर्व करना निष्कारण है। तथा आगमज्ञानके बहुतसे भेद हैं।

कोई एक अर्थका व्याख्यान करता है और कोई दो अर्थकी व्याख्या करता है, तथा कोई उस एक ही सूत्रके अनेक [illegible]

[illegible]

तथा श्रुतज्ञान तो सभी मदोंको दूर करनेवाला है । श्रुतज्ञानको पाकर मद करने लगना कहाँतक उचित है ? विषको दूर करनेके लिए दी गई ओषधि विषको बढ़ाती नहीं है ।

स्थूलभद्र महर्षिको विशिष्ट श्रुताभ्याससे विक्रिया ऋद्धि प्राप्त हुई और उसके गर्वमें आकर उन्होंने दर्शनार्थ आई हुई आर्यिकाओंको भयभीतकर श्रुत-सम्प्रदायका विच्छेद किया।[1] अतः कौन व्यक्ति होगा जो इस घटनाको सुनकर श्रुतका मद करे ?

एतेषु मदस्थानेषु निश्चये न च गुणोऽस्ति कश्चिदपि ।
केवलमुन्मादः स्वहृदयस्य संसारवृद्धिश्च ॥ ९७ ॥

---

१. पाटलीपुत्रमें एकत्र हुए 'महावीर-संघ' की प्रार्थनापर जिनतुल्य भद्रबाहुस्वामी पूर्वश्रुतकी वाचना देनेके लिए तैयार हो गये, परंतु वे इस शर्तपर तैयार हुए कि कायोत्सर्ग पूर्ण करनेके पश्चात्, भोजनके समयमें, और मकानसे बाहर आने-जानेके समयमें ही वाचना दे सकेंगे । निदान ५०० साधु-विद्यार्थी एवं १००० उनके परिचारक साधु भद्रबाहुके निकट दृष्टिवादके अध्ययन निमित्त पहुँचे । परन्तु वाचनाक्रमके अनुकूल न होनेसे अन्य साधु तो भद्रबाहुके निकटसे चल दिये । उनमें से केवल स्थूलभद्र ही रह गये और उन्होंने संलग्नतापूर्वक अध्ययन करते हुए साङ्गोपाङ्ग दशपूर्व सीख लिए ।

एक दिन स्थूलभद्र एकान्तमें ग्यारहवें पूर्वका अध्ययन कर रहे थे । इसी अवसरपर उनकी सात बहिनें भद्रबाहुस्वामीके दर्शनार्थ आईं । उन्होंने वहाँ स्थूलभद्रको न देखकर उनके निवास-स्थलके सम्बन्धमें प्रश्न किया । भद्रबाहुने उन्हें उनका ठिकाना बतला दिया ।

साध्वियाँ स्थूलभद्रके दर्शनार्थ पहुँची, परन्तु उन्होंने अपनी श्रुत-शक्तिका परिचय करानेकी दृष्टिसे सिंहका रूप धारण कर लिया । साध्वियाँ डर गईं और भद्रबाहुस्वामीके निकट आकर कहने लगीं—क्षमा-श्रमण ! वहाँ स्थूलभद्र नहीं है, बल्कि एक सिंह है । भद्रबाहुने बताया कि स्थूलभद्र ही सिंहका रूप बनाये है । साध्वियाँ पुनः स्थूलभद्रका दर्शनकर कृतार्थ हुईं ।

इसके बाद स्थूलभद्र भद्रबाहुके पास वाचना लेने पहुँचे । भद्रबाहुको नंदके मंत्री शकटारका पुत्र, उच्च कुलोत्पन्न, संयमी, स्थूलभद्र द्वारा इस प्रकार श्रुतज्ञानका दुरुपयोग देखकर बड़ा खेद और आश्चर्य हुआ । वाचना देनेके निवेदनपर भद्रबाहु स्थूलभद्रसे कहने लगे—"हे अनगार ! जो तुमने पढा है, वही बहुत है, अब तुम्हें पढ़नेकी कोई जरूरत नहीं ।"

स्थूलभद्रने और गच्छीय साधुओंने वाचना देनेके लिए बहुत अनुनय-विनय की, पर भद्रबाहु कहने लगे—"श्रमणो, दिन-दिन समय नाजुक आता जा रहा है, मनुष्योंकी मानसिक शक्तियोंका प्रतिक्षण ह्रास होता जा रहा है, उनकी समता और गंभीरता नष्ट होती जा रही है । इस अवस्थामें शेष पूर्वोंका प्रचार करनेमें मैं कुशल नहीं देखता ।"

स्थूलभद्र अग्रिम वाचनाके लिए अत्याग्रह करने लगे । अतः भद्रबाहुने शेष चार पूर्वोंको बतलाना तो स्वीकार कर लिया, परन्तु स्थूलभद्रको उन पूर्वोंको दूसरोंको पढ़ानेकी आज्ञा नहीं दी ।

इस प्रकार स्थूलभद्रके श्रुताभिमानके कारण उनके साथ ही चार पूर्वोंका नाश हुआ ।

देखो वीर-निर्वाण सम्वत् और जैनकालगणना पृ. सं. ९४—९८ ।

टीका—जात्यादिष्वष्टसु मदस्थानेषु एतेषु निश्चये परमार्थविचारणायां पर्यवसाने वा न खलु कश्चिद् गुणो दृश्यते ऐहिक आमुष्मिको वा। यदि नाम जातिर्विशिष्टा ततः किं स्यात्? हीना चेत्ततोऽपि किम्? केवलमुन्मादः स्वहृदयस्य—यदि परमुन्माद उन्मत्तता ग्रहाविष्टस्येव यत्किञ्चन प्रलापित्वं स्वहृदयस्येति। स्वचित्तपरिणामादेतानि मदस्थानानि भवन्ति। स च हृदयपरिणामो बहिर्वर्तिन्या वाक्कायचेष्टयाऽवगम्यते। ततश्च संसारवृद्धिः—जन्मजरामरणप्रबन्धः संसारः, तस्य वृद्धिः—तद्दीर्घीकरणमिति ॥ ९७ ॥

अर्थ—वास्तवमें इन मदोंके करनेमें कोई भी लाभ नहीं है। यह केवल अपने हृदयका उन्माद है और उससे संसारकी वृद्धि ही है।

भावार्थ—इस प्रकार ज्ञान, पूजा, कुल, जाति, बल, ऋद्धि, तप और शरीर—इनमेंसे एक भी ऐसी वस्तु नहीं है, जिसके मदसे मनुष्यका कुछ विशेष लाभ हो। इनके मदमें मनुष्य सदैव उन्मत्त बना रहता है और आत्म-स्वरूपको भूलकर अनन्त संसारका बन्ध किया करता है। इसलिए गर्व किसी प्रकारका भी अच्छा और श्रेयस्कर नहीं है।

जात्यादिमदोन्मत्तः पिशाचवद् भवति दुःखितश्चेह।
जात्यादिहीनतां परभवे च निःसंशयं लभते ॥ ९८ ॥

टीका—जात्यादिनाऽष्टप्रकारेण मदेनोन्मत्तो हृत्पूरकभक्षणपित्तोदयाद् व्याकुलीकृतान्तःकरणपुरुषवत् पिशाचवद्वा भवति दुःखितश्चेह। कश्चिच्छुचिपिशाचकोदकः जनाकीर्णं देशमुत्सृज्य समुद्रमध्यवर्तिनं द्वीपमनुप्रविष्टः। तत्र चैको वणिग् विभिन्नपोतः प्रथमतरं गतः। तत्र चेक्षुवाटाः प्रभूताः। तद्रसपानात् केवलान् गुडशकलानीव गुदमुखेन विसृष्टानि। पुरीषपरिणामान्तराणि तानि तथाऽवलोक्य स चोक्तपिशाचकश्चखाद स्वादूनि। वृत्तश्चास्ते प्रतिदिवसम्। दृष्टश्च कालान्तरेण हिण्डमानो वणिक्। ततश्चोद्विग्नस्तस्मादपि स्थानान्निर्गतोऽन्यं द्वीपं गतः। तत्रापि वल्गुल्यादिदूषितानि फलानि भुक्तवान्। एवं यत्र यत्र याति तत्र तत्र दुःखभाक्। एवंविधश्च परभवेऽपि हीनजात्यादित्वेनोत्पद्यते इति न युक्तो जातिमदः ॥ ९८ ॥

अर्थ—[illegible] के मदसे उन्मत्त हुआ मनुष्य इस लोकमें पिशाचकी तरह दुःखी होता है। [illegible]

भावार्थ—[illegible] रहनेकी इच्छासे वह [illegible]

[illegible]

अर्थ—दूसरोंके तिरस्कार और निन्दासे तथा अपनी प्रशंसासे भव-भवमें नीचगोत्रकर्मका बन्ध होता है, जो भवोंकी अनेक परम्पराओंमें भी नहीं भोगा जा सकता।

भावार्थ—नीचगोत्रकर्मकी उत्कृष्ट स्थिति बीस कोड़ाकोड़ी सागर-प्रमाण बतलाई गई है। अतः एक भवका बाँधा हुआ कर्म अनेक भवोंमें भी नहीं भोगा जा सकता। ऐसी दशामें भव-भवमें बाँधे हुए कर्मका भोग तो करोड़ों भवोंमें भी होना अशक्य है।

'कर्मोदयवशाच्च हीनादिजातिषु जन्म भवति नाकस्मात्' इति दर्शयति—

कर्मोदयके कारण ही नीच वगैरह जातियोंमें जन्म होता है, यह बतलाते हैं :—

कर्मोदयनिर्वृत्तं हीनोत्तममध्यमं मनुष्याणाम् ।
तद्विधमेव तिरश्चां योनिविशेषान्तरविभक्तम् ॥ १०१ ॥

टीका—कर्मशब्देन गोत्रमेवाभिसम्बध्यते। हीनं नीचैर्गोत्रकर्मोदयात्, उत्तममुच्चैर्गोत्रकर्मोदयात्, मध्यमं व्यतिमिश्रकर्मोदयात्। मनुष्याणां तिरश्चां च त्रिविधमपि भवति 'तद्विधमेव तिरश्चाम्' इति वचनात्। 'जघन्योत्तममध्यमम्' इत्यर्थः। 'योनिविशेषान्तरविभक्तम्' इति—तिर्यग्योनिविभेदेन मनुष्ययोनिभेदेन च विभक्तं कृतविभागम्। विशेषास्तु तिरश्चामेकद्वित्रिचतुःपञ्चेन्द्रियाख्याः, मनुष्याणां सम्मूर्छनगर्भजातिविशेषाः। अन्तरशब्दोऽन्यत्वप्रतिपादनार्थः। इति कारिकार्थं विवृतम्॥ १०१ ॥

अर्थ—मनुष्योंमें नीचपना, उच्चपना और मध्यमपना कर्मके उदयसे होता है। तिर्यञ्चोंमें भी उसी तरह जानना चाहिए। अन्तर केवल इतना है कि दोनोंमें योनिके भेदसे भेद पाया जाता है।

भावार्थ—यहाँपर 'कर्म' शब्दसे गोत्रकर्म लिया जाता है। नीचगोत्रकर्मके उदयसे नीचपन होता है, उच्च गोत्रकर्मके उदयसे उच्चपन होता है और दोनों कर्मोंके उदयके मेलसे मध्यपन होता है। मनुष्य और तिर्यञ्चोंमें ये तीनों ही 'पन' पाये जाते है। इसमें तिर्यञ्चयोनि और मनुष्ययोनिके भेदसे भेद है। तिर्यञ्चोंके भेद एकेन्द्रिय, दोइन्द्रिय, तेइन्द्रिय, चौइन्द्रिय और पञ्चेन्द्रिय हैं, और मनुष्योंके संमूर्छनजन्मवाले, गर्भजन्मवाले आदि भेद हैं।

एवमुक्तेन न्यायेन हीनादिजन्मप्रतिपत्तिः कर्मोदयजनितेति महद्वैराग्यकारणम्, तथेदमपरं वैराग्यस्य निमित्तमाख्याति—

इस प्रकार उक्त रीतिसे नीच वगैरह जन्मोंको कर्मोंका फल जानकर महान् वैराग्य उत्पन्न होता है। अब वैराग्यके अन्य भी निमित्त बतलाते हैं —

देशकुलदेहविज्ञानायुर्बलभोगभूतिवैषम्यम् ।
दृष्ट्वा कथमिह विदुषां भवसंसारे रतिर्भवति ॥ १०२ ॥

१—सम्मूर्छन-फ०, ब०। २—प्रतीयते नैनैकत्वा आभाषा प्राज्ञमत्वम

टीका—देशो मगधाङ्गकलिङ्गादिरार्यः, शकयवनकिरातादिरनार्यः । कुलमिक्ष्वाकु-हरिवंशादिकम्, अपरं म्लेच्छदासचाण्डालादिकुलम् । सलक्षणावयवसन्निवेशविशेषो देहः, अपरः कुब्जहुण्डसन्निवेशादिः । विज्ञानं विशिष्टो बोधो जीवादिपदार्थविषयः, अपरः प्रकृष्टाज्ञानपरिगतः किञ्चिज्ज्ञ । दीर्घेणायुषा यथाकालविभागवर्तिना युक्तः, अपरस्तु गर्भकौमार्ययौवनावस्थादिषु अनियतायुः । बलं शारीरादि, तेन सम्पन्नो वीर्यवान्, अपरो दुर्बलः स्वशरीरकमपि कथञ्चिद् धारयति । भोगवाननेकेष्टशब्दादिसम्पदुपभोगसमर्थः, अपरो भोगरहितस्सतोऽपि च भोगानसमर्थो भोक्तुम् । हिरण्यसुवर्णधनधान्यादिविभूत्या युक्त एकः, अपरो दारिद्र्याभिभूतो जरदन्नी खण्ड-निवसनः एषां देशादीनां समृद्धिपर्यन्तानां वैषम्यं विषमतां विलोक्य कर्मोदयजनिताम्, कथं केन प्रकारेण, विदुषां बुद्धिमतां नरकादिभवसंसारे रतिः प्रीतिर्भवति ? इति कर्मोदयनिमित्तं शुभाशुभ-लक्षणं देशादि विज्ञाय उद्वेगः संसारात्कार्यः । तस्माद् धर्मानुष्ठानादर एव श्रेयान् इति ॥ १०२ ॥

अर्थ—देश, कुल, शरीर, ज्ञान, आयु, बल, भोग और विभूतिकी विषमता देखकर विद्वानोंको इस नरकादिरूप संसारमें कैसे रति होती है ?

भावार्थ—कोई मगध, अङ्ग, कलिङ्ग वगैरह आर्य देशमें जन्म लेता है। कोई शक, यवन, किरात वगैरह अनार्य देशमें जन्म लेता है। कोई इक्ष्वाकु, हरिवंश आदि उच्च कुलोंमें जन्म लेता है। कोई भिखारियों वगैरहके नीच कुलमें जन्मते हैं। किसीका शरीर शुभ लक्षण और शुभ अवयवोंसे युक्त है, और किसीका शरीर कुब्जक, हुंडक वगैरह संस्थानवाला है। किसीको जीवादि पदार्थोंका विशिष्ट ज्ञान है, और कोई बिल्कुल अज्ञानी है। किसीकी आयु खूब लम्बी और अपने समयपर पकनेवाली होती है, और कोई गर्भावस्थामें, अथवा कुमारावस्थामें अथवा भरजवानीमें ही मर जाता है। कोई बड़ा बली है और कोई बिल्कुल निर्बल है, कोई अनेक भोगोंको भोगनेमें समर्थ है और किसीके शक्ति होते हुए भी या तो भोगनेको भोग नहीं हैं या भोग-सामग्री होते हुए भी भोगनेकी शक्ति नहीं है। एक सोना-चाँदी, धन-धान्य वगैरह विभूतिसे युक्त है तो दूसरा गरीबीमें दिन काटता है। इस विषमताको देखकर विद्वान् मनुष्य संसारसे कैसे प्रीति कर सकता है ? उन्हें तो संसारसे वैराग्य ही करना चाहिए। अतः धर्म-कार्यमें चित्त लगाना ही हितकर है।

तथाऽपरं वैराग्यनिमित्तमादर्शयन्नाह—

वैराग्यके और भी निमित्त बतलाते हैं :

अपरिगणितगुणदोषः स्वपरोभयबाधको भवति यस्मात् ।
पञ्चेन्द्रियबलविबलो रागद्वेषोदयनिबद्धः ॥ १०३ ॥

टीका—गुणाश्च दोषाश्च गुणदोषाः, अपरिगणिता अनादृता गुणदोषाश्च येनासौ अपरिगणितगुणदोषः । प्रेक्षापूर्वकारी गुणान् दोषांश्च विचार्य गुणेषु प्रवर्तते, दोषान् परिहरति । यथानालोचितगुणदोषः स खलु स्वपरोभयबाधको भवति । स्वमात्मानं बाधतेऽपरञ्च बाधते।

१-जरदन्तीख-फ०, ब०। २-शाश्च अना-प०। ३-या येना-प०।

दोषप्रवृत्तावात्मानं बाधते, 'यथाऽयं प्रवृत्तस्तथाऽहमपि प्रवर्तयामि' इति परमपि बाधते। पञ्चेन्द्रियबलेन विबलो विगतबलः। 'पञ्चेन्द्रियबलेन महताऽभिभूतत्वादुन्मार्गयायिनाऽन्येन बलेन मार्गे प्रतिपादयितुमशक्यः' इति विबलः। रागद्वेषोदयेन निबद्धो नियमितः 'रागद्वेष परिणतः' इत्यर्थः ॥ १०३ ॥ यस्मादनालोचितगुणदोष एवंविधो भवति—

अर्थ—यतः पाँचों इन्द्रियोंके बलके आगे निर्बल हुआ और राग तथा द्वेषके उदयसे जकड़ा हुआ मनुष्य गुण और द्वेषका विचार नहीं करता और अपनेको, दूसरोंको तथा दोनोंको कष्ट देता है।

भावार्थ—सोच-विचार कर काम करनेवाला मनुष्य गुण और दोषका विचार करके गुणोंमें प्रवृत्ति करता है और दोषोंको छोड़ देता है। जो गुण-दोषका विचार नहीं करता, वह दोषोंमें प्रवृत्त होकर अपनेको कष्ट देता है। तथा उसकी देखा-देखी दूसरे लोग भी दोषोंमें प्रवृत्त होते हैं। अतः वह दूसरोंको भी पीड़ाका कारण होता है। तथा पाँचों इन्द्रियोंके जालमें वह ऐसा फँस जाता है कि प्रयत्न करनेपर भी उसे सुमार्गपर लाना कठिन होता है।

तस्माद् रागद्वेषत्यागे पञ्चेन्द्रियप्रशमने च।
शुभ परिणामावस्थितिहेतोर्यत्नेन घटितव्यम् ॥ १०४ ॥

टीका—यस्मादेवं तस्माद् यथा रागद्वेषयोरात्यन्तिकस्त्यागो भवति तथाऽनुष्ठेयम्। पञ्चेन्द्रियबलं यथा प्रशाम्यति-नोद्वृत्तशक्तिर्भवति तथा शुभपरिणामावस्थितिहेतोर्यत्नेन घटितव्यम्। शुभ एव परिणामो यथा देशकुलविज्ञानादिष्वाप्यते, शुभ परिणामावस्थाने यो हेतुः, तस्य हेतोः प्रयत्नेनावाप्तिर्यथा स्यात् तथा चेष्टितव्यमिति ॥ १०४ ॥

अर्थ—अतः शुभ परिणामोंकी स्थितिके लिए राग और द्वेषको त्यागनेमें तथा पाँचों इन्द्रियोंको शान्त करनेमें प्रयत्न करना चाहिए।

भावार्थ—यतः गुण-दोषका विचार न करनेवाले मनुष्यमें उक्त बुराइयाँ पाई जाती हैं। अतः ऐसा प्रयत्न करना चाहिए, जिससे राग और द्वेषका सर्वथा अभाव हो तथा पाँचों इन्द्रियोंकी शक्ति शान्त हो। और उसके लिए शुभ भावोंको प्राप्त करने तथा उन्हें बनाये रखनेका प्रयत्न करना चाहिए।

तत्कथमनिष्टविषयाभिकाङ्क्षिणा भोगिना वियोगो वै।
सुव्याकुलहृदयेनापि निश्चयेनागमः कार्यः ॥ १०५ ॥

१–तै पञ्चेन्द्रियबलेन महता–फ० ब०। २–स्यादिति। ३–तः विगतबलो राग–फ० ब०। ४–शुद्धस्–ब०। ५–वाप्यते–ब०। ६–स्थानस्य यो–ब०। ७–व्यमिताद्–फ० ब०।

टीका—'तत्कथं चेष्टितव्यम्' इत्याह—अनिष्टा विषया वक्ष्यमाणेन न्यायेन, तान् आकाङ्क्षति अभिलषति तेन अनिष्ट विषयाभिकाङ्क्षिणा, भोगिना भोगासक्तेन, 'कथमात्यन्तिको वियोगः स्यादेभिः सह' इति। वैशब्दः पादपूरणे। सुष्ठ्वप्याकुलहृदयेनापि बाढं व्यग्रहृदयेनापि सता। निश्चयेन यथावद् विज्ञाय एतानिह परत्र चापायबहुलान् शब्दादिविषयान्। आगमः कार्यः—आगमो भगवदर्हत्सर्वज्ञप्रणीतोऽभ्यासितव्यः कार्यः। ततश्चैषामात्यन्तिकः स्वात्मनि प्रलयो भवत्यनेनाभ्युपायेनेति ॥ १०५ ॥

अर्थ—(प्रश्न)—अनिष्ट विषयोंकी इच्छा करनेवाले भोगासक्त मनुष्यसे इन विषयोंका वियोग कैसे हो सकता है ? (उत्तर)—हृदयके अत्यन्त व्याकुल होनेपर भी इन विषयोंको जानकर आगमका अभ्यास करना चाहिए)

भावार्थ—पहले यह प्रश्न किया गया है कि जब मनुष्य भोगोंमें आसक्त है और रात-दिन भोगोंकी वाञ्छा करता रहता है तो वह उन विषयोंका त्याग कैसे कर सकता है ? बादमें उसका उत्तर दिया गया है कि भोगोंके लिए हृदयके आकुलित होनेपर भी पहले उसे भोगोंकी असलियतको जानना चाहिए, कि ये विषय इसलोक और परलोकमें दुःखदायी हैं। उसके बाद भगवान् अर्हन्तदेवके द्वारा उपदिष्ट आगमका अभ्यास करना चाहिए। इस उपायसे उन विषयोंकी इच्छा बिल्कुल नष्ट हो जाती है।

'कथं पुनरनिष्टा विषयाः' इत्याह—

विषय अनिष्ट क्यों हैं ? यह बतलाते हैं :—

आदावत्यभ्युदया मध्ये शृङ्गारहास्यदीप्तरसाः।
निकषे विषया बीभत्सकरुणलज्जाभयप्रायाः ॥ १०६ ॥

टीका—आदौ प्रथमं कुतूहलादुत्सुकतया अत्यभ्युदयान् उत्सवभूतान् मन्यते। उत्सव आगमिष्यतीति भवत्यानन्दश्चेतसि प्रथमम्। मध्ये विषयप्राप्तौ सत्यां शृङ्गारवेषाभरणकुच-कण्ठाश्लेषमुखचुम्बनकररुहक्षतप्रहारपरिहासप्रणयकोपादिमत्वाद् दीप्तरसाः। 'निकषे' इति—विशिष्टसंयोगोत्तरकालं विषयाः स्पर्शादयः प्रतिभान्ति बीभत्साः निर्वसनत्वात् प्रकट गुह्यवराङ्ग-विकृतदर्शनात्। करुणास्तु बहुविलापविस्वरक्वणनश्रवणात् करुणाश्रयत्वादनुकम्पापात्रत्वात्। परिसमाप्तप्रयोजना च त्वरिततरमाद्ग्ते त्रपावती निवसनादि बिभेति च गुरुजनादाशङ्कते 'मां मैवंविधामद्राक्षीत् कश्चित्' इति। एवमेते विषया बीभत्सकरुणलज्जाभयायासबहुलाः पर्यन्ते। मध्येऽप्युदिततीव्रमोहवेदनाः आरम्भेतु कुतूहलौत्सुक्यभावाच्च जातुचित्स्वास्थ्यमापादयन्तीति त्याज्याः ॥ १०६ ॥

अर्थ—ये विषय प्रारम्भमें उत्सवकी तरह हैं। मध्यमें शृङ्गार और हास्यसे रसको उद्दीप्त करते हैं। और अन्तमें बीभत्स, करुणा, लज्जा और भय वगैरहको करते हैं।

१–पूरणः–फ० ब०। २–वक्षःमुख–फ० ब०। ३–करनखक्षत–फ० ब०। ४–कठिर–मु०। ५–आन्व–फ० ब०। ६–मेऽ ति कु–फ० ब०। ७–बाः न–फ० ब०।

भावार्थ—प्रारम्भमें यह मनुष्य कुतूहलसे इन विषयोंको उत्सवोंकी तरह मानता है। अर्थात् जैसे किसी उत्सवकी सूचना मिलनेपर उससे आनन्द होता है वैसा ही आनन्द विषयोंकी प्राप्ति होनेसे पहले होता है। विषयोंके प्राप्त होनेपर शृंगार, वेद, अलङ्कार, हास्य, प्रेम-कोप और संभोगके अन्तमें छुटे हुए कानझोंको देखकर बड़ी ग्लानि होती है। नवोढ़ाके चीत्कारको स्मरण करके उसपर दया आती है। एक दूसरेको नग्न देखकर लज्जा होती है। उस अवस्थामें गुरुजनोंके देख लेनेपर भय लगा रहता है। इस प्रकार अन्तमें ये विषय ग्लानि, करुणा, लज्जा और भय वगैरहको उत्पन्न करते हैं। मध्यमें मोहकी तीव्र वेदनाको उत्पन्न करते हैं और आरम्भमें कुतूहल और उत्सुकता पैदा करते हैं। ये कभी भी मनुष्यको स्वस्थ नहीं होने देते। अतः छोड़नेके योग्य हैं।

'ननु च उपभुज्यमानः सुखलेशेनोपभोक्तारमनुगृह्णन्तो विषया' इत्यधिकारे पठति—

विषय-भोगसे मनुष्यको थोड़ा-बहुत सुख भी होता है, अतः विषय उपकारक हैं, इसका उत्तर देते हैं:—

यद्यपि निषेव्यमाणा मनसः परितुष्टिकारका विषयाः।
किंपाकफलादनवद्भवन्ति पश्चादतिदुरन्ताः॥ १०७॥

टीका—निषेव्यमाणा उपभुज्यमानाः क्षणमात्रं यद्यपि मनोहर्षं जनयन्ति तथापि पश्चाद् विपाककाले आपातरमणीया अपि सन्तः किंपाकफलभक्षणोपमाः किंपाकतरुफलानि हि रसनाग्रेणास्वाद्यमानानि स्वादूनि सुरभीणि च परिणतिकाले परासुतया योजयन्ति। अतो दुरन्ताः 'दुःखान्ता' इत्यर्थः॥ १०७॥

अर्थ—यद्यपि सेवन करते समय विषय मनको सुखकर लगते हैं, तथापि किंपाक वृक्षके फलके भक्षणके समान अन्तमें दुःखदायी होते हैं।

भावार्थ—किंपाक वृक्षके फल खानेमें बड़े स्वादिष्ट और सुगन्धित होते हैं; किन्तु पेटमें पहुँचते ही जहरका काम करते हैं। विषयोंको भी ऐसा ही जानना चाहिए।

तथाऽपरं निदर्शनमाह—

दूसरा उदाहरण देते हैं:—

यद्वच्छाकाष्टादशमन्नं बहुभक्ष्यपेयवत् स्वादु।
विषसंयुक्तं भुक्तं विपाककाले विनाशयति॥ १०८॥

टीका—शाकं तीमनमष्टादशं यस्य तद् शाकाष्टादशमन्नम्। बहुभक्ष्यं मोदकादि, पेयं पानकविशेषः सीधुप्रसन्नादि वा, तन्पेयं यत्रास्त्यन्न तत्पेयवदन्नम्। स्वादु-मधुरादिरसयुक्तं विषचूर्णमिश्रं भुक्तम् विपाककाले परिणतिसमये यथा विनाशयति॥ १०८॥

१—[illegible] २—[illegible] ३—[illegible] ४—[illegible] ५—[illegible] ६—[illegible] ७—[illegible]

तद्वदुपचारसंभृतरम्यकरागरससेविता विषयाः ।
भवशतपरम्परास्वपि दुःखविपाकानुबन्धकराः ॥ १०९ ॥

टीका—दार्ष्टान्तिकमर्थं दृष्टान्तेन समीकरोति 'तद्वत्' इति । उपचारः-चाटुकर्म विनयप्रतिपत्तिः, तेनोपचारेण संभृतं बहुकृतं रम्यकं रमणीयत्वमतिशयप्रीतिहेतुत्वम्, रागः स्नेहविशेषः, तस्य रसः-अतिशय, उपचारसंभृतरम्यकरागरसेन सेविता उपभुक्ता विषयाः शब्दादयः। सकृन्मरणकारित्वाद्. विपान्नदृष्टान्तं दूरीकरोति पश्चार्द्धेन—भवशतानां परम्पराः पद्धतयः सन्ततयः तासु दुःखेन विपाकेन अनुबन्धकरणशीला दुःखाविच्छेदकारिण इति ॥ १०९ ॥

अर्थ—जिस प्रकार अट्ठारह प्रकारके शाक और बहुतसे खाने योग्य और पीने योग्य स्वादिष्ट वस्तुओंसे युक्त स्वादिष्ट भोजन यदि विषैला हो तो उसके खानेसे अन्तमें मृत्यु होती है। उसी प्रकार खुशामद और विनय वगैरहसे बढ़ी हुई रमणीयता और अत्यन्त रागसे भोगे हुए विषय सैकड़ों भवोंकी परम्परामें भी दुःख-भोगकी परम्पराको करनेवाले होते हैं।

भावार्थ—विषय-भोग सुस्वादु विषैले भोजनके समान अन्तमें दुःखदायी होता है। विषैले भोजनके खानेसे तो एक ही बार मृत्यु होती है। किन्तु विषयोंके सेवनसे भव-भवमें कष्ट उठाना पड़ता है।

अपि पश्यतां समक्षं नियतमनियतं पदे पदे मरणम् ।
येषां विषयेषु रतिर्भवति न तान् मानुषान् गणयेत् ॥ ११० ॥

टीका—पश्यतामपि समक्षं प्रत्यक्षेण प्रमाणेन मरणं नियतकालमनियतकालञ्च। देवनारकाणां नियतकालमेव। अनियतकालं मनुष्याणां तिरश्चां च। पदे पदे स्थाने स्थाने नारकादिजन्मनि आर्यानार्यादिभेदे गोमहिष्यजाविकादिभेदे च। अथवा 'नियतम्' इति सर्वकालमेव, अनियतं मनुष्यतिरश्चामायुः सम्प्रतितनानाम्। एवमवगतानित्यायुः स्वरूपाणामपि येषां विषयेषु रतिं शक्तिर्भवति न तान् मानुषान् गणयेत् कुशलः। तिर्यञ्च एव हि ते निर्बुद्धिकत्वादिति ॥ ११० ॥

अर्थ—जगह-जगह नियत और अनियत मरणको प्रत्यक्ष देखते भी जिनकी विषयोंमें आसक्ति है, उन्हें मनुष्योंमें नहीं गिनना चाहिए।

भावार्थ—मरण दो तरहका होता है—एक नियत काल और दूसरा अनियत काल। देव और नारकोंका मरण नियत कालमें ही होता है; क्योंकि उनकी अकाल मृत्यु नहीं होती। तथा अनियत काल मरण मनुष्य गति और तिर्यञ्च गतिमें होता है। सभी गतियोंमें मृत्यु प्रत्यक्ष है। संसारमें ऐसा कोई भी स्थान नहीं है, जहाँ मृत्यु न होती हो। अथवा दूसरा अर्थ ऐसा भी कर सकते हैं कि मरण

१–रसो विषय उप-प० । २–रम्यकः राग-प० । ३–वा प० । ४–त्वगतानामपि येषां, फ०, ब०, । ५–भेदेन दि, फ० ब० ।

सर्वदा ही अनियत है; क्योंकि आयु प्रत्येक समयमें क्षय हो रही है। और यह बात हम अपने सामनेके मनुष्यों और तीर्थङ्करोंमें प्रत्यक्ष देखते हैं। तो भी आयुको अनित्य जानकर भी जो विषयोंमें फँसे हुए हैं; उन्हें मनुष्य नहीं समझना चाहिए। नासमझ होनेके कारण वे पशु ही हैं।

विषयपरिणामनियमो मनोऽनुकूलविषयेष्वनुप्रेक्ष्यः।
द्विगुणोऽपि च नित्यमनुग्रहोऽनवद्यश्च संचिन्त्यः॥ १११॥

टीका—मनोऽनुकूला ये विषया इष्टाः शब्दादयस्तेषां विषयाणां परिणामोऽनुप्रेक्ष्यः-चिन्तनीय आलोचनीयः। इष्टपरिणामाः सन्तोऽनिष्टपरिणामा भवन्ति, अनिष्टपरिणामाश्चाभीष्टपरिणामा भवन्ति, नावस्थितः कश्चिन् परिणामोऽस्ति। एवञ्चानवस्थितपरिणामविषयविरतौ सत्यामनुग्रहो द्विगुणोऽनवद्यश्च संचिन्त्यः। अनुग्रहः—गुणयोगः, स च द्विगुणः। बहुगुण एव द्विगुण उक्तः, द्विशब्दस्योपलक्षणत्वात्। अनवद्यश्चासौ पापबन्धाभावात् इत्यनुप्रेक्ष्यः॥१११॥

अर्थ—मनके अनुकूल विषयोंमें विषयोंके परिणामके नियमका बारम्बार चिन्तन करना चाहिए और सर्वदा निर्दोष तथा बहुगुणयुक्त लाभका विचार करना चाहिए।

भावार्थ—मनको प्रिय लगनेवाले विषयोंके भावी परिणामका विचार करना चाहिए। अर्थात् अच्छे लगनेवाले विषय कालान्तरमें बुरे लगते हैं, और बुरे लगनेवाले विषय कालान्तरमें अच्छे लगने लगते हैं। उनका कोई परिणाम सर्वदा नहीं रहता। अतः अस्थिर परिणामवाले विषयोंसे विरक्ति होनेपर आत्माका बड़ा भारी दोष रहित कल्याण होता है। क्योंकि विषयोंसे विरक्ति होनेपर पापकर्मका बन्ध नहीं होता। अतः उस लाभका सर्वदा विचार करते रहना चाहिए।

इति गुणदोषविपर्यासदर्शनाद्विषयमूर्छितो ह्यात्मा।
भवपरिवर्तनभीरुभिराचारमवेक्ष्य परिरक्ष्यः॥ ११२॥

टीका—इति इत्थं गुणान् दोषरूपेण यः पश्यति दोषांश्च गुणरूपेण प्रेक्षते, विपर्यासदर्शनाद् वैपरीत्यं बुद्ध्यते। विषयेषु शब्दादिषु मूर्छितः—तन्मयतां गतो य आत्मा। भवः संसारः, तत्र परिवर्तनं नरकादिषु जन्ममरणप्रबन्धः, तस्माद् बिभ्यद्भिः आचारमवेक्ष्य प्रथमाङ्गार्थमनुचिन्त्य परिरक्ष्यः परिपालनीय इति॥ ११२॥

अर्थ—इस प्रकार गुण और दोषमें विपरीत दर्शन होनेसे यह आत्मा विषयोंमें आसक्त हो रहा है। संसार-भ्रमणसे डरनेवाले भव्य जनोंको आचारका अनुशीलन करके उसकी रक्षा करनी चाहिए।

भावार्थ—यह आत्मा गुणोंको दोषरूपसे देखता है और दोषोंको गुणरूपसे देखता है। इस विपरीत दर्शनसे [illegible] हो रहा है [illegible] गतियोंमें [illegible] करने [illegible] हैं उन्हें आचारके [illegible] करके अपनी आत्माकी रक्षा करनी चाहिए

१—गुण एव उ-फ० प०

'स चाचारार्थः पञ्चप्रकारः' इति दर्शयति समासेन—

उस आचारके पाँच भेद हैं। संक्षेपमें उन्हें बतलाते हैं :—

सम्यक्त्वज्ञानचारित्रतपोवीर्यात्मको जिनैः प्रोक्तः।
पञ्चविधोऽयं विधिवत् साध्वाचारः समनुगम्यः॥ ११३ ॥

टीका—तत्र तत्त्वार्थश्रद्धानलक्षणः सम्यक्त्वाचारः। तदुपगृहीतो मत्यादिज्ञानपञ्च काचारः। अष्टविधकर्मचयरिक्तीकरणाच्चारित्राचारः। तयोर्द्वादशभेदमनशनादि तप आचारः। वीर्यमात्मशक्तिर्वीर्याचारः। एवमेव पञ्चप्रकार आचारः प्रथमाङ्गार्थः तीर्थकृद्भिरर्थतोऽभिहितः तच्छिष्यैश्च सूत्रीकृतः, विधिवत् समनुगम्यः-विज्ञेयः। कः पुनर्विधिः? सूत्रग्रहणविधिस्तावद् ष्टमयोगादिः, अर्थग्रहणविधिरनुयोगप्रस्थापनादिः। साधूनामाचारः साध्वाचारः-अहोरात्राभ्यन्तरेऽनुष्टेयः क्रियाकलाप इति॥ ११३॥

अर्थ—जिन भगवान्ने सम्यक्त्व, ज्ञान, चारित्र, तप और वीर्यरूपसे सम्यक्त्वके पाँच भेद कहे हैं। साधुओंके इस आचारको विधिवत् जानना चाहिए।

भावार्थ—तत्त्वार्थका श्रद्धान करना सम्यक्त्वाचार है। सम्यक्त्वाचारसे युक्त पाँच ज्ञान ज्ञानाचार हैं। आठ प्रकारके कर्मोंको नष्ट करनेवाला चारित्राचार है। अनशन वगैरहके भेदसे बारह प्रकारका तप तपाचार है। आत्माकी शक्ति वीर्याचार है। इस प्रकार तीर्थङ्करदेवने आचाराङ्गमें पाँच आचारोंका अर्थरूपसे कथन किया है। उनके शिष्य गणधरदेवोंने उसे सूत्ररूपमें निबद्ध किया है। साधुओंके इस आचारको दिन-रातमें की जानेवाली क्रियाओंको विधिपूर्वक जानना चाहिए।

विभक्तस्याप्याचारस्य पञ्चधा नवब्रह्मचर्यात्मकैर्ाध्ययनार्थाधिकारद्वारेण पुनर्लेशोद्देशतोऽर्थमाचष्टे समासेन—

इस प्रकार आचाराङ्गके आधारपर आचारके सामान्यसे पाँच भेद कहे हैं। उस आचाराङ्गके प्रथम श्रुतस्कन्धमें नौ अध्ययन हैं। अतः अब उनके आधारपर आचारके नौ भेद संक्षेपसे कहते हैं :—

षड्जीवकाययतनालौकिकसन्तानगौरवत्यागः।
शीतोष्णादिपरीषहविजयः सम्यक्त्वमविकम्पम्॥ ११४॥
संसारादुद्वेगः क्षपणोपायश्च कर्मणां निपुणः।
वैयावृत्योद्योगः तपोविधिर्योषितां त्यागः॥ ११५॥

टीका—शास्त्रपरिज्ञायां षड् जीवनिकायाः पृथिव्यप्तेजोवायुवनस्पतित्रसाख्याः। तत्रादौ जीवास्तित्वप्रतिपादनं सामान्येन, ततः पृथिव्यादिकायस्वरूपप्ररूपणम्। तद्वधान् संसारहेतुः

१-आच चा-फ., ब.। २-करयाग्र-फ., ब.।

कर्मबन्धः। तद्वधविरतिश्च मनोवाक्कायैः कृतकारितानुमतिपरिहाराद् इति। षट्सु जीवनिकायेषु यतना प्रयत्नस्तद्रक्षणे ज्ञानपूर्वको व्यापार इति । लोकविजये लौकिकसन्तानगौरवत्यागः-। लौकिकसन्तानो मातृपित्रन्वयः शेषाश्च स्वजनसम्बन्धिनः पत्नी पुत्रादयः, तेषु गौरवम्-आदरः स्नेहासक्तिः, तत्त्यागः । तथा क्रोधमानमायालोभकषायविजयो विधेयो बलवता क्षमादिना बलेन । शीतोष्णीयाध्ययने शीतोष्णादिपरीषहविजयः-क्षुत्पिपासादिपरीषहद्वाविंशतेर्विजयः-अभिभवः । तत्र स्त्रीसत्कारपरीषहौ भावतः शीतौ विंशतिरुष्णाः शेषाः। सम्यक्त्वाध्ययने शङ्कादिशल्यशुद्धं तत्त्वार्थश्रद्धानलक्षणं सम्यग्दर्शनमविकम्प्यं दृढं निश्चितं वर्ण्यते॥ ११४॥

लोकसाराध्ययने-'लोकसार' इति अन्वर्थनाम आदिपदेनावर्तिरिति । तत्र संसारादुद्वेगः हिंसादिप्रवृत्तो न मुनिः तद्विरतोमुनिरकिञ्चनः कामभोगेपूद्विग्नोऽनेकदोषदर्शनात्। धर्मज्ञोऽयं संयमनिर्वाणाख्यं लोकसारमवेक्ष्यमाणः ससहायो मार्गमेवापरित्यजन् सारमेवासादयति लोकस्येति। धूताध्ययने स्वजनमित्रकलत्रपुत्रादिनिरपेक्षता. तद्विधूननं तत्परित्यागः कर्मणाञ्च ज्ञानावरणादीनां विधूननोपायः, श्रुतज्ञानानुसारिक्रियानुष्ठानं शरीरोपकरणत्यागश्चेति। महापरिज्ञायां मूलोत्तरगुणान् परिज्ञाय यथावद्वेत्य मन्त्रतन्त्राकाशगतिलब्धिशून्यजीवनम्। प्रत्याख्यान परिज्ञायाञ्च प्रत्याख्येयोकर्तव्यानि व्यावृत्तेन सदा ज्ञानदर्शनचरणेषूद्युक्तेन भवितव्यमिति तदाह-वैयावृत्त्योद्योगः। विमोक्षयतनाध्ययने श्रावकाणां देशविमोक्षः साधूनां सर्वविमोक्षः क्षीणकर्मणां मुक्तानामात्मनोऽपि स्वजनितैरेव कर्मभिर्बद्धस्य सकलकर्मांश-वियोगो मोक्षः सप्रपञ्चो भक्तप्रत्याख्यानेङ्गिनीपादपोपगमनमरणैः सह वर्ण्यते। तपोविधिः प्राधान्याद् गृहीतः। उपधानश्रुते

भगवता श्रीवर्द्धमानस्वामिना स्वानुष्ठिततपोऽध्यावर्णनं योषित्त्यागो ब्रह्मचर्यादिलक्षणं कृतम्। एवमाचारो नवाध्यायनात्मकोऽर्थतो विभक्तः॥ ११५॥

अर्थ—छह जीवकायोंकी रक्षा करना, कुटुम्बी जनोंमें ममत्वका त्याग, शीत-उष्ण वगैरह परीषहोंको जीतना, निश्चल सम्यक्त्व, संसारसे घबराहट, कर्मोंके क्षय करनेका कुशल उपाय, वैयावृत्यमें तत्परता, तपकी विधि और स्त्रियोंका त्याग-ये आचारके नौ भेद हैं।

भावार्थ—शस्त्रपरिज्ञा नामके पहले अध्ययनमें प्रारम्भमें सामान्यसे जीवके अस्तित्वका कथन किया है। उसके बादमें पृथिवीकाय, अप्काय, तेजकाय, वायुकाय, वनस्पतिकाय और त्रसकायका वर्णन किया है। उनका घात करनेसे संसारका कारण-कर्मबन्ध होता है। अतः मन, वचन, काय और कृत, कारित, अनुमोदनासे उनके वधका त्याग करके उनकी रक्षाका प्रयत्न करना चाहिए। लोकविजय नामके दूसरे अध्ययनमें मातृवंश, पितृवंश और पत्नी-पुत्र वगैरहमें आसक्तिके त्यागका कथन है। तथा

१-तद्वधविरतिश्चे-ब　　२-प्रयत्न: त-मु०　　३-पुं मा-मु०　　४-ष्णी तेष-फ०, ब०।
५-स नह-ब०　　६-संयमाख्य-मु०　　७-नेव स्वनिर्दत्ते मु०,-नैवैरनिवर्द फ०, ब०।　　८-तत्त्वमार्ग-फ०, ब०।　　९-न च धून-फ०, ब०　　१०-स०दे -फ० ब०　　११-ख्यान परिहार्या-मु०,-ख्यान कृत-ब०　　१२-निर्देत्स्व फ०, ब०

क्षमा वगैरहके द्वारा क्रोध, मान, माया और लोभ कषायको जीतनेका विधान है। शीतोष्ण नामके तीसरे अध्ययनमें भूख-प्यास, गर्मी-सर्दी वगैरह बाईस परीषहोंके जीतनेका कथन है। सम्यक्त्व नामके चौथे अध्ययनमें शंका आदि दोषोंसे रहित तत्त्वार्थका श्रद्धानरूप निश्चल सम्यग्दर्शनका वर्णन है। लोकसार नामक पाँचवें अध्ययनमें संसारसे उद्वेगका कथन है। क्योंकि जो हिंसा वगैरहमें लगा हुआ है, वह मुनि नहीं है। किन्तु जो हिंसा वगैरहमें अनेक दोष देखकर उनसे विरक्त हो जाता है तथा काम भोगसे विरक्त और अपरिग्रही होता है, वह मुनि है। लोकसारको देखनेवाला मुनि कुमार्ग छोड़कर लोकके सारको ग्रहण करता है। धूत नामके छठे अध्ययनमें कुटुम्बी, मित्र, स्त्री, पुत्र वगैरहसे निरपेक्ष रहनेका, उनके परित्यागका, ज्ञानावरणादिक कर्मोंके क्षय करनेके उपायका, श्रुतज्ञानके अनुसार आचरण करनेका और शरीर तथा उपकरणोंके त्यागनेका वर्णन है। महापरिज्ञा नामके सातवें अध्ययनमें मूल और उत्तरगुणोंको भलीभाँति जानकर मन्त्र तन्त्र तथा आकाशगामी ऋद्धिके प्रयोग न करनेका विधान है। और प्रत्याख्यानपरिज्ञामें त्यागने योग्य वस्तुओंका त्याग करके विरक्त होकर ज्ञान, दर्शन और चरित्रमें सदा तत्पर रहनेका विधान है। इसे ही वैयावृत्यमें तत्पर कहा जाता है।[1] विमोक्षयतना नामके आठवें अध्ययनमें श्रावकोंके एकदेश मोक्षका और साधुओंके सर्वदेश मोक्षका वर्णन है। अर्थात् श्रावकोंके एकदेशसे कर्मोंका क्षय होता है। अतः उनका एकदेशसे मोक्ष कहा जाता है, और मुनियोंके समस्त कर्म छूट जाते हैं। अतः उनका सर्वदेशसे मोक्ष कहा जाता है। कर्मोंसे मुक्त होने ही का नाम मोक्ष है। भक्तप्रत्याख्यान, इंगिनी और पादपोपगमन मरणके साथ मोक्षका विस्तारसे वर्णन किया गया है। प्रधान होनेसे तपोनिधिका ग्रहण किया है। उपधानश्रुत नामक नौवें अध्ययनमें भगवान् वर्धमानस्वामीके तपका वर्णन है और स्त्रियोंके त्यागरूप ब्रह्मचर्यका विधान है। इस प्रकार नौ अध्ययनोंके आधारपर आचारके नौ भेद किये गये हैं।

सम्प्रति आचाराङ्गेषु अध्ययननवकाद्याकृष्टेषु विस्तरचितेष्वधिकारौ वर्ण्यन्ते—

अब आचाराङ्गके नौ अध्ययनोंसे लेकर विस्तारपूर्वक रचे गये द्वितीय श्रुतस्कन्धकी प्रथम चूलिकाके अधिकारोंका वर्णन हैं:—

विधिना भैक्ष्यग्रहणं स्त्रीपशुपण्डकविवर्जिता शय्या।
ईर्याभाषाम्बरभाजनैषणाग्रहाः शुद्धाः ॥ ११६ ॥

टीका—पिण्डैषणाध्ययने उद्गमोत्पादनैषणादोषवर्जितो भिक्षासमूहो ग्राह्यः।[2] शय्या प्रतिश्रयः, तत्र स्त्रीपशुपण्डकविवर्जिते स्थाने स्थातव्यम् 'मूलोत्तरगुणशुद्धा शय्या ग्राह्या' ईर्याध्ययने भिक्षाचंक्रमणादिक्रियाप्रवृत्तः[3] शनैः शनैः पुरस्ताद् युगमात्रनिरुद्धदृष्टिः[4] स्थावराणि जङ्गमानि च सत्वानि परिक्षन्[5] व्रजतीति। भाषाजाताध्ययने वाक्यमात्मपराविरोध्यालोच्य[6]

१—सम्यग्ज्ञानी मुनियोंकी सेवामें तत्पर रहना भी ज्ञान और चारित्रमें ही तत्पर रहना है, क्योंकि वे ज्ञानादिकके साधन हैं। २–ग्राह्येषु मु०। ३–मण्वहे–प०। ४–मिश्रणं प्र–प०। ५–क्षामा–प०। ६–यभ्नेः पु–फ० प०।

वाच्यमिति । वस्त्रैषणाध्ययने मूलोत्तरगुणशुद्धं लक्षणयुक्तं वासः समादेयमल्पपरिकर्मादि । पात्रैषणायामपि चोद्गमादिविशुद्धपात्रग्रहणमलाब्वादि यथोक्तमादेयम् । अवग्रहप्रतिमाध्ययनेऽवग्रहो देवेन्द्रराजगृहपतिशय्यातरसाधर्मिकाणां पञ्चधा। सर्वथा सर्वतः परिमितोऽवग्रहो याच्यो यत्र भाजनक्षालन प्रश्रवणपुरीषोत्सर्गस्वाध्यायस्थानयुक्तोऽवग्रहो योग्यः । इति प्रथमचूला समाध्ययनपरिमाणेयम् ॥ ११६ ॥

अर्थ—विधिपूर्वक भिक्षाग्रहण, स्त्री, पशु, और पण्डक (नपुंसक)से रहित शय्या, ईर्याशुद्धि, भाषाशुद्धि, वस्त्र भूषण शुद्धि, और अवग्रहशुद्धि, ये प्रथम चूलिकाके सात अध्ययनोंके नाम हैं।

भावार्थ—पिण्डैषणा नामके अध्ययनमें उद्गम, उत्पादन और एषणा दोषसे रहित भिक्षा ग्रहण करनेका विधान है। दूसरे शय्यैषणा नामक अध्ययनमें स्त्री, पशु और पण्डक (नपुंसक)से रहित स्थानमें ठहरनेका विधान है। ईर्याध्ययनमें कहा है कि जब साधु भिक्षा लेने वगैरहके लिए गमन करता है तो आगे एक युगमात्र (चार हाथ) पृथिवीको देखकर, त्रस और स्थावर जीवोंकी रक्षा करता हुआ धीरे-धीरे गमन करता है। भाषा अध्ययनमें अपने और दूसरोंके अविरुद्ध सोचकर बोलनेका विधान है। वस्त्रैषणा नामके अध्ययनमें मूलगुण और उत्तरगुणोंकी शुद्धताके अनुरूप ऐसे वस्त्र लेनेका विधान है, जिसमें कम आरम्भ हो। पात्रैषणा नामके अध्ययनमें भी उद्गमादि दोषोंसे रहित पात्र लेनेका कथन है। अवग्रह मिल्कियतको कहते हैं। उसके पाँच भेद हैं, लोकके मध्यमें सुमेरु पर्वतके नीचे स्थित आठ मध्य प्रदेशोंसे लेकर आधा दक्षिण भाग देवेन्द्रकी मिल्कियत है। भरत वगैरह क्षेत्र चक्रवर्ती राजाकी मिल्कियत है। गाँव, खेत (खेत), उद्यान, पहाड़, गुफा वगैरह उस स्थानके मालिक जागीरदारकी मिल्कियत है। जिस गृहस्थके घरमें ठहरना हो उस गृहस्थके घर वगैरह उस गृहस्थकी मिल्कियत है। और जिस स्थानमें समानधर्मी अन्य साधु वगैरह ठहरे हों, वह स्थान उन साधुओंकी मिल्कियत है। इन मालिकोंसे ठहरनेके लिए परिमित स्थानकी याचना करना चाहिए। वह स्थान इतना हो कि उसमें बर्तन धोने, मल-मूत्र त्यागने और स्वाध्याय वगैरह करने की सुविधायें हों।

सम्प्रति द्वितीयचूलासमाध्ययनानि सप्तकाभिधानानि, तत्रांधिकाराः—

अब सात सप्तकी द्वितीय चूलिकाके अधिकारोंको कहते हैं—

स्थाननिषद्याव्युत्सर्गशब्दरूपक्रियाः परान्योन्याः ।
पञ्चमहाव्रतदार्ढ्यं विमुक्तता सर्वसङ्गेभ्यः ॥ ११७ ॥

टीका। प्रथमाध्ययनं स्थान कायोत्सर्गादि [illegible] । द्वितीयाध्ययनं निषद्यास्थानं [illegible] तृतीयाध्ययनं [illegible] व्युत्सर्ग- [illegible] पञ्चमाध्ययनं

[illegible]

नानाविधरूपदर्शनेन रागद्वेषपरित्यागः कार्यः। सर्वत्र क्रियाशब्देनाभिसम्बन्धः-'स्थानक्रिया निषद्याक्रिया' इत्यादि। षष्ठे परक्रियानिषेधः-प्रयत्नवतस्तपसि प्रवृत्तस्य निष्प्रतिकर्मशरीरस्य परो यदुपकरोति संस्करोति तदयुक्तम्। सप्तमाध्ययनेऽन्योन्यक्रिया परस्परक्रिया साऽपि निष्प्रतिकर्मवपुषो न युज्यत इति। तृतीयचूला भावना। तत्राप्रशस्तभावनां विहाय प्रशस्तभावना दर्शनज्ञानचरणतपोवैराग्यादिका भाव्या एकैकमहाव्रतभावनाश्च पञ्च पञ्च महाव्रतदार्ढ्यार्थमिति। 'विमुक्तता सर्वसङ्गेभ्यः' इति चतुर्थचूलिकायां विमुक्ताध्ययने कर्मणो विमुक्तिरदेशतो देशतो वापि चिन्त्यते-यावन्तः केचित् सङ्गास्तेभ्यो विमुक्तिरिति। निशीथाध्ययनं पञ्चमी चूला, चतसृषु चूलासु योऽतिचारस्तद्विशुद्ध्यर्थं प्रायश्चित्तदानं तत्रेति ॥ ११७ ॥

अर्थ—स्थानक्रिया, निषद्याक्रिया, व्युत्सर्गक्रिया, शब्दक्रिया, रूपक्रिया, परक्रिया, और अन्योन्यक्रिया [illegible] और समस्त परिग्रहका त्याग—ये नौ अध्ययनोंके नाम हैं।

भावार्थ—पहले अध्ययनमें कायोत्सर्गके योग्य स्थानका वर्णन है। दूसरे अध्ययनमें स्वाध्याय करनेके योग्य स्थानका वर्णन है। तीसरे अध्ययनमें मल-मूत्रके त्यागने योग्य स्थानका वर्णन है। चौथे अध्ययनमें सुनाई पड़नेवाले शब्दोंमें राग और द्वेषके त्यागनेका वर्णन है। पाँचवें अध्ययनमें दिखाई पड़नेवाले अनेक प्रकारके रूपोंमें राग और द्वेषके त्यागनेका वर्णन है। छट्ठे अध्ययनमें परक्रियाका निषेध किया है। अर्थात् तपस्यामें लगे हुए साधुको गृहस्थ वगैरहके द्वारा की गई सेवा-शुश्रूषाकी इच्छा करना उचित नहीं है। सातवें अध्ययनमें साधुओंके लिए परस्परमें एक दूसरेकी परिचर्या करनेको अनुचित बतलाया है। द्वितीय चूलिकामें ये सात अध्ययन हैं। तीसरी चूलिकाका नाम भावना है। साधुको अशुभ भावनाओंको छोड़कर दर्शन, ज्ञान, चारित्र, तप वगैरहकी शुभ भावनाएँ भानी चाहिए। एक एक महाव्रतकी पाँच पाँच भावनाएँ होती हैं। उनके भानेसे पाँच महाव्रत दृढ़ होते हैं। चौथी चूलिका विमुक्ताध्ययनमें एकदेश अथवा सर्वदेशसे कर्मोंसे मुक्त होनेका विचार किया गया है। अर्थात् जो कुछ परिग्रह है, उससे मुक्त होनेका उसमें वर्णन है। पाँचवीं चूलिकाका नाम निशीथाध्ययन है। उसमें चार चूलिकाओंमें जो अतिचार लग जाते हैं उनकी विशुद्धिके लिए प्रायश्चित्त देनेका वर्णन है।

साध्वाचारः सम्यगयमष्टादशपदसहस्रपरिपठितः ।
सम्यगनुपाल्यमानो रागादीन् मूलतो हन्ति ॥ ११८ ॥

टीका—सर्वोऽयं साध्वाचारः-साधुशब्दोऽत्र [illegible] अष्टादशपदसहस्रपरिमाणतः [illegible] परिपठितः। यत्र [illegible]। सम्यग् [illegible] अनुपाल्यमानः-अनुपाल्यमानो रागद्वेषमोहान् [illegible] मूलतो हन्ति। [illegible] ॥ ११८ ॥

[illegible]

अर्थ—इस प्रकार अठारह हजार पदोंके द्वारा कहे गये साधुओंके आचारके विधिपूर्वक पालन करनेसे रागादिकका मूलसे नाश हो जाता है।

भावार्थ—जो साधु शीलके अठारह हजार भेदोंका विधिवत् पालन करता है और इनमें तनिक भी दोष नहीं लगने देता, उसका राग जड़से नष्ट हो जाता है।

आचाराध्ययनोक्तार्थभावनाचरणगुप्तहृदयस्य ।
न तदस्ति कालविवरं यत्र क्वचनाभिभवनं स्यात् ॥ ११९ ॥

टीका—आचाराध्ययनम्-आचाराङ्गम्, तत्रोक्तो योऽर्थस्तत्र भावना वासनाभ्यासः षड्जीवनिकाययतनादिका तदाचरणेन च गुप्तहृदयस्य मूलोत्तरगुणैर्गुप्तमनस्कस्य तदनुष्ठानव्यग्रस्य 'किं भवति' इत्याह—न तदस्ति कालविवरं कालछिद्रं क्वचन कश्चित्। यत्र छिद्रेऽभिभूयेत कषायप्रमादविकथादिभिरनाचारिभिरिति ॥ ११९ ॥

अर्थ—आचारांगके अध्ययनोंमें जो आचार कहा गया है, उसके भावनापूर्वक आचरणसे जिसका हृदय सुरक्षित है, कालका ऐसा एक भी क्षण नहीं है, जिसमें रागादिक उसे दबा सकें।

भावार्थ—जो आचारांगमें कहे गये आचारोंका हृदयसे पालन करता है, वह कभी भी रागादिकके वशीभूत नहीं होता।

'तथा आचारार्थव्यग्रस्य न काचिद्दुर्मतिर्मुक्तिपरिपन्थिनी साधोर्भवति' इत्याह—

अब यह बतलाते हैं कि जिसका मन आचारमें रम जाता है, उस साधुको कभी भी मुक्तिकी बाधक कुबुद्धि उत्पन्न नहीं होती:—

पैशाचिकमाख्यानं श्रुत्वा गोपायनं च कुलवध्वाः ।
संयमयोगैरात्मा निरन्तरं व्यापृतः कार्यः ॥ १२० ॥

टीका—केनचिद् वणिजा मन्त्रबलेन पिशाचको वशीकृतः। पिशाचकेनोक्तम्—'ममाज्ञादानमनवरतं कार्यम्। यदैवादेशं न लभे तदैवाहं भवन्तं विनाशयामि' इति। प्रतिपन्नञ्च वणिजा, आज्ञा च दत्ता। गृहकरणधनधान्यानयनकनकरत्नादिविभूतिरिष्टा यथेच्छं वणिजः सम्पादिता पिशाचकेन। पुनश्चाज्ञा मार्गिता। वणिजाऽभिहितम्—'दीर्घतमं वंशमानीय गृहाङ्गणे निखाय आरोहणमवरोहणञ्च कुर्वीथास्तावद्यावदन्यस्याज्ञादानस्यावकाशो भवति' इति। न चास्मिन् छिद्रं किञ्चिद् वणिजो यत्राभिभवः स्यादिति। साधोरप्यहोरात्राभ्यन्तरानुष्ठेयासु क्रियासु वर्तमानस्य नास्ति छिद्रं विस्रोतसागमनमिति

अपरा कुलवधूः स्वपत्यावप्रवसति केनचिद् विटेन दृष्टा प्रार्थिता परिभोगम् प्रतिपन्नञ्च तया।

[illegible]

श्वश्वा श्वश्रा चविज्ञाय तदभिप्रायं सर्वत्र गृहव्यापारे नियुक्ता । प्रातरेव गृहप्रमार्जनगोमुत्रकरणमाण्डप्रक्षालनाधिश्रयणरन्धनपरिवेषणमार्जनमार्जनोपलेपनखण्डनद्दलनपादप्रक्षालनाभ्यङ्गनानेककार्यव्यग्रा कृच्छ्रेण निद्रामासादयति । तस्याः सुदूरादेव विटप्रार्थना कथा व्यपेता । साधोरप्याचार-व्यग्रस्य विस्मरत्येवान्या विषयादिकथेति । अतः संयमयोगैरात्मा निरन्तरं व्यापृतः कार्यः-संयमः सप्तदशभेदः, तद्विषया योगव्यापाराः, तैरात्मा व्यापृतो व्यग्रः कार्य इति ॥ १२० ॥

अर्थ—पिशाचकी कथा और कुलवधूके रक्षणको सुनकर आत्माको सर्वथा संयमके पालन करनेमें लगाये रहना चाहिए।

भावार्थ—किसी बनियेने मंत्र-बलसे एक पिशाचको वशमें कर लिया। पिशाचने कहा—मुझे सदा कोई न कोई काम करनेकी आज्ञा देते रहना चाहिए। जभी मुझे आज्ञा नहीं मिलेगी, तभी मैं आपको मार डालूँगा। बनियेने यह बात मान ली, और उसे घर तैयार करने, उसमें धन-धान्य लाकर रखने तथा सोना-चाँदी वगैरहसे भरपूर करनेकी आज्ञा दी। पिशाचने उसका पालन किया और फिर आज्ञा माँगी। बनिये ने कहा—एक खूब लम्बा बाँस लाकर उसे घरके आँगनमें गाड़ दो और जबतक मैं दूसरी आज्ञा न दूँ तबतक उसपर चढ़ो और उतरो। ऐसा करनेसे पिशाचको कोई ऐसा अवसर नहीं मिल सका, कि वह बनियेके प्राण ले सके। इसी प्रकार जो साधु दिन-रातके अन्दर आचरण करनेके योग्य क्रियाओंके पालनमें तत्पर रहता है, वह कभी भी प्रमाद वगैरहके वशीभूत नहीं होता।

दूसरी कथा एक कुलवधूकी है। किसी दुराचारीकी दृष्टि एक लावण्यवती सुन्दरीपर पड़ी। उसने उससे संयोगकी प्रार्थना की। वधूने उसे स्वीकार कर लिया। उसकी सासको जब यह बात मालूम हुई तो उसने बहूको घरके काम-धाममें लगा दिया। बेचारी बहू सुबह उठते ही घरमें झाड़ देती थी, उसके बाद गायोंको सानी करती थी, उसके बाद बर्तन मलती-धोती थी, फिर रसोई बनाती थी। जब घरके सब लोग भोजन कर लेते थे तो फिर बर्तन मलती थी। घर लीपती थी, धान्य वगैरह कूटती थी, इसके बाद पीसती थी, सासको तेल लगाती थी। इत्यादि अनेक कामोंमें दिन-रात लगी रहती थी। उसको सोनेका समय भी कठिनतासे मिल पाता था। इस प्रकार घरके काममें फँस जानेके कारण वह उस दुराचारी मनुष्यकी बात ही भूल गई। इसी प्रकार जो साधु अपने आचारके पालनमें दिन-रात लगा रहता है, उसे विषय वगैरहकी कथा भूल ही जाती है। अतः आत्माको सदैव संयमके व्यापारमें लगाये रखना चाहिए।

'इत्थं लिङ्गिक्रियानुष्ठानव्यग्रं नेन्द्रियेषु भोगकारणेषु भावयेदनित्यताम्' इत्यादि—

इस प्रकार जो साधु शास्त्रविहित क्रियाओंके पालनमें तत्पर रहता है, उसे इस लोक सम्बन्धी अनेक कार्योंमें अनित्यताका विचार करना चाहिए, यह कहते हैं।—

१—[illegible] । २—[illegible] । ३—[illegible] । ४—[illegible] ।

क्षणविपरिणामधर्मा मर्त्यानामृद्धिसमुदयाः सर्वे ।
सर्वे च शोकजनकाः संयोगा विप्रयोगान्ताः १२१ ॥

टीका—क्षणेन विपरिणामधर्माः । विशब्दः कुत्सायाम् । कुत्सितैः परिणामधर्मैः[3]—स्वतः प्रीतिकारिणः सन्तोऽप्रीतिकारिणः परिणतिविशेषाज्जायन्ते, स्वल्पेनैव कालेनान्यस्वभावा भवन्ति । मरणधर्माणो मर्त्याः, तेषामृद्धिसमुदयो विभूतिसमुदया धनधान्यहिरण्यसुवर्णादयः सर्वे दक्षिणोत्तरमथुराद्वयनिवासिवणिग्द्वयविभूतिसमुदयवत् अन्यथात्वञ्च प्रतिपन्नाः शोकहेतवो नियमेन स्युः । संयोगाः पुत्रपत्नीप्रभृतयो विप्रयोगान्ता एव भवन्ति । न खलु कश्चित्संयोगोऽस्त्यात्यन्तिकः । इति भावयतोऽभिलाषस्तेषु न भवतीति ॥ १२१ ॥

अर्थ—मनुष्योंकी सभी सम्पदा क्षणभरमें बदलनेवाली है । और सभी संयोग अन्तमें वियोगवाले होनेके कारण शोकको पैदा करते हैं ।

भावार्थ—मनुष्य स्वभावसे ही मृत्युका आहार है । उसकी धन-धान्य सम्पदा भी क्षणभरमें ही हवा हो जाती है । जो वस्तुएँ उसे आज प्यारी लगती हैं, वे ही कल बुरी लगने लगती हैं । पत्नी, पुत्र वगैरहका सम्बन्ध भी अन्तमें वियोगके लिए ही होता है । कोई सम्बन्ध सर्वदा नहीं रहता । अतः उससे रंज ही होता है । ऐसा विचार करते रहनेसे उनमें अभिलाषा नहीं होती है ।

'तस्मान्न किञ्चिद् विषयसुखाभिलाषेण' इति दर्शयन्नाह—

अतः विषय-सुखकी अभिलाषा करना व्यर्थ है, यह बतलाते हैं :—

भोगसुखैः किमनित्यैर्भयबहुलैः कांक्षितैः परायत्तैः ।
नित्यमभयमात्मस्थं प्रशमसुखं तत्र यतितव्यम् ॥ १२२ ॥

टीका—भुज्यन्त इति भोगाः शब्दादयः, तज्जनितानि सुखानि भोगसुखानि । तानि चोक्तेन न्यायेनानित्यानि । 'किम्' इति क्षेपे । 'न किञ्चिदेभिः' इत्यभिप्रायः । भावयन् चौरदायादाग्निभूपतिभ्यो नित्यमेवाशङ्कते । भोगसुखकारणेषु ऋद्धिसमुदयेषु भयबहुलेषु प्रभूतभयेषु । 'कांक्षितैः' इति-अभिलाषितैः । 'परायत्तैः' इति-शब्दादिविषयायत्तैः । मनोहारिषु शब्दादिषु सत्सु सुखमुपजायते भोगवतामिति । तस्मात्तेषु अभिलाषमहाय नित्यम्-आत्यन्तिकम्, अभयम्-अविद्यमानभीतिकम्, आत्मस्थम्-आत्मायत्तं न परायत्तं प्रशमसुखं मध्यस्थस्यारक्तद्विष्टस्योपशान्तकषायस्य यत्तदेवंविधम् । तत्रैव प्रयत्नः कार्य इति ॥ १२२ ॥

अर्थ—अनित्य, भयसे परिपूर्ण, और पराधीन भोगोंके सुखोंकी चाहसे क्या लाभ ! समतारूपी सुख नित्य है, भयसे रहित है और अपनी आत्माके अधीन है । अतः उसमें ही प्रयत्न करना चाहिए ।

१–स्वरि-प०। [illegible] ३–मेर[illegible] ब०। [illegible]-प०। ४–धा जा–प०। ५–[illegible] फ०। ६–[illegible]-प०। ६–वत् दक्षिणोत्तरमथुरापुरानक [illegible]-फ० ब०। ७-वृद्धि-फ० ब०। ८–भूतेषु–फ०,ब०

भावार्थ—भोगोंसे उत्पन्न होनेवाला सुख अनित्य होता है, रात-दिन चोरोंका, कुटुम्बियोंका, आगका और राजाका भय लगा रहता है। तथा शब्दादिक विषयोंके प्राप्त होनेपर सुख होता है, अन्यथा नहीं होता। अतः उसकी वांछा न करके राग और द्वेषके त्यागसे उत्पन्न होनेवाले समतारूपी सुखको प्राप्त करनेका प्रयत्न करना चाहिए। यह सुख नित्य है। इसमें किसी प्रकारका भय नहीं है और न यह परके अधीन है।

'तच्च सुलभमेव' इति दर्शयति—

वह सुख सुलभ है, यह बतलाते हैं :—

यावत्स्वविषयलिप्सोरक्षसमूहस्य चेष्टयते तुष्टौ ।
तावत्तस्यैव जये वरतरमशठं कृतो यत्नः ॥ १२३ ॥

टीका—अक्षसमूहस्य-इन्द्रियग्रामस्य, स्वविषयलिप्सोः शब्दादिविषयाभिलाषिणः शब्दादीन् स्वविषयान् लब्धुमिच्छतः, तुष्टौ प्रिये कर्तव्ये, यावच्चेष्टयते प्रयासः क्रियते। तावत्तस्यैव जये-अक्षसमूहस्याभिभवे निग्रहे नियमने, वरतरं शोभनतरं, बहुगुणमशठं मायारहितमृजुना चित्तेन यत्नः कृतः। 'वरतरमशठम्' इति क्रियाविशेषणम्। यत्र तत् क्रियते तद् वरतरमशठञ्चेति। इतश्च प्रशमसुखं सुलभम् ॥ १२३ ॥

अर्थ—अपने विषयोंकी इच्छुक इन्द्रियोंकी संतुष्टिके लिए जितना प्रयत्न किया जाता है, उनके जीतनेमें छल-कपट रहित उतना ही प्रयत्न करना श्रेष्ठ है।

भावार्थ—इन्द्रियाँ सदा ही अपने विषयोंको चाहती हैं। उन्हें संतुष्ट करनेके लिए मनुष्य जितना प्रयत्न करता है, उतना प्रयत्न यदि सरल चित्तसे इन्द्रियोंके दमन करनेमें किया जाये तो उससे प्रशम सुखकी प्राप्ति सहज ही में हो सकती है।

तथा—

यत्सर्वविषयकाङ्क्षोद्भवं सुखं प्राप्यते सरागेण ।
तदनन्तकोटिगुणितं मुधैव लभते विगतरागः ॥ १२४ ॥

टीका—यत्सुखं सकलविषयसामग्र्यामाकाङ्क्षितायाम्, उद्भूतम्-उपजातम्, सरागेण रागवता भूयासायासेन प्राप्यते। तदेव सुखमनन्ताभिः कोटिभिर्गुणितम् अभ्यस्तं मुधैव विना मूल्येन विना चायासेन विगतरागः प्रशमसुखमवाप्नोतीति ॥ १२४ ॥

अर्थ—रागी मनुष्य सब विषयोंकी प्राप्तिसे उत्पन्न हुए जिस सुखको प्राप्त करता है, वीतरागी मनुष्य उससे अनन्त कोटिगुने सुखको सहज ही में प्राप्त कर लेता है।

भावार्थ—रागी मनुष्यको सांसारिक सुख पानेके लिए दुनियाभरके विषयोंकी इच्छा रहती है। उनकी प्राप्तिके लिए दिन-रात परिश्रम करता है, तब कहीं थोड़ासा सुख मिलता है, किन्तु वीतरागी

मनुष्य समस्त चिन्ताओंसे मुक्त होनेके कारण उससे अनन्तगुणे सुखको बिना परिश्रम किये ही प्राप्त कर लेता है। क्योंकि आत्मिक-सुखके लिए किसी पर-पदार्थकी आवश्यकता नहीं होती है।

और भी :—

इष्टवियोगाप्रियसंप्रयोगकाङ्क्षासमुद्भवं दुःखम्।
प्राप्नोति तत्सरागो न संस्पृशति तद्विगतरागः ॥ १२५ ॥

टीका—इष्टस्य शब्दादेः पुत्रादेर्वा हिरण्यसुवर्णादेर्वा वियोगे, अनिष्टस्य चाप्रियस्य वा संयोगे इष्टे तावदविप्रयोगाकाङ्क्षा अनिष्टे च विप्रयोगाकाङ्क्षा, तस्याः काङ्क्षायाः समुद्भूतम्–उत्पन्नं यद्दुःखं सरागो विषयसुखाभिलाषी यत् प्राप्नोति तद्दुःखं विगतरागो न संस्पृशति–नासादयति। 'विगतरागेण मध्यस्थेन तन्न प्राप्यते' इत्यर्थः ॥ १२५ ॥

अर्थ—इष्टका वियोग, अनिष्टका संयोग, इष्टके वियोग न होनेकी इच्छा, और अनिष्टके संयोग न होनेकी इच्छासे होनेवाला जो दुःख सरागीको उठाना पड़ता है, वीतरागीको वह दुःख छूता भी नहीं है।

भावार्थ—इष्ट पुत्र वगैरहका वियोग हो जानेपर तथा अनिष्ट-अप्रिय वस्तुका संयोग हो जानेपर सरागीको बड़ा दुःख होता है तथा रात-दिन वह यही चाहता रहता है, किसी इष्ट वस्तुका उसके वियोग न हो और अनिष्टका संयोग न हो। किन्तु वीतरागी इष्ट और अनिष्टमें समबुद्धि होता है। अतः उसे इष्ट–वियोग और अनिष्ट–संयोगसे होनेवाला दुःख कभी नहीं होता।

प्रशमितवेदकषायस्य हास्यरत्यरतिशोकनिभृतस्य।
भयकुत्सानिरभिभवस्य यत्सुखं तत्कुतोऽन्येषाम् ॥ १२६ ॥

टीका—प्रशमिता प्रशमं नीता वेदकषाया येन। वेदाः स्त्री पुन्नपुंसकाख्याः। कषायाः क्रोधादयः। वेदोदयात्पुमानभिलषति स्त्रियम्, स्त्री च पुमांसम्. तदुभयं नपुंसकः। तदुभयाच्च [तदुभयस्य चाप्रा-] अप्राप्तौ दुःखम्। प्रशमितवेदस्य तन्न भवति। क्रोधाद्यग्न्यादीपितोऽपि दुःखभागेव जायते। शमितकषायस्यतु तदभावः। हास्यं हर्षाद्भवतिः रतिः प्रीतिर्विषयेषु सक्तिः। अरतिरुद्वेगः। शोको मानसं दुःखमिष्टवियोगादौ। एतेषु हास्यादिषु मोहभेदेषु निभृतः स्वस्थः। सत्यपि हास्यकारणे नास्ति हास्यं न रतिर्नारतिः। सत्स्वपि तत्कारणेषु अनित्यता भावना, ततश्च शोकोऽपि नास्त्येव। भयमिहलोकादि सप्तविधम्। कुत्सा जुगुप्सा निन्दा। साप्य नित्यताभावनात एवनिर्जिता। भयमपि सावष्टम्भमेव भवकारणापगमाद्वा विजयते। एवं भय- कुत्साभ्यामनभिभूतस्य यत्सुखं प्रशान्तचेतसः तत्कुतोऽन्येषां रागिणामिति ॥ १२६ ॥

१–निश्चाद–फ०। २–पुनर्नाभि–फ०, ब०। ३–तदुदभाव–प०। ४–कादानादि–प०, ब०। ५–'भय' इत्यपि मुद्रु प्रतिभाति। ६–त्यादुद्दशरर–फ०, ब०।–त्यादुद्दनस्य निःभिभवस्य मु०।

अर्थ—जिसने वेद और कषायोंको शान्त कर दिया है, हास्य, रति, अरति और शोकमें जो स्वस्थ रहता है, तथा भय और निन्दासे जो पराभूत नहीं होता, उसे जो सुख होता है, वह सुख दूसरों को कैसे प्राप्त हो सकता है !

भावार्थ—वेदके उदयसे पुरुष स्त्रीकी अभिलाषा करता है, स्त्री पुरुषकी अभिलाषा करती है और नपुंसक दोनोंकी अभिलाषा करता है। उनके न मिलनेपर दुःखी होता है। किन्तु जिसका वेद शान्त हो जाता है, उसे वह दुःख नहीं होता। इसी प्रकार क्रोधरूपी आगमें जलता हुआ प्राणी भी दुःखी ही होता है। किन्तु जिसकी कषाय शान्त हो जाती है, उसे वह दुःख नहीं होता। इसी तरह हास्य वगैरहको भी दुःखका कारण जानना चाहिए। हँसीके कारण उपस्थित होनेपर भी जो हास्य नहीं करता, प्रीतिके कारण उपस्थित होनेपर भी किसीसे प्रीति नहीं करता, उद्वेगके कारण उपस्थित होनेपर भी उद्विग्न नहीं होता और शोकके कारण उपस्थित होनेपर भी शोक नहीं करता। जिसे न किसी प्रकारका भय सताता है और न जो निन्दाके वशमें होता है, उस समदर्शी मनुष्यको जो सुख होता है, वह सुख रागी जनोंको कैसे प्राप्त हो सकता है !

पुनः प्रशमसुखस्यैवोत्कर्षं विषयसुखान्निदर्शयन्नाहः—

फिर भी विषय-सुखसे प्रशमजन्य सुखको उत्कृष्ट बतलाते हैं :—

सम्यग्दृष्टिर्ज्ञानी ध्यानतपोबलयुतोऽप्यनुपशान्तः ।
तं लभते न गुणं यं प्रशमगुणमुपाश्रितो लभते ॥ १२७ ॥

टीका—शङ्कादिदोषरहितः सम्यग्दर्शनसम्पन्नः, यथासंभवं च मत्यादिज्ञानेन युक्तः, शुभध्यानबलेन च युक्तोऽपि केवलमनुपशान्तः-अशामितवेदकषायोऽनुपशान्तः-तद्गुणं न लभते न चाप्नोति प्रशमगुणमुपाश्रितो यं गुणं लभते ज्ञानचरित्रोपचयलक्षणं निरुत्सुकत्वगुणं च। न चानुपशान्तः तं गुणमवाप्नोतीति। तस्मात् प्रशमसुखायैव यतितव्यमिति ॥ १२७ ॥

अर्थ—सम्यग्दृष्टि, ज्ञानी और ध्यान तथा तपोबलसे युक्त साधु भी यदि अशान्त न हो तो उस गुणको प्राप्त नहीं कर सकता, जो गुण प्रशम गुणसे युक्त साधुको प्राप्त होता है।

भावार्थ—कोई साधु शंका आदि दोषोंसे रहित सम्यग्दर्शन, यथायोग्य मति वगैरह ज्ञान, और ध्यानसे युक्त हो और बड़ा भारी तपस्वी भी हो; किन्तु यदि उसके काम क्रोधादिक शान्त नहीं हुए हैं तो उसे उत्कृष्ट ज्ञान, उत्कृष्ट चारित्र वगैरह उन गुणोंकी प्राप्ति नहीं हो सकती, जो गुण काम क्रोधादिके जीतनेवाले साधुको सहज हीमें प्राप्त हो जाते हैं। अतः प्रशम सुखकी प्राप्तिके लिए ही प्रयत्न करना चाहिए।

भूयोऽपि प्रशमसुखोत्कर्षख्यापनायाहः—

फिर भी प्रशम सुखकी उत्कृष्टता बतलाते हैं :—

नैवास्ति राजराजस्य तत्सुखं नैव देवराजस्य ।
यत्सुखमिहैव साधोर्लोकव्यापाररहितस्य ॥ १२८ ॥

टीका—राजराजः—चक्रवर्ती वासुदेवादिर्वा। पूर्वः सकलभरतक्षेत्राधिपतिः, उत्तरोऽर्धभरताधिपतिः। मनुष्यजन्मसुखस्य प्रकर्षवर्तिनावेतौ। चक्रवर्त्यर्द्धचक्रवर्तिनोरपि नास्ति तादृशं सुखं यादृशं प्रशमस्थितस्येति। तद्धि चक्रवर्त्यादिसुखं शब्दादिसमृद्धिजनितम्, तस्य चानित्यत्वं प्राक् प्रतिपादितम्। न चैकान्तेन सुखहेतुत्वं शब्दादीनां विपरिणतिधर्मत्वात्। देवेन्द्रस्य सुखं प्रकृष्टं स्यादिति, तदपि चोपरितनेन्द्रसुखप्रकर्षदर्शनात्तदाकाङ्क्षिणः च्युतिचिन्तनाच्च दुःखव्यतिकीर्णमेव। अथवा देवराजः सर्वदेवोत्तमत्वादनुत्तरविमानवासी तस्यापि, यत्सुखं तदपि स्थितिक्षयं मनुष्योऽपिदुरगर्तनिमज्जनं च दुःखमनुचिन्तयतस्तस्यापि न तादृक् सुखमस्ति दुःखलेशाकलङ्कितं यदिहैव सुखं साधोर्मनुष्यजन्मनि प्रशमस्थितस्य विनिवृत्तसकलाङ्कुस्यात्महितगवेषिणो विशिष्टज्ञानसमन्वितस्य लोकव्यापाररहितस्य। लोकव्यापारः कृष्यादिप्रवृत्तिकामभोगसाधनोपादित्सा। एवंविधेन व्यापारेण रहितस्य प्रशमसुख एव व्यवस्थापितचेतोवृत्तेर्यत्सुखं न तद् राजराजे न देवराजे इति॥ १२८॥

अर्थ—सांसारिक झंझटोंसे रहित साधुको इसी जन्ममें जो सुख मिलता है, वह सुख न तो चक्रवर्ती और अर्धचक्रीको ही सुलभ है और न देवराज इन्द्रको ही सुलभ है।

भावार्थ—चक्रवर्ती अथवा वसुदेव वगैरह अर्धचक्री राजाओंके राजा कहे जाते हैं। चक्रवर्ती समस्त भरतक्षेत्रका स्वामी होता है। ये दोनों ही पद मनुष्य पर्यायमें सबसे ऊँचे होते हैं। किन्तु इन्हें भी वह सुख नहीं होता जो विरक्त साधुको होता है। क्योंकि चक्रवर्ती वगैरहका सुख सांसारिक विषयों और वैभवसे उत्पन्न होता है, अतः वह अनित्य है। यह बात पहले बतला आये हैं कि विषय सर्वदा सुखके देनेवाले नहीं हैं, क्यों वे स्थायी नहीं होते हैं।

देव-पर्यायमें इन्द्रका पद सबसे उत्कृष्ट है; किन्तु इन्द्रको भी अपनेसे ऊपरके इन्द्रोंको देखकर उसकी लालसा लगी रहती है और मरणकाल समीप आजानेपर वहाँसे च्युत होनेकी चिन्ता सताने लगती है। अतः उनका सुख उत्कृष्ट होनेपर भी दुःखसे मिला हुआ है। अथवा सर्व देवोंमें उत्तम होनेके कारण अनुत्तरवासी देवोंको देवराज कह सकते हैं। देवसुखके विनाश और मनुष्य योनिमें पुनः जन्म लेनेके दुःखके [illegible] उनका सुख भी दुःखसे मिला हुआ ही प्रतीत हो जाता है। अतः वैराग्यसे [illegible] और सांसारिक प्रवृत्तियोंसे दूर रहनेवाले [illegible] जो सुख है वह सुख न [illegible] है और न देवोंके राजको [illegible] है।

१-[illegible] फ० ब० [illegible] मु० [illegible] फ० ब०

प्रशमसुखमेव पुनः स्पष्टयति—
प्रशम सुखका पुनः खुलासा करते हैं:—

संत्यज्य लोकचिन्तामात्मपरिज्ञानचिन्तनेऽभिरतः ।
जितरोषलोभमदनः सुखमास्ते निर्ज्वरः साधुः ॥ १२९ ॥

टीका—लोकः स्वजनः परिजनश्च, तद्विषया चिन्ता दारिद्र्यदौर्भाग्यादिलक्षणा, अकृतपुण्यानाञ्च परलोके दुर्गतिप्राप्तिलक्षणा, तां परित्यज्य विहाय, आत्मनःपरिज्ञानम्-अनादौ संसारेऽयमात्मा शारीराणि मानसानि दुःखान्यनुभवन् अतृप्तःकामभोगसुखेषु कथमपि मनुष्यजन्मादिरत्नं बोधितः, तदधुना यथा संसारे बहुदुःसंकटे न भ्रमति तथा प्रयत्नः कार्यो मया' इति आत्मपरिज्ञानचिन्तन एवाभिरतः परकार्यविमुखः। जिताः परिभूता रोषलोभमदनादयो येन। रोषग्रहणाद् द्वेषः, लोभग्रहणाद्रागः, मदनग्रहणात् पुरुषवेदादिः। एतज्जयाच्च सुखमास्ते-स्वस्थचित्तः सुखमहर्दिनम्। ज्वरो रोगविशेषः, तेन ग्रस्तः परितापशिशिरलक्षणेन रतिमलभमानो दुःखमास्ते। स एवंविधो निर्गतोऽपगतो ज्वरो यस्मात् स निर्ज्वरः। ज्वर इव ज्वरो रोषलोभमदनः। मोक्षसाधनाभ्युद्यतः साधुरिति ॥ १२९ ॥

अर्थ—स्वजन और परजनकी चिन्ताको छोड़कर आत्माके ज्ञानके चिन्तनमें तल्लीन हुआ और राग द्वेष और कामको जीतनेवाला, अतएव नीरोग हुआ साधु आनन्दपूर्वक रहता है।

भावार्थ—अपने कुटुम्बियों और दूसरे लोगोंको लोक कहते हैं। उनकी दरिद्रता, अभाग्य, तथा पुण्य न करनेपर परलोकमें दुर्गतिकी प्राप्ति, इत्यादि बातोंका विचार करना लोक-चिन्ता है। साधु इस चिन्तासे दूर रहता है। तथा सर्वदा यह विचार करता रहता है कि—'इस संसारमें शारीरिक और मानसिक दुःखोंको भोगते हुए और काम भोगसे कभी तृप्त न होते हुए इस आत्माने किसी तरह यह मनुष्य जन्म और ज्ञान प्राप्त किया है। अतः अब मुझे ऐसा प्रयत्न करना चाहिए जिससे दुःखोंसे भरे हुए इस संसारमें पुनः भ्रमण न करना पड़े।' तथा राग द्वेष और कामको जीत लेनेके कारण वह साधु स्वस्थचित्त हो जाता है, क्योंकि रागादिक ज्वरादिक रोगोंके समान ही दुःखदायी हैं। अतः संसारके लोगोंकी चिन्ता छोड़कर आत्माका चिन्तन करनेवाला वीतरागी साधु सुखपूर्वक निश्चिन्त रहता है।

'संत्यज्य लोकचिन्ताम्' इत्युक्तम्। तत्कथं परित्यक्तलोकचिन्तस्य भरणपोषणादिचिन्तनं स्यात्?' इत्याह—

ऊपर लोककी चिन्ता छोड़नेका निर्देश किया है। अतः 'लोककी चिन्ता छोड़कर साधु अपना भरण-पोषण कैसे करेगा?' इसका समाधान करते हैं।

या चेह लोकवार्ता शरीरवार्ता तपस्विनां या च ।
सद्धर्मचरणवार्तानिमित्तकं तद्द्वयमपीष्टम् ॥ १३० ॥

१—निर्ग० ब०, फ०।

टीका—वर्तनं वृत्तिः भरणपोषणादिका वृत्तिरेवंप्रकारा यस्यां विद्यते सा वार्ता कृषि-पशुपाल्यवाणिज्यादिः लोकस्य वार्ता, तस्यां चिन्तनमेतावदेव लोकवार्तायामुपस्थिते भिक्षाकाले स्वार्थमेवोपसाधितेऽशनादिषु हिण्डमानोऽकृताकारितानुमतमशनादि यल्लभ्यते लोकवार्ता। यतस्तच्छरीरवार्तायाः कारणं भवति, साधूनां शरीरवृत्तेः शरीरस्थितेर्निमित्तं भवति तपस्विनाम्, तत्र पेयं लोकवार्ता या च तपस्विनां शरीरसंधारणवार्ता एतद्वार्ताद्वयमपि सद्धर्मचरणवार्ता-निमित्तकमिष्टम्। सद्धर्मो दशलक्षणकः क्षमादिः। चरणं मूलोत्तरगुणकलापः। सद्धर्मचरणवृत्तिः सद्धर्मचरणवार्ता। सद्धर्मचरणवृत्तेरनन्तरं कारणं शरीरसंधारणम्, शरीरसंधारणवृत्तेश्च लोक-वार्ताकारणम्। पारम्पर्येण सद्धर्मचरणवार्ताया लोकवार्ता कारणमिति ॥ १३० ॥

अर्थ—जो लोक-वार्ता और शरीर-वार्ता साधुओंके समीचीन धर्म और चारित्रकी प्रवृत्तिमें कारण है, वे दोनों इष्ट हैं।

भावार्थ—'वार्ता' शब्दके दो अर्थ होते हैं—एक जीविका और दूसरा बात। खेती पशु-पालन व्यापार वगैरह लोक-वार्ता कहे जाते हैं। भिक्षाके योग्य कालमें शरीरकी स्थितिके लिए भोजन वगैरहके निमित्त भ्रमण करता हुआ साधु कृत, कारित, और अनुमोदनासे रहित भोजन वगैरह प्राप्त करता है, वह लोक-वार्ता है। यह लोक-वार्ता साधुओंके शरीरकी स्थितिका कारण होती है। और ये दोनों ही वार्ताएँ उत्तम क्षमादिरूप धर्म और मूलगुण तथा, उत्तरमूलगुणरूप चारित्रकी प्रवृत्तिमें कारण होती हैं; क्योंकि भोजनके बिना शरीर नहीं रह सकता और शरीरकी स्थितिके बिना धर्माचरण नहीं रह सकता। अतः धर्माचरणमें शरीर-स्थिति कारण है और शरीरकी स्थितिका कारण लोक-वार्ता है। अतः परम्परासे लोक-वार्ता भी धर्माचरणकी प्रवृत्तिमें कारण है। इसलिए ये दोनों ही इष्ट हैं। किन्तु इतना ध्यान रखना चाहिए कि शरीरकी चिन्ता उतनी ही पर्याप्त है जितनी धर्माचरणके लिए आवश्यक हो और भोजनकी वार्ता भी उतनी ही पर्याप्त है, जितनी शरीरको बनाये रखनेके लिए आवश्यक हो।

अपि च लोकवार्तान्वेषणे प्रयोजनमिदमपरम्—

लोक-वार्ताको रखनेमें एक दूसरा कारण भी बतलाते हैं :—

लोकः खल्वाधारः सर्वेषां ब्रह्मचारिणां यस्मात्।
तस्माल्लोकविरुद्धं धर्मविरुद्धञ्च संत्याज्यम् ॥ १३१ ॥

टीका—लोकः जनपदः। खलु शब्दोऽवधारणे। लोक एवाधारः सर्वेषां ब्रह्मचारिणां यस्मात्—ब्रह्म संयम सप्तदशभेदः, तद्योगात् संयमिनस्तेषां सर्वेषामिति गच्छवासिनां गच्छ-निर्गतानाञ्च। तस्माद् लोके यद्विरुद्धं जातमृतकसूतकमृतकनिराकृतादिगृहेषु भिक्षादिग्रहणम-भोज्येषु च परिहार्यम्। तथा चान्यैरप्युक्तमुक्तम्—

१—वेवविध एव प्रकार —फ० ब० २—पूर्वमेव-फ० ब० ३—ब्रह्म-दे-प०। ४—धार—फ०। रहाधारः—फ०। ५—सर्वेषां —प०।

' जे जहिं दुगुंछिया खलु पव्वावणवसहि भत्तपाणेसु ।
जिणवयणे पडिकुट्ठा वज्जेज्जं तहा पयत्तेण ॥ १ ॥ '

यच्च लोकैकदेशेऽविरुद्धं मधुमांसलसुनबीजानन्तकायादि धर्मसाधनविरुद्धमनेकं तदपि परिहार्यमिति ॥ १३१ ॥

अर्थ—यतः लोक सभी संयमियोंका आधार है। अतः लोकविरुद्ध और धर्मविरुद्ध कार्योंको छोड़ देना चाहिए।

भावार्थ—सभी संयमी लोकमें ही निवास करते है। अतः जो काम लोकविरुद्ध हैं, जैसे—जन्म मरणके सूतकवाले और जाति बहिष्कृत वगैरह घरोंमें भिक्षा लेना, न करना चाहिए। तथा जो कार्य धर्मविरुद्ध हैं, जैसे मदिरा, मांस, ल्हसुन, और अनन्तकाय वनस्पतिका भक्षण वगैरह, उन्हें भी न करना चाहिए।

' इतश्च लोकवार्त्तान्वेषणे श्रेयोहेतुः ' इति दर्शयति—

अब लोक-वार्ताको कल्याणकारी बतलाते हैं:—

देहो नासाधनको लोकाधीनानि साधनान्यस्य ।
सद्धर्मानुपरोधात्तस्माल्लोकोऽभिगमनीयः ॥ १३२ ॥

टीका—शरीरमाद्यं खलु धर्मसाधनम्। तस्य च देहस्याहारोपधिशय्याः साधनम्, साधनरहितस्य देहस्यासंभव एव। तानि चास्य साधनानि लोकाधीनानि लोकायत्तानि भवन्ति। अतः किम्? सद्धर्मानुपरोधात्—सद्धर्मस्य क्षमादेरविरोधात्, लोकोऽभिगमनीयः—'लोकवार्तान्वेषणमेवमर्थं करणीयम् ' इति ॥ १३२ ॥

अर्थ—साधनके बिना शरीर नहीं रह सकता। और उसके साधन लोकके आधीन हैं। अतः समीचीन धर्मके अविरुद्ध लोकका अनुसरण करना चाहिए।

भावार्थ—धर्म-साधनका प्रधान शरीर है। और शरीरके साधन भोजन वगैरहके बिना शरीरका टिकना असंभव ही है। किन्तु वे सभी साधन लोकके आधीन हैं। अतः लोक-वार्ता करनी चाहिए। किन्तु इतना ध्यान रखना चाहिए कि वह लोक-वार्ता धर्मके विरुद्ध न हो।

' पर एवोपदेष्टा भवति गुणदोषयोः ' इत्याह—

दोष और गुणकी शिक्षा लोकसे ही लेनी चाहिए, यह बतलाते हैं:—

दोषेणानुपकारी भवति परो येन येन विद्वेष्टि ।
स्वयमपि तद्दोषपदं सदा प्रयत्नेन परिहार्यम् ॥ १३३ ॥

१-छिद्राल—फ०, ब०। २-वज्जेज्जा प-प। ३-शे विरु—फ०, ब०। ४-विद्विष्टः—प०, फ०, ब०।

टीका—येन येनाभ्यस्यमानेन कर्मणा परो लोको विद्वेष्टि-क्रुध्यति, भवति चानुपकारी, प्रत्युतापकारे प्रवर्तते। स्वयमपि-आत्मनापि तद्दोषपदं परिहार्यमप्रमत्तेन सता अन्यः कुर्वन् परस्य दृष्टः किञ्चिदप्रियकारणम्, तद्वेक्ष्य स्वयमपि तद्दोषस्थानं परिहार्यम् 'अनेनास्याप्रियं भवति' इति सकलप्रमादरहितेन परित्यजनीयमिति ॥ १३२ ॥

अर्थ—जिस जिस दोषसे दूसरे लोग अनुपकारी हो जाते हैं; द्वेष करने लगते हैं, उस दोष स्थानको स्वयं भी सदा प्रयत्नपूर्वक छोड़ देना चाहिए।

भावार्थ—जिन कार्मोंके करनेसे दूसरे लोग क्रोधित हो जाते हैं और अपकारतक करनेपर उतारू हो जाते हैं, बिना किसी प्रमादके उन कार्मोंको तुरन्त छोड़ देना चाहिए। अर्थात् साधुने यदि किसी आदमीको कोई ऐसा अप्रिय कार्य करते देखा, जिससे लोग उसके दुश्मन हो गये तो उस कार्यको बुराईका घर जानकर साधुको उससे बचना चाहिए।

'यथैतत्परिहरणीयं तथैतदपि' इत्याह—

तथा—

पिण्डैषणानिरुक्तः कल्प्याकल्प्यस्य यो विधिः सूत्रे।
ग्रहणोपभोगनियतस्य तेन नैवामयभयं स्यात् ॥ १३४ ॥

टीका—पिण्डैषणाध्ययने निरुक्तः-निश्चयेनाभिहितः उद्गमोत्पादनैषणादोषरहितो यो विधिः कल्पनीयाकल्पनीयः-ग्राह्यत्याज्यलक्षणः, सूत्रे-पारमर्षे आगमे। ग्रहणे नियतः परिमितो ग्राह्यो यथोज्झनीयदोषो न भवति, उपभोगे च नियतः द्वात्रिंशतः कवलानां न्यूनानामेवाभ्यवहारः कार्यः। तथाप्यार्षेऽप्युक्तम्—

अद्धमसणस्स सव्वंजनस्स कुज्जा दवस्स दो भाए।
वायपवियारणट्ठा छब्भागं ऊणयं कुज्जा ॥ १ ॥

इत्थञ्च ग्रहणोपभोगनियतस्य कल्पनीयस्य तेन विधिनाऽभ्यवह्रियमाणस्य न जातुचिद् आमयभयम्-अजीर्णजनितव्याधिभयं भवेत्। एवं च मान्द्यादिदोषाधिकरणपरिहारः धर्म्यासु च क्रियासु प्रवृत्तेरपरिहाणिः। तस्मादकल्प्यपरिहारेणापरिमितानियत भोगत्यागेन च भुञ्जानस्य न किञ्चिद्दुष्यतीति ॥ १३४ ॥

अर्थ—परमागममें पिण्डैषणा नामके अध्ययनमें ग्रहण करने योग्य और त्यागने योग्य रूप जो विधि बतलाई है, उसी विधिसे जो साधु परिमितका ग्रहण और परीमितका उपभोग करता है, उसे कभी रोगका भय नहीं रहता।

१–वर्तते-फ०, ब० । २–तद्देश–फ०, ब–। तद्देस्य–मु० । ३–दैदवि–प० । ४–कल्पाकल्पश्च–फ०, ब० । कल्पाकल्पस्य–प० । कल्प्याकल्प्यश्च म० । ५–नियमः–फ०, ब० । ६–[illegible]

भावार्थ—परमागमके एक अध्ययनमें भिक्षाकी विधि बतलाई है। इसीमें वह अध्ययन—कांटपिण्डैषणा अध्ययन है। उसमें बतलाया है कि साधुके ग्रहण करने योग्य क्या है! और छोड़ने योग्य क्या है? उसके अनुसार यदि साधु परिमित भोजनको ही ग्रहण करे, जिससे उसे जूठन छोड़नेका पाप न उठाना पड़े तथा परिमित अर्थात् बत्तीस ग्राससे कम ही भोजन करे, तो उसे अजीर्ण मन्दाग्नि वगैरह रोग नहीं हो सकते और धार्मिक क्रियाओंमें हानि होनेकी संभावना नहीं रहती। अतः अपरिमितका त्याग करके भोजन करनेवाले साधुको कोई दोष नहीं लगता।

एतदेव स्पष्टयन्नाह—

उसीको स्पष्ट करते हैं:—

व्रणलेपाक्षोपाङ्गवदसङ्गयोगभरमात्रयात्रार्थम्।
पन्नग इवाभ्यवहरेदाहारं पुत्रपलवच्च ॥ १३५ ॥

टीका—'व्रणलेपवत्, अक्षोपाङ्गवच्च' इति दृष्टान्तद्वयम्। व्रणलेपस्तावानेव देयो यावता पूयादिनिर्हरणसंरोहणे भवतः। अतोऽतिमात्रयाऽकिञ्चित्करमेव लेपदानम्। अक्षस्य उपाङ्गः अभ्यञ्जनम्, तच्च नवनीतादि तावन्मात्रमेव दीयते यावता शकटं भारमुद्वहति अनायासेन। न चास्तीति कृत्वा प्रकामं नवनीतादेरभ्यञ्जनस्य दानम्, निष्फलत्वात्। एवं साधुनाऽपि क्षुद्व्रण [illegible] मनोवाक्कायाः [illegible] ' इत्यर्थः। [illegible] ऽभ्यवहरति, नातिरिक्तम्। यात्रा दशविधचक्रवालसमाचारिस्वाध्यायभिक्षाचंक्रमणादिका च यात्रा, तदर्थम्। यथाह—

'तं पि ण रूपरसत्थं भुंजंताणं न चेव दप्पत्थं।
धम्मधुरावहणत्थ अक्खोपंगो व जत्तत्थं ॥ १ ॥'

भोजनैषणामधिकृत्याह—'पन्नग इवाभ्यवहरेदाहारम्।' सर्पोहि भक्ष्यमाशित्वा न चर्वणमाचरति ग्रस्त एवं गिलत्येव तथा साधुरपि भुञ्जानो न चर्वणं करोति। तथा चार्षसूत्रम्—

'नो वामाउ हणुआउ दाहिणं हणुयं संकमेणा दाहिणाउ वामं' इत्यादि।

पुत्रपलवच्च—पलं मांसम्, 'पुत्रमांसम्' इत्यर्थः। पुत्रशब्दोऽपत्यवचनः। चिलातपुत्रव्यापादितदुहितृमांसास्वादनवदिति। अयमभिप्रायः—पितुर्भ्रातुर्वा भक्षयतस्तन्मांसं न तत्राग्निरसगार्द्ध्यम्, शरीररक्षणार्थमेव केवलं ताभ्यामास्वादितं न रसार्थं दर्पार्थं वा मांसोपयोगः कृतः। तथा साधुनाऽपि रसेष्वगृद्धेन दर्पादिवर्जितेन यथालब्ध-मेषणीयम्-भोक्तव्यमिति ॥ १३५ ॥

१-दर हे-प०। २-रमिगह-र०। ३-उंचारेहणो-प०। ४-पुत्रपलं मांस-फ०, प०। ५-सादन-प०।

अर्थ—शरीरादिकमें निःस्पृहता, संयमका निर्वाह और यात्राके लिए घावके लेपकी तरह, गाड़ीके पहियेके आँगनकी तरह, और पुत्रके माँसकी तरह साँपकी नाईं भोजन करना चाहिए।

भावार्थ—घावपर उतना ही लेप लगाना चाहिए, जितनेसे उसका मवाद दूर हो सके और घाव भर सके। उससे अधिक लेप लगाना बेकार है। पहियेको आँगते समय उतना ही तेल देना चाहिए, जितनेसे गाड़ी सरलताके साथ बोझा ढो सके। अधिक तेल देना बेकार है। इसी प्रकार साधु भी भूखरूपी घावको पूरनेके लिए आहाररूपी लेपको उतना ही लेता है, जितनेसे शरीरादिकमें लावण्य और सफाई वगैरहका भाव उत्पन्न न हो और शरीरादिक नित्य-क्रियाओंके करनेमें—स्वाध्याय, भिक्षाटन वगैरह तथा गमना-गमन करनेमें समर्थ बना रहे।

तथा साँप जैसे अपने आहारको चट निगल जाता है—चबा-चबा कर नहीं खाता, वैसे ही साधु भी चबा-चबा कर नहीं खाता। तथा—

जिस प्रकार विलाती पुत्रके द्वारा मारी गई पुत्रीका माँस उसके पिता वगैरहने केवल अपने शरीरकी रक्षाके लिए ही खाया था, उस माँसके स्वादमें उनकी कोई आसक्ति नहीं थी, वैसे ही साधुको भी स्वादमें आसक्त न होकर रूखा-सूखा-जैसा मिल जाये, खा लेना चाहिए।

पुनरभ्यवहारमेव विशिनष्टि—

फिर भी भोजनके ही बारेमें कहते हैं:—

गुणवदमूर्छितमनसा तद्विपरीतमपि चाप्रदुष्टेन।
दारूपमधृतिना भवति कल्प्यमास्वाद्यमास्वाद्यम् ॥ १३६ ॥

टीका—गुणवत्-इष्टरसगन्धम्। मूर्छितं प्रीत रागयुतं चेतो यस्य स मूर्छितमनाः। न मूर्छितमना अमूर्छितमनाः, तेन अमूर्छितमनसा भक्ष्यमास्वाद्यं भोज्यमिति। तद्विपरीतमिति अमनोज्ञमनिष्टरसगन्धम्। तदपि अप्रदुष्टेन अद्विष्टेन द्वेषरहितेन इत्यर्थः। यात्रासाधनमात्रमालम्बनीकृत्य यत्किञ्चिदेषणीयमरक्ताद्विष्टेन चित्तेनाभ्यवहरेत्। दारूपमा धृतिर्यस्याविकारिणी। काष्ठं हि वास्यादिभिस्तक्ष्यमाणं न द्वेषं भजते, नापि चन्दनपुष्पादिभिः पूज्यमानं रागमुद्वहति। यथा तदचेतनं रागद्वेषरहितं तद्वत्साधु नापि सत्यपि चेतनावत्त्वे इष्टानिष्टान्नपानलाभे सति भोक्तव्यम् अरक्ताद्विष्टेन कल्पनीयमास्वाद्यमेषणीयम्। पुनः 'आस्वाद्यम्' इति 'भोक्तव्यम्' इत्यर्थः ॥ १३६ ॥

अर्थ—लकड़ीके समान निर्विकारी साधु यदि खानेके योग्य स्वादिष्ट भोजनको राग रहित मनसे और स्वाद रहित भोजनको भी द्वेष रहित मनसे ग्रहण करता है तो वह भोजनके योग्य भोजन होता है।

१. [illegible] फ० ब०। २. [illegible] ब०। ३. [illegible] मु०। ४. [illegible] फ० ब०। ५. [illegible] ब०

भावार्थ—'आदि' पदसे वस्त्र और पात्र ग्रहण करनेमें जो विधि बतलाई गई है, उस विधिका ग्रहण किया गया है। 'यच्चान्यद्' पदसे दण्डका ग्रहण किया है) इन सब वस्तुओंका ग्रहण धर्म और शरीरकी रक्षाके निमित्तसे किया जाता है। शरीरकी रक्षा होनेपर ही धर्मकी रक्षा हो सकती है, क्योंकि धर्मानुष्ठानका मूल शरीर है। संयमके पालन करनेके लिए ही शरीरका पोषण किया जाता है। इसी लिए यद्यपि उत्सर्गरूपसे ग्रहण करने योग्य वस्तुके ग्रहणका ही विधान है, तथापि यदि अपवादरूपसे ग्रहण करने योग्य वस्तुका लाभ न हो तो अल्पदोषसे युक्त वस्तुके ग्रहण करनेका विधान किया है। मैथुनके सिवाय अन्य सभी विषयोंमें अपवाद है। इस प्रकार धर्मकी रक्षाके लिए ही यह सब कहा है। किन्तु यह परिग्रह नहीं कहा जा सकता; क्योंकि साधुको उनमें ममत्व नहीं रहता और ममत्वको ही परिग्रह कहते हैं।

एवमुक्ता निष्परिग्रहता, सैव च स्पष्टा पुनः क्रियते—

उसी निष्परिग्रहताको फिर भी स्पष्ट करते हैं :—

कल्प्याकल्प्यविधिज्ञः संविग्नसहायको विनीतात्मा ।
दोषमलिनेऽपि लोके प्रविहरति मुनिर्निरुपलेपः ॥ १३९ ॥

टीका—कल्पनीयं कल्प्यम्-उद्गमादिशुद्धमाहारोपधिशय्यादि। उद्गमादिदुष्टंवाऽकल्पनीयम्। तस्य विधिः-विधानम्-'कल्पनीयेन शरीरंधारणं कुर्यात्, असति अकल्पनीयेनाप्य सता कार्यं यत्नवता प्रावचनेन मार्गेण इत्येष विधिः।' तं जानातीति कल्प्याकल्प्यविधिज्ञः। संविग्न सहायकः संविग्नाः संसार भीरवो ज्ञानक्रिया युक्ताः एवं विधाः सहाया यस्य संविग्नसहायकः। असहायः सुसहायो वा। विनीतात्मेति—विशेषेण नीत आत्मा ज्ञानदर्शनचारित्रोपचारविनयवश्यतां स विनीतात्मा। एवंविधः साधुः दोषमलिनेऽपि लोके मूर्च्छामलिनेऽपि मनुष्यलोके। रागद्वेषौ वा दोषः, ताभ्यामयं मलिनो दूषितः सर्वो लोकः। एवंविधलोकमध्यवर्त्यपि प्रकर्षेण विविधमनेकप्रकारं रजो हरति प्रविहरति मुनिः निरुपलेपः-रागद्वेषाभ्यामस्पृष्टः, सर्वधनविनाशकारिणा वा लोभेन मूर्च्छालक्षणेनाग्रस्तो निरुपलेप इति। कर्मावश्रव पूर्वबद्धमोक्षणाय प्रवर्तत इति ॥ १३९ ॥

अर्थ—जो कल्पनीय और अकल्पनीयकी विधिको जानता है, संसारसे भयभीत संयमी जन जिसके सहायक हैं, और जिसने अपनी आत्माको ज्ञान, दर्शन, चारित्र और उपचार विनयसे युक्त कर लिया है, वह साधु राग-द्वेषसे दूषित लोकमें भी राग-द्वेषसे अछूता रह कर विहार करता है।

भावार्थ—उद्गमादिसे शुद्ध आहारादिकको कल्पनीय कहते हैं। और उद्गमादि दोषोंसे युक्त आहारादिकको अकल्पनीय कहते हैं। कल्पनीय वस्तुओंसे शरीरकी रक्षा करनी चाहिए। यदि कल्पनीय न मिलें तो अकल्पनीयसे भी रक्षण किया जा सकता है, इत्यादि विधि है। जो साधु इस विधिको जानता है, संसारभीरु संयमी लोगोंकी गोष्ठीमें रहता है तथा विनयी है, वह दोषोंसे भरे हुए इस लोकमें भी दोष-

---

१-मुक्तेन न्यायेन नि-प०। २-च पुनः स्पष्टीक्रियते प०। ३-द्विविधः,-प०। ४-कथा-फ०, ब०।

रहित होकर विचरता है। उसके नवीन कर्मबन्ध नहीं होता तथा पहले बँधे हुए कर्मोंकी निर्जरा होती है, क्योंकि वह निरवद्य है और प्रवृत्ति करनेकी विधिको जानता है।

'कथं पुनर्दोषवल्लोकान्तःपाती तत्कृतसंसर्गो दोषैर्न लिप्यते?' इत्याह—

दोषोंसे भरे हुए लोकमें रहकर और उसके साथ सम्बन्ध रखकर भी साधु दोषोंसे लिप्त क्यों नहीं होता? इसका समाधान करते हैं :—

यद्वत्पङ्काधारमपि पङ्कजं नोपलिप्यते तेन ।
धर्मोपकरणधृतवपुरपि साधुरलेपकस्तद्वत् ॥ १४० ॥

टीका—'यद्वत्' इति दृष्टान्तोपन्यासे। यथा पङ्काधारं पङ्कमध्यादुत्पन्नं पङ्कमध्ये स्थितं वा पङ्कजं नलिनं। नोपलिप्यते न स्पृश्यते कर्दमेन। धर्मोपकरणधृतवपुरपि साधुरलेपक— धर्मार्थमुपकरणं धर्मोपकरणं रजोहरणमुखवस्त्रिकाचोलपट्टककल्पादिकं तेन धृतवपुरपि कृतशरीर-संरक्षोऽपि स्नेहनिरितिच्छीचकादकृतसंरक्षणश्च साधुरलेपक एव 'लोकदोषैर्न स्पृश्यते शुद्धा-शयत्वात् अमूर्छितत्वात्' इत्यर्थः ॥ १४० ॥

अर्थ—जिस प्रकार कीचड़से उत्पन्न होनेपर तथा कीचड़के मध्यमें रहनेपर भी कमल कीचड़से लिप्त नहीं होता, वैसे ही धर्मके उपकरणोंसे शरीरको धारण करनेवाला साधु भी दोषोंसे लिप्त नहीं होता।

भावार्थ—कमलको पङ्कज कहते हैं; क्योंकि वह पङ्क-कीचड़से उत्पन्न होता है। परन्तु जिस प्रकार कीचड़में पैदा होनेपर कमलको कीचड़ नहीं छूता, उसी प्रकार धर्मोपकरण वगैरहसे शरीरका रक्षण करते हुए भी साधुको सांसारिक दोष नहीं छूता; क्योंकि उसका आशय निर्दोष है। उसे किसी भी वस्तुसे ममत्व नहीं है।

तथाऽपरोऽपि दृष्टान्तः—

दूसरा दृष्टान्त देते हैं :—

यद्वत्तुरगः सत्स्वप्याभरणविभूषणेष्वनभिसक्तः ।
तद्वदुपग्रहवानपि न संगमुपयाति निर्ग्रन्थः ॥ १४१ ॥

टीका—यथा तुरगः सत्स्वपि विभूषणेषु वालव्यजनादिष्वश्वमण्डनकेषु वाऽनभिसक्तः— अमूर्छितः अकृतगार्द्ध्यः न तेन परिग्रहेणासौ परिग्रहवान्। तद्वदिति—दृष्टान्तेन समीकरोति दार्ष्टान्तिकमर्थम्। तद्वदुपग्रहवानपि—धर्माधोपकरणोपग्रहवानपि 'धर्मोपकरणयुक्तोऽपि' इत्यर्थः। न संगं स्नेहं मूर्च्छामुपयाति। अत एव च बाह्यग्रन्थाभावादभ्यन्तरलोभादिग्रन्था-भावाच्च निर्ग्रन्थ इति। निर्गतो ग्रन्थो निर्ग्रन्थः ॥ १४१ ॥

१–यद्वत्–ब०। २–चलपट्टै–फ०, ब०। ३–इत्य–फ०, ब०।

अर्थ—जैसे घोड़ा अपने योग्य गहनोंसे विभूषित होनेपर भी उनसे मोह नहीं करता। उसी प्रकार निर्ग्रन्थ परिग्रहसे युक्त होनेपर भी उससे मोह नहीं करता।

भावार्थ—यद्यपि निर्ग्रन्थ साधु धार्मिक उपकरणोंको रखते हैं, फिर भी उनमें ममत्व न होनेसे उन्हें परिग्रही नहीं माना जा सकता। जिस प्रकार घोड़ेको भाँति भाँतिके अलङ्कारोंसे अलङ्कृत करनेपर भी वह उनसे मोह नहीं करता है, उसी प्रकार निर्ग्रन्थ साधु भी धर्मोपकरणोंसे मोह नहीं रखता है। इसलिए यह परिग्रह उसके संसार-बन्धका कारण नहीं है।

'कः पुनरयं ग्रन्थः ?' इत्याह—

निर्ग्रन्थका स्वरूप बतलाते हैं :—

ग्रन्थः कर्माष्टविधं मिथ्यात्वाविरतिदुष्टयोगाश्च।
तज्जयहेतोरशठं संयतते यः स निर्ग्रन्थः १४२॥

टीका—ग्रंथ्यते वेष्ट्यते बध्यते येन स ग्रन्थः। तच्च अष्टप्रकारं कर्म ज्ञानावरणाद्यन्तरायपर्यवसानम्। मिथ्यात्वाविरतिदुष्टयोगाश्च। मिथ्यात्वं तत्त्वार्थाश्रद्धानम्। अविरतिः अनिवृत्तिः प्राणातिपातादिभ्यः। दुष्टयोगा मनोवाक्कायाः। मिथ्यात्वादयश्चाष्टविधस्य कर्मणो हेतव इति ग्रन्थशब्दवाच्याः। तेषां कर्ममिथ्यात्वादीनां जयेऽभिभवे निराकरणे यतते मायादिशल्यरहितस्तज्जयहेतोः 'तान् जेष्यामि' इति अशठं सम्यगागमोक्तेन विधिना स निर्ग्रन्थ इति। एतेन मूलसंघादिदिगम्बराःप्रत्युक्ताः॥ १४२॥

अर्थ—आठ प्रकारके कर्म, मिथ्यात्व, अविरति, और अशुभ योग ये सब ग्रन्थ हैं। उन्हें जीतनेके लिए जो कपट रहित होकर विधिपूर्वक प्रयत्न करता है, वही निर्ग्रन्थ है।

भावार्थ—जिसके द्वारा प्राणी बाँधा जाता है, उसे ग्रन्थ कहते हैं। इसी लिए ज्ञानावरणादिक कर्म तथा उनके कारण मिथ्यात्व वगैरहको ग्रन्थ कहते हैं। जिसने बाह्य परिग्रहका त्याग कर दिया है और इन अन्तरङ्गपरिग्रहोंको जीतनेके लिए जो यत्नशील है, वही निर्ग्रन्थ है।

'किं पुनः कल्प्यमकल्प्यञ्च ?' इत्याह—

कल्प्य और अकल्प्यका स्वरूप बतलाते हैं:—

यज्ज्ञानशीलतपसामुपग्रहं निग्रहं च दोषाणाम्।
कल्पयति निश्चये यत्तत्कल्प्यमकल्प्यमवशेषम्॥ १४३॥

टीका—'यत्' इति यस्मात् ज्ञानं श्रुतमागमः, शीलं मूलोत्तरगुणाः, तपोऽनशनादिद्वादशभेदम्, उपग्रहम्—उपोद्वलनं संवर्द्धनम्, निग्रहं च दोषाणाम्—दोषाः क्षुत्पिपासादयः शीतोष्णादयो वा रागद्वेषप्रभृतयो वा, तेषां निग्रहं निवारणं करोति। कल्पयति समर्थमुपग्रहनिग्रह-

१-यस्मायेन ग्रथ्यते वेष्ट्यते स ग्रन्थः-फ० ब०। २-पा भि-फ० ब०। ३-ति सम्य-फ० ब०।
४-निराकरणे-फ०, ब०।

योर्भवति। यद्वस्तु आहारोपधिशय्यादि। निश्चये व्यवहारे वा। उत्सर्गो निश्चयो विधिः, अपवादो व्यवहारो विधिः। तत्कल्प्यम्। यस्मान्निश्चये व्यवहारे ज्ञानादीनामुपग्रहकारि दोषाणां च निग्रहकारि यद्वस्तु तत् कल्पनीयमवशिष्टमिति ॥ १४३ ॥

अर्थ—अतः जो वस्तु ज्ञान, शील, और तपको बढ़ाती है और दोषोंको दूर करती है वह निश्चयसे कल्प्य है और बाकी सब अकल्प्य है।

भावार्थ—व्यवहारमें जो आहारादि वस्तु श्रुतज्ञान, मूलगुण, उत्तरगुण और तपको बढ़ाती हो, मूर्च्छाभाव अथवा राग-द्वेष वगैरह दोषोंको दूर करती हो, वही साधुके ग्रहण करने योग्य है। किन्तु जिसके सेवनसे धर्माराधनमें प्रमाद हो और काम-क्रोधादिक विकार उत्पन्न होते हों, वह अग्राह्य है।

एनमेवार्थं स्पष्टयति—

इसी बातको ही स्पष्ट करते हैं:—

यत्पुनरुपघातकरं सम्यक्त्वज्ञानशीलयोगानाम्।
तत्कल्प्यमप्यकल्प्यं प्रवचनकुत्साकरं यच्च ॥ १४४ ॥

टीका—उपघातो विनाशः, तं करोति यद्वस्तु आहारादि ग्रस्यमानं वस्तुतोपहन्ति सम्यग्दर्शनम्, सम्यग्ज्ञानमागमाख्यम्, शीलं मूलगुणा उत्तरगुणाश्च, योगा मनोवाक्कायाख्याः अहर्निशमावश्यकानुष्ठेया वा व्यापारा योगाः। तदुपघातकारित्वात् कल्प्यमपि तदकल्प्यमेव द्रष्टव्यम्। प्रवचनकुत्साकरं यच्च—यच्च प्रवचनकुत्साकरं कुत्सां निन्दां गर्हां करोति यतस्तत्सर्वमकल्पनीयं मांसमद्यादि अभोज्यादि कुलेषु भक्तपानादिग्रहणं सर्वमेव प्रवचनकुत्साकारि भवत्यकल्प्यमिति ॥ १४४ ॥

अर्थ—जो वस्तु सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्र और दिनभरमें की जानेवाली क्रियाओंको नष्ट करती है, तथा जिससे जिनशासनकी निन्दा होती है, वह वस्तु कल्प्य होनेपर भी अकल्प्य है।

भावार्थ—जिस वस्तुसे सम्यग्दर्शन, सम्यग्ज्ञान एवं सम्यक्चारित्रमें बाधा उपस्थित होती है, दैनिक समीचीन क्रियाओंमें हानि पहुँचती है और जिसके उपयोगसे जैनशासन कलङ्कित होता है, वह वस्तु अकल्प्य ही मानी जानी चाहिए।

किञ्चिच्छुद्धं कल्प्यमकल्प्यं स्यात्स्यादकल्प्यमपि कल्प्यम्।
पिण्डः शय्या वस्त्रं पात्रं वा भेषजाद्यं वा ॥ १४५ ॥

१—सर्वे-दः २—पुस्तके—प० ८० ३—[illegible]

आदिके समयमें भी अकल्प्य कल्प्य हो जाता है। राजघराने वगैरहके किसी बड़े पुरुषने दीक्षा ली हो तो उसके लिए अकल्प्य भी कल्प्य होता है। बीमारी आदिमें वैद्यके कहनेसे अकल्प्य भी कल्प्य होता जीवसे संयुक्त वस्तु, अकल्प्य है; किन्तु यदि दूसरी वस्तु न मिले तो अच्छी तरह देख-भालकर वही कल्प्य हो जाती है। तथा शुद्ध भावोंके होनेपर भी अकल्प्य कल्प्य हो जाता है। अतः कोई वस्तु न सर्वथा कल्प्य ही होती है और न सर्वथा अकल्प्य ही। देश, काल वगैरहकी अपेक्षासे कल्प्य अकल्प्य हो जाता है और अकल्प्य भी कल्प्य हो जाता है।

एवमनैकान्तिकं कल्प्याकल्प्यविधिं निरूप्य योगत्रयनियमनायाह संक्षेपतः—

इस प्रकार अनेकान्तवादके अनुसार कल्प्य और अकल्प्यकी विधिको बतलाकर मन, वचन और काय योगको वशमें करनेके लिए संक्षेपमें कथन करते हैं:—

तच्चिन्त्यं तद्भाष्यं तत्कार्यं भवति सर्वथा यतिना।
नात्मपरोभयबाधकमिह यत्परतश्च सर्वाद्धम्॥ १४७॥

टीका—मनसा तदेव चिन्त्यम्—आलोच्यमार्तरौद्रध्यानद्वयव्युदासेन यन्नात्मनः परस्योभयस्य बाधकं भवति। वाचाऽपि तदेव भाष्यं भाषणीयं यन्नात्मादीनां बाधकं भवति सर्वथा। यतिना कायेनापि धावनवल्गनादिक्रियात्यागेन तदेव कार्यं कर्तव्यं यन्नात्मादीनां बाधकं भवति। सर्वाद्धमिति-अद्धा कालः, 'सर्वकालम्' इत्यर्थः। वर्तमानेऽनागते च। तत्रापि वर्तमाना व्यावहारिकः परिग्राह्यः, अनागतश्च सर्व एव। अतो मनोवाक्कायैः सम्यग्व्यापाराः कार्यास्तथा यथा स्वल्पोऽपि कर्मबन्धो न जायते इति॥ १४७॥

अर्थ—मुनिको सब प्रकारसे वही विचारना चाहिए, वही बोलना चाहिए और वही करना चाहिए, जो इस लोक और परलोकमें सर्वदा न अपनेको दुखदायी हो, न दूसरोंको दुखदायी हो और न उभय को दुखदायी हो।

भावार्थ—आर्तध्यान और रौद्रध्यानको छोड़कर मनसे वही विचारना चाहिए जो अपनेको, दूसरोंको, और दोनोंको कभी भी बाधक न हो। वाणीसे भी ऐसी ही बात बोलनी चाहिए जो अपनेको और दूसरोंको कभी भी कष्ट देनेवाली न हो। तथा शरीरसे भी वही चेष्टा करनी चाहिए जो अपनेको और दूसरोंको कभी भी कष्ट देनेवाली न हो। सारांश यह है कि मन, वचन और कायसे इस रीतिसे काम लेना चाहिए कि उससे थोड़ासा भी कर्म-बन्ध न हो।

सम्प्रति इन्द्रियनियममाचष्टे—

अब इन्द्रियोंको वशमें करनेके लिए कहते हैं:—

सर्वार्थेष्विन्द्रियसंगतेषु वैराग्यमार्गविघ्नेषु।
परिसंख्यानं कार्यं कार्यं परमिच्छता नियतम्॥ १४८॥

१—बहला'द-प०, फ०, ब०

टीका—सर्वे च तेऽर्थाश्च शब्दरूपगन्धरसस्पर्शाः । इन्द्रियैः संगताः-इन्द्रियाणां गोचरतां गतास्तेषु । वैराग्यमार्गविघ्नेषु-वैराग्यमार्गः सम्यग्ज्ञानक्रियाः, तद्विघ्नेषु-तदन्तराय कारिषु । शब्दादिविषयेषु । परिसंख्यानं कार्यम्—इत्वरानेतान् शब्दादीन् विज्ञाय निस्सारानायत्यामहितान् परिसंख्याय प्रत्याख्याय गोचरवर्तिनोऽपि रागद्वेषवर्जनद्वारेण 'ज्ञानपरिज्ञया प्रत्याख्यानपरिज्ञया च' इत्युभाभ्यां प्रकाराभ्यां परिसंख्यानं कार्यमित्यर्थः । कस्मात्पुनः संख्यायन्ते गोचरमागता विषयाः शब्दादयः? इत्याह—कार्यं परमिच्छता नियतम्'। कार्यं सकलकर्मक्षयलक्षणो मोक्षः । प्रकृष्टं परम् । धर्मार्थकाममोक्षाणां मोक्षाख्यमेव कार्यं परं कार्यम् । कामस्य दुःखात्मकत्वात् दुःखहेतुत्वात् तत्साधनव्यभिचारात् । अर्थस्यार्जनरक्षणक्षयसङ्गहिंसादिदोषदर्शनात् अनर्थानुबन्धित्वाच्च नृसुरैश्वर्याणां क्षयातिक्लेशयुक्तत्वात् । अभ्युदयलक्षणस्य धर्मस्यार्थकामफलत्वात् दुष्टता । सर्वेन चात्यन्तिकैकान्तिकसुखस्वभावत्वात् परं कार्यं मोक्षः । तमिच्छता । नियतं 'शाश्वतम' इत्यर्थः । तच्चेच्छता परं कार्यं विषयसुखेषु निस्पृहेण भवितव्यम् ॥ १४८ ॥

अर्थ—उत्कृष्ट कार्य मोक्षके अभिलाषी मुनिको वैराग्यके मार्गमें विघ्न करनेवाले इन्द्रियोंके सम्बन्धी समस्त विषयोंमें सर्वदा विचार करना चाहिए।

भावार्थ—शब्द, रूप, गन्ध, रस और स्पर्शये पाँचों इन्द्रियोंके विषय हैं। ये सभी विषय वैराग्यके मार्ग-सम्यग्ज्ञान और सम्यक्चारित्रमें बाधा डालते हैं। अतः इनको विनाशी, सारहित और उत्तरकालमें अहितकारक मानकर त्यागना चाहिए। धर्म, अर्थ, काम और मोक्षमेंसे मोक्ष ही उत्कृष्ट पुरुषार्थ है, क्योंकि काम पुरुषार्थ तो दुःखका कारण होनेसे दुःख स्वरूप ही है। अर्थ पुरुषार्थमें अर्थके कमाने, रक्षा करने और नाश होने वगैरहमें अनेक दोष पाये जाते हैं। यह अनर्थका कारण है। मनुष्य तथा देवोंका भी ऐश्वर्य नष्ट हो जाता है। अतः क्लेशका कारण है। पुण्यानुबन्धी धर्म पुरुषार्थका फल अर्थ और काम है। अतः सर्वथा अविनाशी और सुख स्वरूप होनेके कारण मोक्ष ही परम पुरुषार्थ है। जो मुनि उस परम पुरुषार्थको प्राप्त करना चाहता है, उसे उक्त विषय-सुखमें निःस्पृह वांछारहित होना चाहिए।

'निस्पृहता चानित्यत्वादिभावनायत्ता' इत्याह—

निःस्पृहता, अनित्यादि बारह भावनाओंके अधीन है। अतः ग्रन्थकार बारह भावनाओंके चिन्तन करनेका उपदेश देते हैं—

> भावयितव्यमनित्यत्वमशरणत्वं तथैकतान्यत्वे ।
> अशुचित्वं संसारः कर्मास्रवसंवरविधिश्च ॥ १४९ ॥

१—[illegible]

निर्जरणलोकविस्तरधर्मस्वाख्याततत्त्वचिन्ताश्च ।
बोधेः सुदुर्लभत्वं च भावना द्वादश विशुद्धाः ॥ १५० ॥

टीका—भावयितव्यम्—अहर्निशं चिन्तनीयमभ्यसनीयम्। किं तत्? अनित्यत्वम्—सर्वस्थानान्यशाश्वतानि, संसारे नास्ति किञ्चिन्नित्यमिति। तथाऽशरणत्वम्—जन्मजरामरणाभिभूतस्य नास्ति क्वचिदपि शरणम्। तथा एकत्वभावना—'एक एवाहम्' इत्यादिका। तथाऽन्यत्वभावना-अन्य एवाहं स्वजनकेभ्यो धनधान्यहिरण्यसुवर्णादेः शरीरकाच्चेति। तथाऽशुचित्वभावना—आद्युत्तरकारणाशुचित्वादिका। तथा संसारभावना—'माता भूत्वा दुहिता भार्या स्वामी दासो शत्रुर्भवति' इत्यादिका। तथा कर्माश्रवभावना—आश्रवद्वाराणि विवृतानि कर्माश्रवन्तीति भावयेत्तस्मात् स्थगनीयानीति। तथा संवरविधिः—आश्रवद्वारनिरोधःस्थगनम्। निरुद्धेष्वाश्रवद्वारेषु कर्मागमनिरोधः कृतो भवति। तथा निर्जरभावना निरुद्धेष्वाश्रवद्वारेषु पूर्वोपात्तस्य कर्मणः तपसा क्षयो भवतीति तथा लोकविस्तरभावनाम् 'ऊर्ध्वाधस्तिर्यग्लोकेषु भ्रान्तमनादौ संसारे सर्वत्र विस्तृतं जातश्च' इति चिन्तयेत्। स्वाख्यातधर्मचिन्तनं 'क्षमादि दशलक्षणको धर्मः शोभन आख्यातो निर्दोषः भव्यसत्त्वानुग्रहाय' इति भावयेत्। बोधेश्च दुर्लभता भावनीया—मनुष्यजन्मकर्मभूम्यार्यदेशकुलकल्पतायुरुपलब्धौ सत्यामपि सम्यक्त्वज्ञानावरणानि बोधिः, तस्य दुर्लभत्वमहर्निशं भावयेत्। एवमेता द्वादश भावनाः सततमनुप्रेक्ष्याः॥ १४९-१५० ॥

अर्थ—अनित्यत्व, अशरणत्व, एकत्व, अन्यत्व, अशुचित्व, संसार, कर्मोंके आस्रवकी विधि, संवरकी विधि, निर्जरा, लोकविस्तार, अच्छी तरहसे कहा गया धर्म और ज्ञानकी दुर्लभता ये बारह भावनाएँ हैं। इनका चिन्तन करना चाहिए।

भावार्थ—सभी वस्तुएँ अनित्य हैं, संसारमें कुछ भी नित्य नहीं है। इस प्रकारके चिन्तन करनेको अनित्यभावना कहते हैं। जन्म, जरा और मृत्युसे घिरे हुए प्राणीको कहीं भी शरण नहीं है, ऐसा चिन्तन करनेको अशरणभावना कहते हैं। मैं अकेला ही हूँ इत्यादि विचारनेको एकत्वभावना कहते हैं। स्वजन कुटुम्बियों, धन-धान्य, सोना-चाँदी वगैरह तथा शरीर आदिसे मैं भिन्न हूँ—ऐसा विचारनेको अन्यत्वभावना कहते हैं। शरीरके आदि कारण रज-वीर्य तथा उत्तर कारण रसादि धातुएँ अपवित्र हैं। अतः शरीर भी अपवित्रताका घर है—ऐसा चिन्तन करनेको अशुचित्वभावना कहते हैं। संसारमें माता, कभी लड़की और पत्नी हो जाती है और पत्नी, माता तथा बहिन हो जाती है। और स्वामी दास तथा शत्रु बन जाता है, इस प्रकार संसार-स्वरूपके चिन्तनको संसारभावना कहते हैं। आस्रवके द्वारोंके खुले रहनेसे कर्म आते हैं। अतः उन्हें बन्द करना चाहिए—ऐसा विचार करनेको कर्मास्रव-भावना कहते हैं। [illegible] आस्रवके रोकनेको संवर कहते हैं। आस्रवके द्वारोंके बन्द हो जानेपर कर्मोंका आना रुक जाता है, ऐसा विचारनेको संवरभावना कहते हैं। आस्रवके द्वारोंके बन्द हो जानेपर तपसे

१—[illegible] २—[illegible] ३—[illegible] ४—[illegible]

द्वारा पहले बँधे हुए कर्मोंका क्षय होता है, ऐसा चिन्तन करनेको निर्जराभावना कहते हैं। यह जीव अनादिकालसे ऊर्ध्व लोक, अधो लोक और मध्य लोकमें भ्रमण करता है, इत्यादि लोकके स्वरूपके विचारनेको लोकविस्तारभावना कहते हैं। भव्य जीवोंके कल्याणके लिए उत्तम क्षमादि दशरूपधर्म अच्छा कहा है, ऐसा चिन्तन करना-धर्म-स्वाख्यातभावना है। मनुष्य जन्म, कर्मभूमि, आर्यदेश, कुल, निरोगता और आयुके पानेपर भी सम्यग्ज्ञानका पाना दुर्लभ है, ऐसा विचारनेको बोधिदुर्लभभावना कहते हैं। इस प्रकार इन बारह भावनाओंका रात-दिन चिन्तन करना चाहिए।

साम्प्रतं एकैकया कारिकया भावनामेकैकां कथयति। तत्र प्रथमां भावनाऽनित्याख्यां तदर्शयन्नाह—

अब एक एक कारिकासे एक एक भावनाको कहते हैं। उनमेंसे पहले अनित्यभावनाको कहते हैं :—

इष्टजनसंप्रयोगर्द्धिविषयसुखसम्पदस्तथारोग्यम् ।
देहश्च यौवनं जीवितञ्च सर्वाण्यनित्यानि ॥ १५१ ॥

टीका—इष्टेन जनेन सह संयोगोऽनित्यः । ऋद्धिविषयसुखसम्पदः—ऋद्धिः सम्पद् विभूतिः, साऽप्यनित्या। विषयाः शब्दादयः, तज्जनिता सुखसम्पदनित्या। आरोग्यं नीरोगता, साप्यनित्यम्, देहः शरीरं सुमाहारस्नानपानाच्छादनानुगृहीतम्, एतदप्यनित्यम्। यौवनमपि [illegible] क्षणभङ्गुरम्। एवम् 'एतत्सर्वमनित्यम्' इति भावयतो न कश्चित् स्नेहः समुत्पद्यते। निःस्पृहश्च मोक्षचिन्तायामेव व्याप्रियत इति ॥ १५१ ॥

अर्थ—इष्ट जनका संयोग, ऋद्धि, विषय सुख, सम्पदा, आरोग्य, शरीर, यौवन और जीवन—ये सभी अनित्य हैं।

भावार्थ—प्रिय जनोंका सम्बन्ध अनित्य है। धन सम्पदा भी अनित्य है। विषय और उनसे होनेवाला सुख भी अनित्य है। नीरोगता भी अनित्य है। खान-पान, स्नान और वस्त्रोंसे रक्षित शरीर भी अनित्य है। जवानी भी चार दिनकी चाँदनी है। जीवन भी असमयमें ही नष्ट हो जानेवाला है। इस प्रकार इन सबकी अनित्यताका विचार करनेसे इनमें किसीसे राग उत्पन्न नहीं होता। अतः रात-दिन इनकी अनित्यताका चिन्तन ही करना रहता है।

अशरणभावनामाह—

अशरणभावनाको कहते हैं —

जन्मजरामरणभयैरभिद्रुते व्याधिवेदनाग्रस्ते ।
जिनवरवचनादन्यत्र नास्ति शरणं क्वचिल्लोके ॥ १५२ ॥

[illegible]

टीका—जन्म उत्पत्तिः, जरा वयोहानिः, मरणं प्राणपरित्यागः, एभ्यो भयानि तैः। अभिद्रुते-अभिभूते। व्याधयो ज्वरातीसारहृद्रोगादयः, वेदनाः शरीरजा मनोभवाश्चः। व्याधिवेदनाग्रस्ते व्याधिवेदनाभिगृहीते, लोके प्राणिसमूहे। जिनवरा जिनप्रधानाः 'तीर्थंकराः' इत्यर्थः। तेषां वचनं वाग्योगस्तत्प्रतिपादितोऽर्थः। तमादाय क्षायोपशमिकभाववर्तिभिर्गणधरैर्दृब्धं द्वादशाङ्गं प्रवचनम्। तन्मुक्त्वा अन्यत्र नास्ति शरणं त्राणमिति ॥ १५२ ॥

अर्थ—जन्म, जरा और मरणके भयसे व्याप्त तथा रोग और कष्टोंसे भरे हुए इस संसारमें भगवान् जिनेन्द्रदेवके वचनोंके सिवाय अन्य कुछ भी शरण नहीं है।

भावार्थ—संसारके सभी प्राणियोंके ऊपर जीवन-मरण और बुढ़ापेका भय सवार है। सभीके पीछे रोग और कष्ट लगे हुए हैं। अतः जिनभगवान्के दिव्य उपदेशको सुनकर गणधरदेवोंने जो द्वादशाङ्ग श्रुतकी रचना की है, उस श्रुतके सिवाय अन्य कुछ भी यहाँ शरण नहीं है।

एकत्वभावनामधिकृत्याह—

एकत्वभावनाको कहते हैं :—

एकस्य जन्ममरणे गतयश्च शुभाशुभा भवावर्ते।
तस्मादाकालिकहितमेकेनैवात्मना कार्यम् ॥ १५३ ॥

टीका—'एकस्य' इति असहायस्य जन्म च मरणञ्च। न खल्वस्य जायमानस्य म्रियमाणस्य वा कश्चित् सहायोऽस्ति। गतयो नारकाद्याः। मरणोत्तरकाले नरकादिगतिषु स्वकृतकर्मफलमनुभवतो नास्ति कश्चित्परः। शुभा देवमनुष्यतिर्यग्योनयः, नरकगतिरशुभा। भवो जन्म, भव एव आवर्तः संसारार्णवः। यत्र प्रदेशे भ्राम्यदास्ते जलं तत्रैव च स आवर्तः। जीवस्यापि तत्र तत्र जन्ममरणे समनुभवतो भवावर्तः। तस्माद् आकालिकम्-अकालहीनम्। हितमेकेनैवात्मना कार्यम्—हितं संयमानुष्ठानं तत्प्राप्यो वा मोक्षोऽत्यन्तहितम्, एकेन असहायेनात्मना कर्तव्यमिति ॥ १५३ ॥

अर्थ—संसाररूपी भँवरमें पड़ा हुआ यह जीव अकेला ही जन्म लेता है, अकेला ही मरता है। और अकेला ही शुभ और अशुभ गतियोंमें जाता है। अतः अकेले ही को अपना स्थायी हित करना चाहिए।

भावार्थ—[illegible] जिस जिस [illegible] चक्कर खाकर [illegible] नीचेको जाता है, उसे [illegible] कहते [illegible] वह भव-आवर्त कहा जाता [illegible] जीव अकेला ही [illegible] और अकेला ही [illegible] जन्म [illegible] और [illegible] मिलता नहीं [illegible] बाद नरकादि गतियोंमें [illegible]

१- [illegible]-प० [illegible] २- [illegible] वाख्या-प० [illegible]-प० ब० ४- [illegible]-फ० ब० ।

फलको भी अकेला ही भोगता है। जीवका हित संयमका पालन करना अथवा उसके द्वारा प्राप्त होनेवाला मोक्ष ही है, जो कभी भी नाश को प्राप्त नहीं होता। अतः जब यह जीव अकेला ही कष्ट भोगता है तो उसे अकेले ही अपना हित-साधन भी करना चाहिए।

अन्यत्वभावनामधिकृत्याह—
अन्यत्वभावनाको कहते हैं:—

अन्योऽहं स्वजनात्परिजनाच्च विभवाच्छरीरकाच्चेति ।
यस्य नियता मतिरियं न बाधते तं हि शोककलिः ॥१५४॥

टीका—स्वोजनः स्वजनो मातापित्रादिः पत्नीपुत्रादिश्च। अस्मादहमन्यो विभिन्नः पृथक्भूतः। परिजनो दासदासीप्रभृतिः। अस्माच्च परिजनादन्य एवाहम्। विभवो धनधान्यादि कनकरजतवस्त्रादिर्वा। अस्मादन्योऽहम्। शरीरकमुपभोगाधिष्ठानम्, तस्मादप्यत्यन्तभिन्न एवाहम्। इत्थं यस्येयं बुद्धिर्नियता नक्तंदिनमालोचिका, न बाधते तं न पीडयति। हि शब्दो यस्मादर्थे। यत्तदोर्नित्याभिसम्बन्धात्। यस्मादेवं भावयन्न बाध्यते शोककलिना, तस्मादन्यत्व (ह्यन्यत्व) भावना कार्या ॥ १५४ ॥

अर्थ—मैं अपने कुटुम्बियों, नौकर-चाकरों, धन धान्य सम्पदा और, शरीरसे विभिन्न हूँ। जिसकी इस प्रकारकी निश्चित मति है उसे शोकरूपी कलिकाल कष्ट नहीं देता।

भावार्थ—जिसकी बुद्धिमें रात दिन यही विचार बना रहता है कि मैं माता, पिता, पत्नी, पुत्र वगैरह कुटुम्बियोंसे भिन्न हूँ, दासी-दास वगैरह परिजनोंसे भिन्न हूँ, धन-धान्य, सोना-चाँदी, वस्त्र वगैरह विभवसे भिन्न हूँ, भोग उपभोगके आश्रय इस शरीरसे भी भिन्न हूँ, उसे कभी भी शोक नहीं सताता। अतः अन्यत्वभावना करनी चाहिए।

अशुचित्वभावनामधिकृत्याह—
अशुचित्वभावनाको कहते हैं—

अशुचिकरणसामर्थ्यादाद्युत्तरकारणाशुचित्वाच्च ।
देहस्याशुचिभावः स्थाने स्थाने भवति चिन्त्यः ॥ १५५ ॥

टीका—शुचिनोऽपि द्रव्यस्याशुचित्वकरणमस्ति सामर्थ्यं शक्तिर्देहस्य। कर्पूरचन्दनागरुकुङ्कुमादि द्रव्यं देहसंपर्कादशुच्येव भवति। तस्मादशुचिकरणसामर्थ्याद्देहस्याशुचित्वमनुचिन्तनीयम्। यदाह—

" एतावदेतदशुचि नान्यत्र किञ्चिच्च विद्यते।
यथा काय कलेवरं यथा तेनैव दूषितम् ॥ "

१—[illegible] । २—[illegible] । ३—[illegible] । ४—[illegible] ।

आद्युत्तरकारणाशुचित्वात् । आदिकारणं शुक्रशोणितम् । उत्तरकारणं जनन्याभ्यवहृतस्य (भक्षितस्य) आहारस्य रसहरण्योपनीतस्य रसस्यास्वादनमत्यन्ताशुचि । एवमाद्युत्तरकारणयोरशुचित्वादशुचिर्देह इति प्रतिक्षणमनुचिन्तनीयम् । स्थाने स्थाने इति शिरःकपालाद्यवयवेषु चरणान्तेषु त्वगस्थ्यादिनासृग्मांसमेदोमज्जास्थिस्नायुजालसन्तानबन्धेषु न कश्चिच्छुचिगन्धोऽस्तीत्यशुचिगन्ध एव विजृंभते इति ॥ १५५ ॥

अर्थ—इस शरीरमें पवित्र पदार्थोंको भी अपवित्र कर देनेकी शक्ति है, इसके आदिकारण तथा उत्तरकारण भी अपवित्र हैं। अतः प्रत्येक स्थानपर उसकी अपवित्रताका विचार करना चाहिए।

भावार्थ—कपूर, चन्दन, अगुरु, केसर वगैरह सुगन्धित द्रव्य शरीरमें लगानेसे दुर्गन्धित हो जाते हैं। तथा शरीरका आदिकारण रज और वीर्य है; क्योंकि प्रारंभमें उन्हीके मिलनेसे शरीर बनना शुरू होता है। बादको माता जो भोजन करती है, उस भोजनका जो रस हरेणीमें आता है उससे शरीर बनता है। अतः शरीरका आरम्भिक कारण भी गन्दा है, और उत्तरकारण भी गन्दा है। और उनके गन्दे होनेसे शरीर भी गन्दा है। इन कारणोंसे सिरसे लेकर पैरतक शरीरके प्रत्येक अङ्गमें अशुचित्व—गन्दगीका विचार करना चाहिए। अर्थात् यह सोचना चाहिए कि यह शरीर घानसे भरा हुआ है। इसके अन्दर खून, माँस, चर्बी, मज्जा, और हड्डियाँ भरी हुई हैं; जो नसोंके जालसे वेष्टित हैं। इसमें कहीं भी शुचिपना नहीं है। अतः अशुचिपना ही बढ़ता रहता है।

संसारभावनामधिकृत्याह—

संसारभावनाको कहते हैं:—

माता भूत्वा दुहिता भगिनी भार्या च भवति संसारे ।
व्रजति सुतः पितृतां भ्रातृतां पुनः शत्रुतां चैव ॥ १५६ ॥

टीका—संसारे परिभ्रमतां सत्त्वानां माता भूत्वा भूयः सैव च दुहिता भवति, सैव च पुनर्भार्या । सैव च संसृतौ परिवर्तमाना जामिरपि भवति । तथा पुत्रो भूत्वा पिता भवति । स एव सुतः पुनर्भ्रातृत्वमायाति । स एव च पुनः सपत्नो भवतीत्येवमाजवंजवीभावे प्राये संसारे सर्वसत्त्वाः पितृत्वेन मातृत्वेन पुत्रत्वेन शत्रुत्वेन चेत्यादिना सम्बन्धेन कृतसम्बन्धा बभूवुरिति ॥ १५६ ॥

अर्थ—संसारमें जीव माता होकर पुत्री, बहिन और पत्नी हो जाता है, तथा पुत्र होकर पिता भ्राता और शत्रु तक हो जाता है।

भावार्थ—संसारमें परिभ्रमण करता हुआ जीव माता होकर पुत्री हो जाता है, पुत्री होकर बहिन हो जाता है और बहिन होकर पुत्री हो जाता है। तथा पुत्री होकर पिता हो जाता है, पिता होकर

१–एक ही भवमें अठारहनातेकी कथा प्रसिद्ध है जो स्वामिकार्तिकेयानुप्रेक्षाकी टीकामें दी गई है। यह ग्रंथ श्रीशुभचन्द्रकृत संस्कृतटीका और नई हिन्दीटीका सहित इसी ग्रन्थमालामें छप रहा है।

अष्टम, दशम, द्वादश आदि तपोंके द्वारा वे नीरस होजाते हैं। और नीरस होजानेसे बिना फल दिये ही वे कर्म मसले गये कुसुंभके फूलकी तरह आत्मासे झड़ जाते हैं।

लोकभावनामधिकृत्याह—

लोकभावनाको कहते हैं:—

लोकस्याधस्तिर्यक्त्वं चिन्तयेदूर्ध्वमपि च बाहल्यम्।
सर्वत्र जन्ममरणे रूपिद्रव्योपयोगांश्च ॥ १६० ॥

टीका—जीवाजीवाधारक्षेत्रं लोकः, तस्याधस्तिर्यगूर्ध्वञ्च चिन्तयेत्। बाहल्यं विस्तरम्। अधः सप्तरज्जुप्रमाणो विस्तीर्णतया लोकः। तिर्यग् रज्जुप्रमाणः। ऊर्ध्वं ब्रह्मलोके पञ्च रज्जुप्रमाणः। पर्यन्ते रज्जुप्रमाण इति। अधः (च) शब्दादूर्ध्वांयश्चतुर्दशरज्जुप्रमाणः। सर्वत्र लोके जन्ममरणे समनुभूते व्यापकमधिकरणम्। नास्ति तिलतुषमात्रोऽपि लोकाकाशदेशो यत्र न जातं न मृतं वा मयेति। रूपिद्रव्योपयोगांश्चेति रूपीणि यानि द्रव्याणि परमाणुप्रभृतीन्यनन्तानन्तस्कन्धपर्यवसानानि, तेषां च उपयोगः परिभोगो मनोवाक्कायाहारोच्छ्वासनिश्वासादिरूपेण सर्वेषां कृतोऽस्मादृशा संपर्यटता, नास्मि न तृप्त इत्यनुक्षणमनुचिन्तयेदिति ॥ १६० ॥

अर्थ—नीचे, तिरछे और ऊपर लोकके विस्तारका विचार करना चाहिए तथा यह भी विचार करना चाहिए कि लोकमें सर्वत्र ही मैं जन्मा और मरा हूँ और सभी रूपी द्रव्योंका मैंने उपभोग किया है।

भावार्थ—जीवों और अजीवोंके आधारभूत क्षेत्रको लोक कहते हैं। उसके तीन भाग हैं—अधोलोक, मध्यलोक या तिर्यग्लोक और ऊर्ध्वलोक। अधोलोकका विस्तार सात राजू है। तिर्यग्लोकका एक राजू है और ऊर्ध्वलोकका विस्तार ब्रह्मलोकके समीपमें पाँच राजू है और अन्तमें एक राजू है। 'च' शब्दसे अधोलोकसे लेकर ऊर्ध्वलोक तक सम्पूर्ण लोककी ऊँचाई चौदह राजू है। सभी लोकमें मैंने जन्म तथा मरणका अनुभव किया है। लोकाकाशमें तिल बराबर भी कोई ऐसा स्थान नहीं है, जहाँ मैंने जन्म न लिया हो और मैं मरा न होऊँ। परमाणुसे लेकर अनन्तानन्तप्रदेशी स्कन्ध तक जितने पुद्गल द्रव्य हैं, चारों अनन्त करते हुए मैंने मन, वचन, काय, आहार और श्वास उच्छ्वास वगैरहके द्वारा उन सभीको भोग डाला है, तो भी मेरी तृप्ति नहीं हुई है। इस प्रकार प्रतिसमय विचार करते रहना चाहिए।

स्वाख्यातधर्मभावनामधिकृत्याह—

स्वाख्यातधर्मभावनाको कहते हैं:—

धर्मोऽयं स्वाख्यातो जगद्धितार्थं जिनैर्जितारिगणैः।
येऽत्र रतास्ते संसारसागरं लीलयोत्तीर्णाः ॥ १६१ ॥

टीका—श्रुतधर्मश्चारित्रधर्मश्च सुष्ठु निर्दोषमाख्यातः । किमर्थमाख्यात इत्याह—जगद्धितार्थम्, जगच्छब्देन प्राणिनोऽभिधित्सिता जगद्भ्यः प्राणिभ्यो हितमेतदिति । प्रतिविशिष्टं प्रयोजनमुद्दिश्याख्यातः । जिनैस्तीर्थकृद्भिः । अरयः क्रोधादिपरीषहकर्माख्याः । जितोऽभिभूतो निराकृतोऽरिगणो यैस्ते जितारिगणाः । इत्थंलक्षणे च धर्मे आगमरूपे क्षमादिलक्षणे च । ये रताः सक्तास्ते संसारसागरं लीलया अनायासेन सुखपरम्परया । उत्तीर्णाः परं पारमुपताः । मोक्षं प्राप्ता इत्यर्थः ॥ १६१ ॥

अर्थ—कर्मरूपी शत्रुओंके जेता तीर्थंकरोंने संसारके कल्याणके लिए इस आगमरूप और उत्तमक्षमादि लक्षण धर्मका निर्दोष कथन किया है । इसमें जो अनुरक्त हुए, उन्होंने संसाररूपी समुद्रको अनायास ही पार कर लिया ।

भावार्थ—धर्मके मार्ग-पर चलनेसे ही मनुष्य आत्म-कल्याण कर सकता है । जबतक वह धर्मके रास्ते पर नहीं चलता, उसका अनादि संसार-परिभ्रमणके चक्रसे छुटकारा नहीं हो सकता । कर्म शत्रुओंपर विजय प्राप्त करनेवाले जिनेन्द्रभगवान्ने इस धर्मके दो रूप बतलाये हैं । पहला आगमरूप है और दूसरा उत्तम क्षमादि दशलक्षणरूप है । आगमरूप धर्मसे मनुष्य स्व और परका बोध करता है और अपनी अविराम साधनासे संसार-चक्रसे मुक्ति-लाभ करता है । उत्तम क्षमादिरूप धर्मका लाभ भी प्राणियोंको इसी प्रकार संसार-सागरसे पार उतारता है ।

दुर्लभबोधित्वभावनामधिकृत्याह—

दुर्लभबोधिभावनाको कहते हैं :—

मानुष्यकर्मभूम्यार्यदेशकुलकल्पतायुरुपलब्धौ ।
श्रद्धाकथकश्रवणेषु सत्स्वपि सुदुर्लभा बोधिः ॥ १६२ ॥

टीका—प्राक् तावन्मानुषजन्मैव दुर्लभं चोल्लकादिदृष्टान्तदशकेन विभावनीयम् । सति च मानुषजन्मनि कर्मभूमिः सुदुर्लभा । कर्मभूमिरपि यत्र तीर्थकृत उत्पद्यन्ते सद्धर्मदेशनाश्रवणाः परिनिर्वाणं प्राप्नुवन्ति भव्याः, पञ्च भरतानि, पञ्चैरावतानि विदेहाश्च पञ्चैव । मानुषत्वे कर्मभूमौ च सत्याम् आर्यो देशो मगधो वङ्गकलिङ्गादिर्वा दुर्लभः । सत्स्वेतेषु त्रिषु कुलमनवद्यमिक्ष्वाकुहरिवंशादि दुर्लभम् । एतेष्वपि कुलपर्यन्तेषु कल्पता नीरोगता दुर्लभा । एतेषु च कल्पतान्तेषु अवाप्तेषु दीर्घायुष्कं दुर्लभम् । आयुष्कान्तेषु च समासादितेषु श्रद्धा धर्मे [illegible] दुर्लभा । सत्स्वपि [illegible] कथकः सद्गुरुः [illegible] दुर्लभः । सत्स्वपि कथके श्रवणमाकर्णनं [illegible] दुर्लभम् [illegible]
[illegible]

प्राप्तेष्वपि सुदुर्लभा बोधिर्भवति । बोधिः सम्यग्दर्शनसम्यग्ज्ञानलाभः । तत्सम्यक्त्वं शङ्कादिशल्यरहितं सुदुर्लभं भवतीत्यर्थः ॥ १६२ ॥

अर्थ—मनुष्य जन्म, कर्मभूमि, आर्यदेश, कुल, नीरोगता, और आयुके प्राप्त होनेपर तथा श्रद्धा, सद्गुरु और शास्त्र-श्रवणके होनेपर भी सम्यग्ज्ञानका प्राप्त होना बड़ा कठिन है ।

भावार्थ—सबसे पहले मनुष्य जन्मका पाना ही दुर्लभ है । यदि मनुष्य जन्म मिल भी गया तो कर्मभूमिका मनुष्य होना दुर्लभ है । पाँच भरत, पाँच ऐरावत और पाँच विदेह, ये पन्द्रह कर्म भूमियाँ हैं । इनमें ही तीर्थंकर जन्म लेते हैं और सच्चे धर्मका उपदेश करते हैं, तथा यहींसे भव्यजीव मोक्ष प्राप्त करते हैं । मनुष्य जन्म और कर्मभूमिके प्राप्त होनेपर भी मगध, (बिहार) बंग, (बंगाल) कलिंग (उड़ीसा) वगैरह आर्य देशोंका मिलना दुर्लभ है । इन तीनोंके मिलनेपर भी इक्ष्वाकु—हरिवंश जैसे शुद्ध कुलोंका मिलना दुर्लभ है । इन सबके मिलनेपर भी नीरोग शरीरका पाना दुर्लभ है । नीरोगताके पानेपर भी दीर्घ आयुका पाना दुर्लभ है । दीर्घ आयु पर्यन्त सब बातोंके मिल जानेपर भी धर्मको जाननेकी इच्छाका होना दुर्लभ है । धर्मको जाननेकी इच्छाके होनेपर भी सच्चे धर्मका उपदेष्टा मिलना दुर्लभ है । उपदेष्टाके मिलनेपर भी उसका उपदेश सुनना दुर्लभ है । क्योंकि घरके काम-धन्धोंमें व्यग्र रहनेके कारण तथा आलस्य, मोह, अनादर, घमंड, प्रमाद, कंजूसी, डर, रंज, अज्ञान, और खेल तमाशोंके कारण धर्म श्रवणकी ओर रुचि ही नहीं होती । मनुष्य जन्मसे लेकर श्रवणपर्यन्त सब बातोंके प्राप्त होनेपर भी सम्यग्दर्शन और सम्यग्ज्ञान का प्राप्त होना बड़ा दुर्लभ है ।

तां दुर्लभां भवशतैर्लब्ध्वाप्यतिदुर्लभा पुनर्विरतिः ।
मोहाद्रागात्कापथविलोकनाद्गौरववशाच्च ॥ १६३ ॥

टीका—तां दुर्लभां सम्यग्दर्शनादिकां बोधिमवाप्य । भूयोऽपिदुर्लभा विरतिः सर्वविरतिर्देशविरतिश्च । किं पुनः कारणं सम्यक्त्वलाभे सति विरतिर्दुर्लभेत्याह—मोहोऽज्ञानम् । मोह इदं कृत्वा इदं चानुष्ठाय ततः प्रव्रजिष्यामीति, श्रावकधर्मं वा प्रतिपत्स्ये न सर्वत्यागं कर्तुं शक्नोमीत्येतदज्ञानम् । नेदमवगच्छत्यकाण्डभङ्गुरमिदं जीवितं सहसैव ध्वंसते नाम, प्रस्तावं नैवाश्व इति । रागाद्वा न लभते विरतिम् । पत्नीपुत्रादिषु अनुरक्तहृदयो न शक्नोति त्यक्तुं गृहवासमरतिम् । कुत्सिताः पन्थानः कापथाः, तद्विलोकनं चित्तभ्रमः । कः पुनरत्र पन्थाः संसारोत्तारणे क्षम इति कापथजनितभ्रान्तिदर्शनादपि प्रशमवाप्नोति । दूरतर एव चारित्रलाभः । गौरववशाच्चेति गौरवमादरः, तत्रिः ऋद्धिरससुखेषु । ऋद्धिर्विभूतिर्महती द्रव्यसम्पत् तां हातुं न शक्नोति लोभकषायानुगतचेता । रसेष्वभीष्टेषु स्निग्धादिषु शक्तिरादरो गौरवं तं शक्नोति हातुं रसनेन्द्रियवशीकरणात् । सुखगौरवं यथानुरूपवेशं प्रधाननिवाससाधारण शयनस्नानविलेपनादिविलेपनं गन्धपुष्पमाल्यादिभिरनभिष्टस्त्रीपरिभोगश्च तदनन्यचित्तत्वम् । अतो बोधिलाभे सत्यपि सर्वविरतिर्दुर्लभेत्युक्तम् ॥ १६३ ॥

१-[illegible]

अर्थ—सैकड़ों भवोंमें उस दुर्लभ सम्यग्ज्ञानको प्राप्त करके भी अज्ञानसे, रागसे, कुमार्गके देख लेनेसे और सांसारिक सुखके अधीन होनेसे चारित्रका प्राप्त करना अत्यन्त दुर्लभ है।

भावार्थ—सैकड़ों भव धारण करनेके बाद यदि किसी तरह सम्यग्ज्ञानका लाभ हो भी गया तो देशचारित्र और सकलचारित्रका पाना बड़ा कठिन है, क्योंकि मनुष्यके पीछे मोह वगैरह लगे हुए हैं। मोहके वशीभूत हुआ मनुष्य सोचता है कि अमुक अमुक काम करके दीक्षा लूँगा। अथवा श्रावकके व्रत लूँगा। क्योंकि मैं सकल त्याग नहीं कर सकता हूँ। मोहके उदयसे वह यह नहीं जानता है कि यह जीवन क्षणभंगुर है, यह अचानक ही नष्ट होजाता है और यह किसीकी प्रतीक्षा नहीं करता है। तथा रागके कारण भी चारित्र धारण नहीं कर पाता; क्योंकि पत्नी-पुत्र वगैरहमें अनुरक्त होनेके कारण वह घर नहीं छोड़ सकता। इसके सिवाय अनेक कुमार्गोंके मोहजालमें पड़कर भी वह सुमार्गको ग्रहण नहीं कर पाता। इसलिए भी चारित्रका लाभ उसे नहीं हो पाता। तथा लोभ कषायके वशमें होकर वह धन-सम्पदाको छोड़नेमें हिचकता है। रसना इन्द्रियके वशमें होनेके कारण इष्ट रसोंको नहीं छोड़ सकता। सुखमें आसक्त होनेके कारण ऋतुके अनुकूल आहार-विहार, शय्या, चन्दन वगैरहका लेप, धूप, माला, स्त्री वगैरहको छोड़नेमें असमर्थ होता है। अतः सम्यग्ज्ञानका लाभ होनेपर भी सकलचारित्रका पाना दुर्लभ है।

तत्प्राप्य विरतिरत्नं विरागमार्गविजयो दुरधिगम्यः।
इन्द्रियकषायगौरवपरीषहसपत्नविधुरेण ॥ १६४ ॥

टीका—सकलं विरतिरत्नं प्राप्य यदुक्तं पूर्वं दुर्लभं तदवाप्य सर्वविरतिरत्नम्। विरागमार्गविजयो दुरधिगम्यः। विरागस्य मार्गो रागप्रहाणमार्गः यथोक्तलक्षणः शास्त्रे "हिंसादिष्विहामुत्र चापायावद्यदर्शनम्", "दुःखमेव वा" इत्यादि। एवंलक्षणकस्य विरागमार्गस्य विजयः परिचयोऽभ्यसनम्। अधिगम्यते प्राप्यतेऽधिगम्यः, दुःखेनाधिगम्यो दुःप्राप्य इत्यर्थः। कस्मात् पुनर्दुःखेनाधिगम्यत इत्याह—इन्द्रियाणि परिपन्थानि विराग-मार्गस्य विघ्नकरणानि। कषायाः क्रोधादयः, सपत्नाः शत्रवः परिपन्थिनः। गौरवमुक्तलक्षणं त्रिधा-ऋद्धिरससातारव्यम्। क्षुत्पिपासादयः परिषहाः, ते चानन्यतुल्याः सपत्नाः। एभिरि-न्द्रियादिभिः सपत्नैर्विधुरो विसंस्थुल आकुलीकृतः न वैराग्यमार्गमभ्यसितुं समर्थो भवति। इन्द्रियादिसपत्नविधुरेण न शक्यते विरागमार्गविजयः कर्तुमिति ॥ १६४ ॥

अर्थ—उस सकलचारित्ररूप रत्नको प्राप्त करके, इन्द्रिय, कषाय, विषय-सुखमें आदरभाव और परीषहरूप शत्रुओंके द्वारा व्याकुल हुए मनुष्यके लिए वैराग्य-मार्गको जीतना अत्यन्त कठिन है।

भावार्थ—इन्द्रियाँ, क्रोधादि कषाय, [illegible], रस और सुखमें आदरभाव और भूख प्यास [illegible] हैं। सकलचारित्र धारण करके भी जो इन्हें नहीं जीत सका, वह [illegible] नहीं कर सकता। अतः [illegible] सकलचारित्रमें भी दुष्कर है।

तस्मात्परीषहेन्द्रियगौरवगणनायकान् कषायरिपून् ।
क्षान्तिबलमार्दवार्जवसन्तोषैः साधयेद्धीरः ॥१६५॥

टीका—यस्मादेते रिपवो बलिनः कषायगणनायकाः । तस्मात् कषायानेव पूर्वं नायकानिन्द्रियादीनां विजयेत । जितेषु च नायकेषु हतं सैन्यमनायकमिन्द्रियादीनि । गणशब्दः प्रत्येकमभिसंबध्यते, इन्द्रियगणस्य, परीषहगणस्य, गौरवगणस्य च नायकाः प्रवर्तका नेतारः । तान् कषायान् वैरिणः क्षान्तिबलमार्दवार्जवसन्तोषैर्यथासंख्यं साधयेद्धीरः । बलशब्दः प्रत्येकमभिसंबध्यते, क्षान्तिबलेन मार्दवबलेन आर्जवबलेन सन्तोषबलेन चतुरङ्गबलेनामुना बलेन साधयेत् उत्थितान विरागमार्गाद्धीरः सात्त्विक इत्यर्थः । यथासंख्यं क्रोधादयो रिपवः क्षान्त्यदिर्बलैः साध्या भवन्ति ॥ १६९ ॥

अर्थ—अतः धीर मनुष्यको परीषह, इन्द्रिय और गौरव (विषय सुखमें आदर भाव)के समूहके नायक कषायरूपी शत्रुओंको क्षमा, मार्दव, आर्जव और सन्तोषरूपी बलके द्वारा जीतना चाहिए।

भावार्थ—यतः ये शत्रु बलवान् हैं और उनका प्रधान नेता कषाय है, अतः पहले कषायोंको ही जीतना चाहिए। क्योंकि सेनापतिके पराजित होनेपर बिना नायककी सेना स्वयं ही पराजित हो जाती है। गण शब्दको प्रत्येकके साथ लगाना चाहिए। अर्थात् इन्द्रियगण, परीषहगण, और गौरवगणके नेता कषायरूपी शत्रुओंको क्रमशः क्षमाबल, मार्दवबल, आर्जवबल और सन्तोषरूपी चतुरङ्ग सेनासे वशमें करना चाहिए। अर्थात् क्रोध कषायको क्षमाबलसे, मान कषायको मार्दवबलसे, माया कषायको आर्जवबलसे और लोभ कषायको संतोषबलसे जीतना चाहिए।

संचिन्त्य कषायाणामुदयनिमित्तमुपशान्तिहेतुं च ।
त्रिकरणशुद्धमपि तयोः परिहारासेवने कार्ये ॥ १६६ ॥

टीका—कषायाणामुदयनिमित्तमालोच्य क्रोधादीनामनेकनिमित्तेन अयं क्रोधादि कषायो जायत इति उपशान्तिहेतुं च संचिन्त्य अनेन क्रियमाणेनायमुपशाम्यति कषायः प्रशमं गच्छति। अतस्तयोरुदयनिमित्तप्रशमहेत्वोर्यथासंख्यं परिहार आसेवनं च कार्यम्। परिहारोऽपि कार्यः कायवाग्मनोभिः कृतकारितानुमतिभिश्चोदय—निमित्तस्य, उपशान्तिहेतूनामपि कृतकारितानुमतिभिः[2] कषायादिभिश्चासेवनं त्रिकरणशुद्धं कार्यमिति रागद्वेषमोहानां निवारणार्थम् ॥ १६६ ॥

अर्थ—कषायोंके उदयके निमित्तको और उपशमके निमित्तको अच्छी तरहसे विचारकर मन, वचन और कायकी शुद्धिसे उन दोनोंका क्रमशः त्याग और सेवन करना चाहिए।

भावार्थ—यह विचारना चाहिए कि किस निमित्तसे क्रोध वगैरह उत्पन्न होते हैं और किस निमित्तसे उनकी शान्ति होती है ? दोनोंका विचार करके मन, वचन, काय और कृत, कारित, अनुमो-

१—परिहारो सेवने कार्यं ब. । २—मति......रागद्वेषमोहानां फ. ।

दनासे उत्पत्तिके निमित्तोंको त्यागना चाहिए और शान्तिके निमित्तोंका पालन करना चाहिए। अर्थात् जिन जिन कारणोंसे कषाय उत्पन्न होती हो, उन उन कारणोंसे दूर रहना चाहिए और जिन जिन कारणोंसे कषाय शान्त होती हो, उन उन कारणोंका अभ्यास करना चाहिए।

सेव्यः क्षान्तिर्मार्दवमार्जवशौचे च संयमत्यागौ।
सत्यतपोब्रह्माकिञ्चन्यानीत्येष धर्मविधिः॥ १६७

टीका—सेव्योऽनुष्ठेयो दशविधो धर्मः। तान् दशभेदान् नामग्राहमाचष्टे। क्षान्तिः 'क्षमूष्' सहने, क्षमितव्याः आक्रोशप्रहारादयः। मार्दवं मानविजयस्तद्वृत्तापनोदः। आर्जवं ऋजुता यथाचरिताख्यायिता। शुचिभावः शौचम्। अलोभता विगततृष्णत्वम्। संयमः पञ्चास्रवादिविरमणं पृथिवीकायसंयमादिर्वा सप्तदशभेदः। वधबन्धनादित्यागः प्रासुकैपणीयं वा साधुभ्यो भक्तपानवस्त्रपात्रादिदानं यतिरेव ददाति स च त्यागः। सत्यं सद्भ्यो हितं सत्यम्। तच्चापि संवादनादि चतुर्विधम्। तपो द्वादशभेदमनशनादिकम्। ब्रह्म अब्रह्मणो निवृत्तिर्मैथुननिवृत्तिरित्यर्थः। अकिञ्चनस्य भाव आकिञ्चन्यं निष्परिग्रहता। धर्मोपकरणादृते नान्यत् किञ्चन परिग्राह्यम्। एष धर्मस्य विधिर्भेद इत्यर्थः॥ १६७॥

अर्थ—क्षमा, मार्दव, आर्जव, शौच, संयम, त्याग, सत्य, तप, ब्रह्मचर्य, और आकिञ्चन्य—धर्मके ये दस भेद हैं। इनका सेवन करना चाहिए।

भावार्थ—धर्मके दस भेदोंका पालन करना चाहिए। उन दस भेदोंको बतलाते हैं। शान्तभावसे गाली-गलौज और मार वगैरहके सहनेको क्षमा कहते हैं। मान कषायके जीतनेको मार्दव कहते हैं। सरलताको आर्जव कहते हैं, अर्थात् जैसा करना वैसा ही कहना आर्जव है। पवित्रताको शौच कहते हैं, अर्थात् लोभ न करना—तृष्णाका न होना-शौच है। आस्रवके कारण हिंसा वगैरह पाँच पापोंसे विरक्त होना अथवा पृथिवीकाय वगैरहमें संयम करना संयम है। वध, बन्धन वगैरहका त्यागना अथवा साधुओंको प्रासुक भिक्षा देना त्याग है। हितकर वचन बोलना सत्य है। अनशन आदिको तप कहते हैं। मैथुनसे निवृत्त होनेको ब्रह्मचर्य कहते हैं। परिग्रहके अभावको अर्थात् धर्मके उपकरणोंके सिवाय अन्य कुछ भी परिग्रहके न रखनेको आकिञ्चन्य कहते हैं।

क्षान्तेः प्राधान्यं प्रदर्शयन्नाह—

क्षमाधर्मकी प्रधानता बतलाते हैं:—

धर्मस्य दया मूलं न चाक्षमावान् दयां समादत्ते।
तस्माद्यः क्षान्तिपरः स साधयत्युत्तमं धर्मम्॥ १६८॥

टीका—योऽयं दशप्रकारो धर्मस्तस्य धर्मस्य दया मूलम्। दया प्राणिनां रक्षणमहिंसे-त्यर्थः। सा मूलं प्रतिष्ठा धर्मस्याहिंसादिलक्षणत्वात्। प्राणिनामरक्षणार्थं क्षान्तेर-

मतोपदेशः । न चाक्षमावान् दयां समादत्ते । अविद्यमानक्षान्तिरक्षमः, नासौ दयां समादत्ते न संगृह्णातीति । क्रोधाविष्टो हि न कश्चिदपेक्षते चेतनमचेतनं वा ऐहिकमामुष्मिकं वा प्रत्यपायम्, तस्माद्यः क्षमाप्रधानः क्षान्त्या वा प्रकृष्टः स साधयत्याराधयति । दशलक्षणमुत्तमं धर्ममिति ॥ १६८ ॥

अर्थ—धर्मका मूल दया है; किन्तु जो क्षमाशील नहीं है वह दयाको धारण नहीं कर सकता । अतः जो क्षमा धर्ममें तत्पर है, वही उत्तम धर्मको साधन करता है ।

भावार्थ—धर्मके जो दस भेद बतलाये गये हैं, उनका मूल दया है । क्योंकि दया अहिंसाको कहते हैं और धर्मका लक्षण अहिंसा ही है । जितने व्रत बतलाये गये हैं वे सब प्राणियोंके प्राणोंकी रक्षा करनेके लिए ही बतलाये गये हैं । किन्तु जो क्षमाशील नहीं है, वह प्राणियों पर दया नहीं कर सकता; क्योंकि क्रोधी मनुष्यको चेतन-अचेतन अथवा इसलोक—परलोकका कोई ध्यान नहीं रहता । अतः जो क्षमाधर्मके पालन करनेमें सदा तत्पर रहता है वही दशलक्षण धर्मका पालन कर सकता है ।

मार्दवमधिकृत्याह—

मार्दवधर्मको कहते हैं:—

विनयायत्ताश्च गुणाः सर्वे विनयश्च मार्दवायत्तः ।
यस्मिन् मार्दवमखिलं स सर्वगुणभाक्त्वमाप्नोति ॥ १६९ ॥

टीका—विनयो ज्ञानदर्शनचारित्रोपचाराख्यः । तदायत्ता गुणाः । स च विनयो मार्दवायत्तः । मार्दवं च मानविजयः । गर्वे निराकृते उपचारविनयोऽभ्युत्थानाञ्जलिप्रग्रहादिकः शक्यः कर्तुम् । यत्र च पुरुषे मार्दवमखिलं जात्यादिमदाष्टकनिराकारि स सर्वगुणभाग् भवति । ज्ञानदर्शनचारित्रसाध्याः सर्वे गुणास्तत्र संभवन्तीति । तस्मान्मानं निराकृत्य मार्दवमासेवनीयम् ॥ १६९ ॥

अर्थ—सब गुण विनयके आधीन हैं और विनय मार्दवधर्मके आधीन है । जिसमें पूर्ण मार्दवधर्म है वह सब गुणोंको प्राप्त करता है ।

भावार्थ—सम्यग्ज्ञान सम्यग्दर्शन और सम्यक्चारित्रके प्रति मन, वचन और कायसे जो आदरभाव प्रगट किया जाता है, उसे विनय कहते हैं । सब गुणोंका मूल विनयगुण है । यह विनयगुण उसीको प्राप्त होता है, जो मानको जीत लेता है, क्योंकि गर्वसे दूर हो जानेपर ही दूसरोंके लिए उठकर खड़ा हो जाना, और हाथ जोड़ना वगैरह काम किये जा सकते हैं । और जिस मनुष्यमें आठों मदोंको दूर करनेवाला मार्दवधर्म वास करने लगता है, वह मनुष्य सर्वगुणसम्पन्न होता है—सभी गुण आकर उसमें बस जाते हैं । अतः मानको दूर करके मार्दवका सेवन करना चाहिए ।

१-प्रसादः ब० । २-गुणाः सर्वे मूलोत्तराख्याः ब० ।

मायामधिकृत्याह—
आर्जवधर्मको कहते हैं :—

नानार्जवो विशुध्यति न धर्ममाराधयत्यशुद्धात्मा ।
धर्मादृते न मोक्षो मोक्षात्परं सुखं नान्यत् ॥ १७० ॥

टीका—माया शाठ्यं कौटिल्यम्, तत्प्रतिपक्षमार्जवं ऋजुता यथाचेष्टितं तथाख्याति, न किञ्चिदपह्नुते। यस्तु तथा न करोति, स खल्वनार्जवः, तस्य च शुचिर्नास्ति। तस्माद्यथाख्यातापराधप्रतिपन्नप्रायश्चित्तस्य शुद्धिर्जायते । तद्विपरीतस्य न जातुचिच्छुद्धिः। न चाशुद्धात्मा धर्ममाराधयति क्षमादिकम्। न चामुं धर्ममन्तरेण मोक्षावाप्तिः। न च मोक्षावाप्तिमन्तरेणैकान्तिकात्यन्तिकादिसुखलाभ इति। तस्मादृजुना भवितव्यमालोचनादाविति॥ १७० ॥

अर्थ—आर्जवके विना शुद्धि नहीं होती। अशुद्ध आत्मा धर्मका आराधन नहीं कर सकता। धर्मके विना मोक्षकी प्राप्ति नहीं होती और मोक्षसे बढ़कर दूसरा कोई सुख नहीं है।

भावार्थ—कुटिलताको माया कहते हैं। उसका प्रतिपक्षी आर्जव है। आर्जव सरलताको कहते हैं। अर्थात् जैसा किया वैसा कह देना और गुरुसे कुछ भी न छिपाना आर्जवधर्म है। जो ऐसा नहीं करता, उसकी शुद्धि नहीं होती। अतः जो अपने किये हुएको जैसाका तैसा गुरुसे कह देता है और गुरु जो प्रायश्चित्त देते हैं, उसका पालन करता है, उसकी शुद्धि होती है। किन्तु जो किये हुए अपराधको छिपा जाता है, उसकी शुद्धि कभी भी नहीं होती। ऐसा कपटी आत्मा क्षमा वगैरह धर्मका भी ठीक ठीक पालन नहीं कर सकता और उनके पालन किये विना मोक्षकी प्राप्ति नहीं हो सकती। तथा मोक्ष प्राप्त किये विना अविनश्वर सुखकी प्राप्ति नहीं हो सकती। अतः साधुको आलोचना आदि करते समय सदा सरल रहना चाहिए।

शौचमधिकृत्याह—
शौचधर्मको कहते हैं :—

यद्द्रव्योपकरणभक्तपानदेहाधिकारकं शौचम् ।
तद्भवति भावशौचानुपरोधाद्यत्नतः कार्यम् ॥ १७१ ॥

टीका—द्विविधं शौचं द्रव्यभावभेदात्। तत्र द्रव्य शौच्यं बाह्यद्रव्यम्। बाह्यद्रव्यं च सचेतनमचेतनं वा शैक्षादि, "अट्ठारस पुरिसेसु वीसं इत्थीसु दस नपुंसेसु। पव्वावणा अणरिहा अणहा पुण इत्थिया चेव ॥" इत्यादि सदोषत्वात्त्याज्यम्। उपकरणमुपकारि ज्ञानादीनाम्। तच्चोद्गमादिशुद्धं शुचि भवति, अन्यथाऽशुचीति । तथा भक्तपानमप्युद्गमादिदोषरहितं शुचि, अन्यथाऽशुचीति। देहशौचं तु पुरीषाद्युत्सर्गपूर्वकं निर्लेपं निर्गन्धं चेति एतानि प्रयोजनान्यधिकृत्य यत्प्रवृत्तं तदधिकारकं तद्भवति तत्कार्यं कर्त्तव्यं भवतीति। भाव शौचस्यान-

परोधाद्बाधनात्। यत्नत इति प्रयत्नतः परीक्ष्य सचेतनमितरद्वा उपकरणादि मलप्रक्षालनादिष्वपि प्रवचनोक्तेन विधिनाऽनुष्ठेयम्। भावशौचं तु निर्लोभता। लोभकषायानुरञ्जितो दुःप्रक्षाल इति, तत्प्रक्षालनं च परमार्थतो भावशौचमिति ॥ १७१ ॥

अर्थ—द्रव्य उपकरण खान-पान और शरीरको लेकर जो शौच किया जाता है, उसे प्रयत्नसे इस प्रकार करना चाहिए कि उससे भाव-शौचमें बाधा न हो।

भावार्थ—शौच दो तरहका होता है—एक द्रव्यशौच और दूसरा भावशौच। द्रव्यशौच बाह्य द्रव्यको लेकर किया जाता है। जितना भी चेतन अथवा अचेतन बाह्य द्रव्य है, उसे सदोष जान त्याग देना चाहिए। ज्ञानादिकमें जो सहायक हो, उसे उपकरण कहते हैं। जो उपकरण उद्गम आदि दोषोंसे शुद्ध होता है, वह पवित्र होता है। जो वैसा नहीं होता है, वह अपवित्र है। खान-पान भी जो उद्गम आदि दोषोंसे रहित होता है वह पवित्र होता है और जो वैसा नहीं होता वह अपवित्र है। मल-मूत्रका त्याग करनेके बाद लेप और गन्धसे रहित देह पवित्र है। ये सब द्रव्य शौच हैं। इन सब द्रव्य शौचोंको इस प्रकार करना चाहिए कि भावशौचमें कोई बाधा न आवे। अर्थात् उपकरणको खूब देख-भाल करके ही लेना चाहिए और मल-शुद्धिमें भी शास्त्रमें उपदिष्ट विधिके अनुसार ही प्रवृत्ति करनी चाहिए। निर्लोभताको भावशौच कहते हैं। जिसका आत्मा लोभ कषायसे रंगा हुआ है, उसकी शुद्धि होना कठिन है। और लोभका त्याग ही यथार्थमें भावशौच है।

संयममधिकृत्याह—

संयमधर्मको बतलाते हैं:—

पञ्चास्रवाद्विरमणं पञ्चेन्द्रियनिग्रहश्च कषायजयः।
दण्डत्रयविरतिश्चेति संयमः सप्तदशभेदः ॥ १७२ ॥

टीका—सम्यगुपरमः पापस्थानेभ्यः संयमः सप्तदश प्रकारः—पञ्चास्रवाः प्राणातिपातमृषाभाषणादत्तादानमैथुनपरिग्रहाः कर्मादानहेतवस्तेभ्यो विरमणं विरतिकरणं संयमः। पञ्चेन्द्रियाणि स्पर्शनादीनि तेषां निग्रहो नियमनं निरोधः। शब्दादिषु गोचरप्राप्तेष्वरक्तद्विष्टता माध्यस्थ्यम्। कषः संसारः, कष्यते यत्र जीवः स्वकृतैः कर्मभिः कदर्थ्यते पीड्यते तस्यायाः प्राप्तिहेतवः क्रोधादयश्चत्वारस्तेषां जयोऽभिभवउदयनिरोधः, उदितानां वा विफलतापादनम्। दण्डा मनोवाक्कायाख्याः। अभिद्रोहाभिमानेर्ष्यादिलक्षणो मनोदण्डः। हिंस्रपरुषानृतादिलक्षणो वाग्दण्डः। धावनवल्गनप्लवनादि-—रूपः कायदण्डः। एभ्यो विरतिर्निवृत्तिः। एवमेष संयमः सप्तदशभेदो भवति। आर्षे त्वन्येन क्रमेणायमेवार्थो निबद्धः। पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुःपञ्चेन्द्रियेषु संयमः। तथा पुस्तकादिपरिग्रहः अजीवकायसंयमः। प्रेक्षाप्रेक्षाप्रमार्जनापरिष्ठापनसंयमः मनोवाक्काय संयम इति ॥ १७२ ॥

अर्थ—आस्रवके कारण पाँच पापोंसे विरक्त होना, पाँचों इन्द्रियोंका दमन करना, चार कषायोंको जीतना और मन, वचन, और कायकी प्रवृत्तिको रोकना—इस प्रकार संयमके सत्रह भेद है।

भावार्थ—हिंसा, झूठ, चोरी, कुशील और परिग्रह—ये पाँच पाप कर्मोंके आस्रवके कारण हैं। इनका त्याग करना चाहिए। स्पर्शन वगैरह पाँच इन्द्रियोंको वशमें करना चाहिए। जो शब्द आदि कानमें पड़ें उन्हें सुनकर राग-द्वेष नहीं करना चाहिए। जहाँपर जीव अपने द्वारा किये हुए कर्मोंसे सताया जाता है, उसे कष अर्थात् संसार कहते हैं। उस संसारकी प्राप्तिके कारण क्रोध वगैरह कषाय कहे जाते हैं। उन्हें जीतना चाहिए, अर्थात् उनके उदयको रोकना चाहिए। और जो उदयमें आ रहे हैं, उन्हें बेकार कर देना चाहिए।

दण्डके तीन भेद हैं—मनोदण्ड, वचनदण्ड और कायदण्ड। अभिद्रोह अभिमान और ईर्षा वगैरहको मनोदण्ड कहते हैं। हिंसक, कठोर और असत्य वचनको वचनदण्ड कहते हैं। दौड़ना कूदना फाँदना वगैरहको कायदण्ड कहते हैं। इनको नहीं करना चाहिए। ये सब संयमके भेद हैं। आगममें इन्हें दूसरी तरहसे गिनाया है। पृथ्वी, जल, अग्नि, वायु, वनस्पति और दोइन्द्रिय; तेइन्द्रिय, चौइन्द्रिय और पंचेन्द्रियकी रक्षा करना संयम है। पुस्तक वगैरह न रखना अजीवकाय संयम है।

त्यागमधिकृत्याह—

त्यागधर्मको कहते हैं:—

बान्धवधनेन्द्रियसुखत्यागात्त्यक्तभयविग्रहः साधुः।
त्यक्तात्मा निर्ग्रन्थस्त्यक्ताहंकारममकारः॥ १७३॥

टीका—बान्धवाः स्वजनकाः, धनं हिरण्यसुवर्णादि, इन्द्रियाणि स्पर्शनादीनि, तद्विषयं सुखम्। एषां त्यागादिन्द्रियसम्बन्धी सुखत्यागः। प्राप्तेषु विषयेषु स्पर्शादिषु माध्यस्थ्यम्। त्यक्तभयविग्रहः साधुः, भयमिहपरलोकादानादि सप्तविधम्, विग्रहः शरीरं तस्य त्यागो निष्प्रतिकर्मशरीरता, कलहः द्वन्द्वादिर्वा विग्रहः। त्यक्तात्मा असंयमपरिणामलक्षण आत्मा। अष्टविधग्रन्थविजयप्रवृत्तो निर्ग्रन्थः। त्यक्ताहंकारममकार इति अस्त—द्विष्ट इत्यर्थः॥ १७३॥

अर्थ—कुटुम्ब, धन और इन्द्रिय सम्बन्धी सुखको त्याग देनेसे जिसने भय और कलहको त्याग दिया है, [illegible] अहंकार और ममकारको त्याग दिया है, उस त्यागमूर्ति साधुको निर्ग्रन्थ कहते हैं।

भावार्थ—कुटुम्ब, धन, इन्द्रियसुख, भय, कलह, [illegible] आदि परिग्रहके त्यागनेको त्याग कहते हैं।

सत्यमधिकृत्याह—

सत्यको कहते हैं

अविसंवादनयोगः कायमनोवागजिह्मता चेव ।
सत्यं चतुर्विधं तच्च जिनवरमतेऽस्ति नान्यत्र ॥ १७४ ॥

टीका—विसंवादनमन्यथास्थितस्यान्यथा भापणम्, गामश्वम् अश्वं वा गामिति भापते। पिशुनो वाऽन्यथा चान्यथा च व्युद्ग्राह्य प्रीतिच्छेदनं करोति विसंवादयति। विसंवादनेन योगः सम्बन्धः, न विसंवादनयोगोऽविसंवादनयोगः। सत्यं यथा दृश्यमानवस्तु-भापणम्। कायेनाजिह्मता जिह्मः कुटिलो मलीमसः, कायेनान्यवेषधारितया प्रतारयति, न जिह्मोऽजिह्म द्वितीयः सत्यभेदः। मनसा वाऽजिह्मता सत्यम्, मनसा प्रागालोच्य भापते वा, प्रायो न तादृगालोचयति जिह्मेन येन परः प्रतार्यते, एप तृतीयो भेदः। वागजिह्मता च सत्यम् जिह्मा वाक् सद्भूतनिह्नवा, असद्भूतोद्भावनं कटुकपरुपसावद्यादि चेति चतुर्थो भेदः। एतच्च जैनेन्द्र एव मते, नान्यत्र सत्यमिति ॥ १४ ॥

अर्थ—जैसा देखना वैसा कहना, काय, मन और वचनकी अकुटिलता, ये सत्यके चार भेद हैं। यह सब धर्म जिनेन्द्रदेवके मतमें ही कहा गया है। अन्य मतोंमें नहीं कहा गया।

भावार्थ—अन्य वस्तुको अन्यरूपमें कहना, जैसे गायको घोड़ा कहना और घोड़ेको गाय कहना विसंवादन है। अथवा चुगलखोर आदमी झूटी बातें बनाकर किसीकी प्रीतिको नष्ट करता है, उसे भी विसंवादन कहते हैं। इस प्रकारके विसंवादनको न करना और जैसी बात हो वैसी कहना, यह सत्यका पहला भेद है। जिह्म कुटिलको कहते हैं, कुटिल आदमी झूटा वेप बनाकर शरीरसे दूसरोंको ठगता है। ऐसा न करना सत्यका दूसरा भेद है। मनमें कुटिलताका न होना भी सत्य है। सच्चा आदमी पहले मनमें विचार करता है। वह ऐसी बातें नहीं सोचता, जिससे दूसरोंको ठगा जासके। यह सत्यका तीसरा भेद है। वचनमें कुटिलताका न होना भी सत्य है। सच्ची बातको छिपाना, झूटी बातको प्रकट करना, तथा कडुवा, कठोर और सावद्य वचन बोलना असत्य है। ऐसा न करना सत्य है। यह सत्यका चौथा भेद है। सत्यके ये चार भेद जिनशासनमें ही कहे गये हैं, क्योंकि अन्य मतोंमें कठोर आदि वचनोंको असत्य नहीं कहा गया है।

तपः सम्प्रत्युच्यते—

तपको कहते हैं:—

अनशनमूनोदरता वृत्तेः संक्षेपणं रसत्यागः ।
कायक्लेशः संलीनतेति बाह्यं तपः प्रोक्तम् ॥ १७५ ॥

टीका—तत्रानशनं चतुर्थभक्तादि पण्मासान्तम्, तथाऽपरं भक्तप्रत्याख्यानम्, इङ्गिनीमरणम्, पादोपगमनमिति। ऊनोदरता द्वात्रिंशतः कवलेभ्यो यथाशक्ति नूनयत्याहारं यावदष्टकवलाहार इति। वृत्तिर्वर्तनं भिक्षा तस्याः संक्षेपणं परिमितग्रहणं दत्तिभिर्भिक्षाभिश्च। रसत्यागः, रसा क्षीरदधिनवनीतघृतगुडादिप्रभृतयो विकृतयस्तासां त्यागः। कायक्लेश

कायोत्सर्गोत्कटुकासनातापनादिः । संलीन आगमोपदेशेन, तद्भावः संलीनता इन्द्रियनोइन्द्रियभेदात् द्विधा । इन्द्रियैः संलीनः संहृतेन्द्रियव्यापारः कूर्मवत्, यथाऽङ्गानि स्वात्मन्याहारयति कूर्मः तद्वदिन्द्रियाणि आत्मन्याहृत्य तिष्ठति साधू रागद्वेषहेतुभ्यः शब्दादिभ्यो निवर्त्य व्यवस्थापितेन्द्रियः इन्द्रियसंलीनः । नोइन्द्रियं मनः क्रोधादयश्च । आर्त्तरौद्रध्यानरहिते मनसि नोइन्द्रियसंलीनः । क्रोधादीनामुदयनिरोधः उदयप्राप्तानां च वैफल्यापादनं नोइन्द्रियसंलीनता । षोढा विभक्तं बाह्यं तपः परोक्षलक्ष्यत्वाद्बाह्यमुच्यते ॥ १७५ ॥

अर्थ—अनशन, ऊनोदरता, वृत्तिसंक्षेप, रसत्याग, कायक्लेश और संलीनता–ये बाह्यतप कहे गये हैं।

भावार्थ—एक उपवास लेकर छह उपवासतक खान-पानका त्यागना अनशन है। तथा भक्तप्रत्याख्यान, इंगिनीमरण और पादपोपगमनमें जो जीवनपर्यन्त खान-पानका त्याग किया जाता है, वह भी अनशनतप है। बत्तीस कौरसे यथाशक्ति कम आहार करना ऊनोदर है। भिक्षाको परिमित करनेके लिए घर वगैरहका परिमाण करना कि आज मैं इतने घरोंसे भिक्षा ग्रहण करूँगा, वृत्तिसंक्षेप है। दूध, दही, घी, गुड़ वगैरह रसोंके त्यागको रसत्याग कहते हैं। कायोत्सर्ग, उत्कटुकासन, आतापन वगैरहके द्वारा शरीरको क्लेश देनेको कायक्लेश कहते हैं। संलीनताके दो भेद हैं—इन्द्रियसंलीनता और नोइन्द्रियसंलीनता, जिस प्रकार कछुआ अपने अङ्गोंको संकोच लेता है, उसी प्रकार साधु राग-द्वेषके कारण शब्द वगैरहसे अपनी इन्द्रियोंको संकोच लेता है। इसे इन्द्रियसंलीनता कहते हैं। आर्तध्यान, रौद्रध्यानका न होना, क्रोध वगैरहको उत्पन्न न होने देना और यदि उत्पन्न हो जावे तो उसे विफल कर देना नोइन्द्रियसंलीनता है। बाह्यतपके ये छह भेद हैं। ये छहों तप दूसरोंके द्वारा देखे जाते हैं, इसलिए उन्हें बाह्यतप कहते हैं।

आभ्यन्तरतपोनिरूपणायाह—

आभ्यन्तरतपका निरूपण करते हैं:—

प्रायश्चित्तध्याने वैयावृत्यविनयावथोत्सर्गः ।
स्वाध्याय इति तपः षट्प्रकारमभ्यन्तरं भवति ॥ १७६ ॥

टीका—प्रायो बाहुल्येन चित्तविशोधनं प्रायश्चित्तमालोचनादि कृतातीचारमलप्रक्षालनार्थम्। एकाग्रचित्तनिरोधो ध्यानमामुहूर्तात्। तत्रार्त्तरौद्रे व्युदसनीये। आर्त्तं चतुर्विधम् अमनोज्ञविषयसंप्रयोगे तद्विप्रयोगार्थं चित्तनिरोधः । शिरोरोगादिवेदनायाश्च विप्रयोगार्थो मनोनिरोधः । मनोज्ञविषयसम्प्रयोगे तदविप्रयोगार्थो मनोनिरोधः। चन्दनोशीरादिजनितसुखवेदनायाश्चाविप्रयोगार्थश्चित्तनिरोधः आर्त्तध्यानम् । रौद्रं हिंसानुबन्धि, मृषानुबन्धि, स्तेयानुबन्धि, विषयसंरक्षं चेति । एतयोस्त्यागस्तपः। धर्म्यं शुक्लं च ध्यानमनुष्ठेयम्। धर्मादनपेतं धर्म्यं चतुर्विधम्–आज्ञाविजयमपायविजयं विपाकविजयं संस्थानविजयं चेति ।

शुक् शोको दुःखं शारीरं मानसं चेति तल्लुनाति विच्छेदयतीति शुक्लम् । पृषोदरादिपाठाच संस्कारः । तच्चतुर्विधम्-पृथक्त्ववितर्कं सविचारम्, एकत्ववितर्कमविचारम्, सूक्ष्मक्रियमप्रतिपाति, व्युपरतक्रियमनुवर्त्तनम् । व्यापृतभावो वैयावृत्यम्, आचार्योपाध्यायादीनां भक्तपानवस्त्रपात्रादिना दशानामुपग्रहः, शरीरशुश्रूषा चेति । विनीयते येनाष्टविधं कर्म स विनयः ज्ञानदर्शनचारित्रोपचारभेदः । तत्रोपचारविनयो विनयार्हेषु अभ्युत्थानमासनदानाञ्जलिप्रग्रहदण्डकग्रहणचरणप्रक्षालनमर्दनादि । व्युत्सर्गोऽतिरिक्तोपकरणसंसक्तभक्तपानादेरुज्झनम् । अभ्यन्तरस्य च मिथ्यादर्शनकषायादेरपाकरणम् । स्वाध्यायः पञ्चधा-वाचना, पृच्छना, अनुप्रेक्षा, आम्नाय, धर्मोपदेशश्च । तत्र वाचना आलापकदानम्, संजातसन्देहपृच्छनं पृच्छना, अनुप्रेक्षा मनसा परिवर्तनमागमस्य, आम्नाय आत्मानुयोगकथनम्, धर्मोपदेश आक्षेपणी विक्षेपणी संवेदनी निर्वेदनी चेति कथा धर्मोपदेशः । एवमभ्यन्तरमपि षोढा तपः ॥ १७६ ॥

अर्थ—प्रायश्चित्त, ध्यान, वैयावृत्य, विनय, उत्सर्ग और स्वाध्याय इस प्रकार आभ्यन्तर तप छह प्रकारका होता है ।

भावार्थ—किये हुए दोषोंको दूर करनेके लिए जो आलोचना आदि की जाती है उसे प्रायश्चित्त कहते हैं । अन्तर्मुहूर्तके लिए एक विषयमें मनके लगानेको ध्यान कहते हैं । उसके चार भेद हैं—आर्त, रौद्र, धर्म और शुक्ल । आर्तध्यानके भी चार भेद हैं—(१) अप्रिय वस्तुका सम्बन्ध होनेपर उसके वियोगके लिए चिन्ता करना, (२) सिरदर्द वगैरहकी पीड़ाको दूर करनेके लिए चिन्ता करना, (३) प्रिय वस्तुका वियोग होनेपर उसके संयोगके लिए चिन्ता करना और (४) चन्दन खस वगैरहके लगानेसे उत्पन्न हुए सुखका वियोग न होनेके लिए चिन्ता करना ।

रौद्रध्यानके भी चार भेद हैं—(१) हिंसामें आनन्द अनुभव करना, (२) झूठ बोलनेमें आनन्द अनुभव करना, (३) चोरी करनेमें आनन्द अनुभव करना और (४) परिग्रह संचयमें आनन्द अनुभव करना । ये दोनों ही ध्यान छोड़नेके योग्य हैं और धर्म्य तथा शुक्लध्यान करनेके योग्य हैं ।

धर्मयुक्त ध्यानको धर्मध्यान कहते हैं । उसके भी चार भेद हैं—आज्ञाविचय, अपायविचय, विपाकविचय और संस्थानविचय ।

जो ध्यान शारीरिक और मानसिक दुःखका छेदन करता है, उसे शुक्लध्यान कहते हैं, इसके भी चार भेद हैं :—(१) पृथक्त्ववितर्कसविचार (२) एकत्ववितर्कअविचार, (३) सूक्ष्मक्रिया-प्रतिपाति, और (४) व्युपरतक्रियानिवृत्ति ।

आचार्य, उपाध्याय, तपस्वी, शैक्ष, गण, कुल, संघ, रोगी, साधु और मनोज्ञ इन दस प्रकारके साधुओंकी सेवा-शुश्रूषा करनेको वैयावृत्य कहते हैं । ज्ञान, दर्शन, चारित्र और उपचारके भेदसे विनयके

१—तत्त्वार्थसूत्र आदिमें इसके स्थानमें निदान नामका भेद किया है । निदानका अर्थ ऐसा है—आगामी सुख प्राप्तिके लिए चिन्ता करना ।

चार भेद हैं। विनय करनेके योग्य आदरणीय पुरुषोंको देखकर उठना, उन्हें बैठनेके लिए आसन देना, उनके आगे हाथ जोड़ना, उनके उपकरण लेना, पैर धोना, अङ्ग दबाना वगैरह उपचारविनय है। शेष तीनों स्पष्ट हैं। अधिक उपकरण, भक्त-पान वगैरहके त्यागनेको बाह्यव्युत्सर्ग कहते हैं। और मिथ्या-दर्शन आदिके त्यागनेको अभ्यन्तरव्युत्सर्ग कहते हैं।

स्वाध्यायके पाँच भेद हैं—वाचना, पृच्छना, अनुप्रेक्षा, आम्नाय और धर्मोपदेश। शब्द तथा अर्थके पाठको वाचना कहते हैं। सन्देह दूर करनेके लिए पूछनेको पृच्छना कहते हैं। आगमके अर्थका मनमें चिन्तन करनेको अनुप्रेक्षा कहते हैं। पाठके शुद्धतापूर्वक उच्चारण करनेको आम्नाय कहते हैं। आक्षेपणी, विक्षेपणी, संवेदनी, और निर्वेदनीकथाके करनेको धर्मोपदेश कहते हैं। इस प्रकार आभ्यन्तर-तपके भी छह भेद होते हैं।

सम्प्रति ब्रह्मचर्यप्रतिपादनायाह—

अब ब्रह्मचर्यको कहते हैं:—

दिव्यात्कामरतिसुखात्त्रिविधं त्रिविधेन विरतिरिति नवकम्।
औदारिकादपि तथा तद्ब्रह्माष्टादशविकल्पम् ॥ १७७ ॥

टीका—दिव्यं भवनपतिव्यन्तरज्योतिष्कविमानवासिदेव्यः, ताभ्यो विरतिस्त्रिविधं त्रिविधेनेति। मनसा न करोति न कारयति, नानुमन्यते। एवं वाचा कायेन चेति ते नवभेदाः। औदारिकं मानुष्यतिर्यक्स्त्रीषु। तत्र मनोवाक्कायैः कृतकारितानुमतिभिश्च विरतिरिति नवकम्। तदेतद्ब्रह्माष्टादशभेदं भवति ॥ १७७ ॥

अर्थ—देवता सम्बन्धी तथा औदारिकशरीर सम्बन्धी कामभोगसे नौ नौ प्रकारसे विरत होनेसे ब्रह्मचर्यके अठारह भेद होते हैं।

भावार्थ—भवनवासी, व्यन्तर, ज्योतिष्क और वैमानिक देवियोंके भोग-सुखसे मन, वचन, काय और कृत, कारित, अनुमोदनापूर्वक विरत होनेसे नौ भेद होते हैं। इस प्रकार ब्रह्मचर्यके अठारह भेद हैं।

आकिञ्चन्यमधिकृत्याह—

आकिञ्चन्यधर्मको कहते हैं:—

अध्यात्मविदो मूर्च्छां परिग्रहं वर्णयन्ति निश्चयतः।
तस्माद्वैराग्येप्सोराकिञ्चन्यं परो धर्मः ॥ १७८ ॥

टीका—अध्यात्मविदः [illegible] "बध्यते कथं वा मुच्यते इति" [illegible] परिग्रहं मूर्च्छालक्षणं वर्णयन्ति। मूर्च्छा गार्ध्यम्। निश्चयनयाभिप्रायेण [illegible] परिग्रहशब्दवाच्यः। तस्माद्वैराग्यलक्षणः परिग्रहस्तस्माद्वैराग्येप्सोः [illegible] आकिञ्चन्यं परो धर्मः [illegible] ॥ १७८ ॥

अर्थ—अध्यात्मज्ञानी निश्चयसे ममत्वको परिग्रह कहते हैं। अतः जो वैराग्यका इच्छुक है, उसका आकिञ्चन्य परमधर्म है।

भावार्थ—जो यह जानते हैं कि 'आत्मा कैसे बँधता है और कैसे छूटता है।' उन आत्मज्ञानियोंको अध्यात्मज्ञानी कहते हैं। अध्यात्मज्ञानी निश्चयनयसे आत्माके मोहपरिणामको ही परिग्रह कहते हैं। क्योंकि उसके होनेसे ही मनुष्य बाह्य परीग्रहके संचयमें प्रवृत्त होता है। अतः जो वैराग्यके अभिलाषी हैं; उन्हें शरीरादिकसे भी ममत्व नहीं करना चाहिए। यही आकिञ्चन्यधर्म है।

धर्मानुष्ठाने फलं दर्शयति—

धर्मका फल बतलाते हैं:—

दशविधधर्मानुष्ठायिनः सदा रागद्वेषमोहानाम्।
दृढरूढघनानामपि भवत्युपशमोऽल्पकालेन ॥ १७९ ॥

टीका—दशप्रकारः क्षमादिर्धर्मः, तदनुष्ठायिनस्तदासेविनः। सदैवानवरतम्। रागद्वेष। मोहानामुपशमो भवति। एते च संसारभ्रमणस्य मूलं दृढं रूढं घनाश्च सुष्ठु दृढं रूढा जाता घना बहुलाः प्रभूतकर्मांशाः। अथवा यथासंख्यं दृढो रागः, रूढो द्वेषः, घनो मोहः। एवं विधानामपि स्वल्पेनैव कालेन भवत्युपशमः क्षयो वा ॥ १७९ ॥

अर्थ—जो दस प्रकारके धर्मका सदा पालन करते हैं। उनके चिरकालसे संचित दुर्भेद्य राग, द्वेष और मोहका थोड़े ही समयमें उपशम हो जाता है।

भावार्थ—संसारके मूलकारण राग, द्वेष और मोह हैं। चिरकालसे संचित होते-होते वे आत्मामें स्थिरसे हो जाते हैं, और उनका भेदन करना बड़ा कठिन होता है। किन्तु जो उक्त दस धर्मोंका सदा सेवन करते हैं, उनके दुर्भेद्य रागद्वेष और मोह क्षणभरमें ही शान्त हो जाते हैं।

तथा—

ममकाराहंकारत्यागादतिदुर्जयोद्धतप्रबलान्।
हन्ति परीषहगौरवकषायदण्डेन्द्रियव्यूहान् ॥ १८० ॥

टीका—ममकारो माया, लोभश्च। अहंकारो मानः क्रोधश्च। तयोर्ममकाराहंकारयोस्त्यागः। किं भवतीत्याह—अतिदुर्जयोद्धतप्रबलान् 'अतीव 'दुर्जयानुद्धतांश्च सावष्टम्भान् प्रकृष्टबलांश्च। हन्ति विनाशयति। परीषहगौरवकषायदण्डेन्द्रियव्यूहान् परीषहाः क्षुत्पिपासादयः, गौरवं गृद्धयादिः, कषायाः क्रोधादयः, दण्डा मनोवाक्कायाख्या[1], इन्द्रियाणि, एषां व्यूहाः समूहाः चक्रव्यूहगरुडव्यूहादिवद् व्यूहा ग्राह्याः। तान् हन्ति विध्वंसयते भिभवतीन्यर्थः ॥ १८० ॥

१—मि—सर्वनाशीनि, फ० पु०।

अर्थ—अहंकार और ममकारके त्यागसे अत्यन्त दुर्जय, उद्धत और बलशाली परीषह, गौरव, कषाय, योग और इन्द्रियोंके समूहको नष्ट कर डालता है।

भावार्थ—माया और लोभको ममकार कहते हैं और मान और क्रोधको अहंकार कहते हैं। जो दस धर्मोंका पालन करता है, उसके ममकार और अहंकार छूट जाते हैं। और उनके छूटनेसे वह आत्माके प्रबल शत्रु परीषह वगैरहके व्यूहको भेदनेमें समर्थ होता है।

यथा वैराग्यमार्गे स्थैर्यं भवति तथा च यतत इत्याह—

जिस रीतिसे वैराग्यमार्गमें स्थिरता होती है, वैसा यत्न करता है, यह कहते हैं :—

प्रवचनभक्तिः श्रुतसम्पदुद्यमो व्यतिकरश्च संविग्नैः ।
वैराग्यमार्गसद्भावभावधीस्थैर्यजनकानि ॥ १८१ ॥

टीका—प्रोच्यन्ते येन जीवादयस्तत्प्रवचनम्, तत्र भक्तिः सेवा तदनुध्यानपरता, संघ-[illegible]ट्टारको वा प्रवचनं प्रवर्त्तीति । श्रुतसम्पदि उद्यम उत्साहः, श्रुतमागमस्तस्य सम्पद् उपचयः [illegible]पूर्वमपूर्वमधीते प्रवचनम् । व्यतिकरश्च संविग्नैः, संविग्नाः संसारभीरवस्तैः सह सम्पर्को यथोक्त-[illegible]यानुष्ठायिभिर्व्यतिकरः संसर्गः । एभिर्वैराग्यमार्गस्थैर्यं भवति । न केवलं वैराग्यमार्गस्थैर्यम्, [illegible]वभावयोर्बुद्धिस्तस्याश्च भवति स्थैर्यम् । सद्भावा जीवादयः । एते च यथा भगवद्भिरुक्तास्त-[illegible]स्थिरीभवति बुद्धिः । भावः क्षयोपशमजं दर्शनादि भगवत्सु, वा तीर्थकृत्सु साधुषु "एते [illegible]ीयाः पूजनीयाः" इति एवंविधाया धियः स्थैर्यं जनयन्त्येतानीत्यर्थः ॥ १८१ ॥

अर्थ—प्रवचनमें भक्ति, शास्त्र-सम्पत्तिमें उत्साह और संसारसे भीतजनोंका सम्पर्क वैराग्य-[illegible]जीवादिक पदार्थोंमें और क्षयोपशमादिक भावोंमें बुद्धिको स्थिर करते हैं।

भावार्थ—शास्त्रको प्रवचन कहते हैं। क्योंकि उसके द्वारा जीवादि पदार्थोंका कथन किया [illegible] अथवा परम भट्टारक अर्हन्तदेवको प्रवचन कहते हैं—क्योंकि वे प्रवचनका उपदेश करते हैं, [illegible]के रखनेसे नये-नये शास्त्रोंका अध्ययन करके अपने शास्त्रज्ञानको खूब बढ़ानेसे और [illegible]रक्त साधुजनोंके सम्पर्कमें रहनेसे मन वैराग्य-मार्गमें दृढ़ होता है। जीवादिक तत्त्वोंमें आस्तिक्य-[illegible] है और क्षयोपशमादिजन्य सम्यग्दर्शनादि भावोंकी प्राप्ति होती है। अर्थात् भक्तिपूर्वक [illegible] और [illegible] संगति करनेसे वैराग्यमार्गमें मन स्थिर हो जाता है। तीर्थंकरोंके [illegible] यह भाव दृढ़ हो [illegible] ही है, [illegible] रहे हैं तथा [illegible] और अधिक दृढ़ [illegible]

[illegible]चैव धर्मध्यानमिच्छता चतुर्विधा धर्मकथाऽभ्यसनीयेत्याह—

[illegible] बुद्धिको स्थिर रखनेके [illegible] धर्मकथाके अभ्यास करनेका निर्देश

आक्षेपणी विक्षेपणी विमार्गबाधनसमर्थविन्यासा ।
श्रोतृजनश्रोत्रमनःप्रसादजननी यथा जननी ॥ १८२ ॥

चतुर्विधा धर्मकथाप्रस्तुतेति तच्छेपमाह :—

चार प्रकारकी कथाके शेषांशको बतलाते हैं :—

संवेदनीं च निर्वेदनीं च धर्म्यां कथां सदा कुर्यात् ।
स्त्रीभक्तचौरजनपदकथाश्च दूरात्परित्याज्याः ॥ १८३ ॥

टीका—आक्षिपत्यावर्जयत्यभिमुखीकरोति या सा आक्षेपणी कथा शृङ्गारादिप्राया। विक्षिपति भोगाभिलाषाद्या कामभोगेषु वैमुख्यमापादयति सा विक्षेपणी। विमार्गं सम्यग्दर्शनादित्रयविपरीतःसुगतादिप्रदर्शितस्तस्य बाधनं दोषवत्वख्यापनम्। विमार्गबाधने समर्थः शक्तो विन्यासो रचना यस्याः सा विमार्गबाधनसमर्थविन्यासा। शृणोतीति श्रोता जनो लोकः श्रोतृजनस्तस्य श्रोत्रं मनश्च तयोः प्रसादो हर्षो जन्यते यया सा श्रोतृजनश्रोत्रमनःप्रसादजननी। यथा जननी माता हितकारिणी सदुपदेशदायिनी स्वापत्यानां श्रोत्रमनसी प्रसादयति परितोषयति, तथैषापीति सम्बन्धः॥ १८२ ॥

टीका—सम्यग्वेद्यते भयं ग्राह्यते श्रोता यया सा संवेदिनी कथा। नरकगतावुष्णा वेदनाः शीताश्च, न चास्त्यक्षिनिमेषमात्रमपि तस्या वेदनाया विच्छेदः। तत्र तादृशीं वेदनामनुभवतां जघन्येन दशवर्षसहस्राण्युत्कर्षेण त्रयस्त्रिंशत्सागरोपमाणीति। तिर्यग्योनावपि शीतोष्णक्षुत्पातिगुरुभारसंतापजं दुःखं वाहनताडनदमनच्छेदनादि चेति। मानुषेष्वपि काणखञ्जवामनजडबाधिरान्धकुब्जविकृताकृतित्वानि ज्वरकुष्ठशोषकासातिसारहृद्रोगवेदनाश्च। तथा प्रियविप्रयोगाप्रियसम्प्रयोगेप्सितालाभदारिद्र्यदौर्मनस्यवधबन्धनाभियोगादिदुःखानुभवः। देवेषु चोत्कर्षविशेषदर्शनादात्मनश्चतद्धानेर्दुःखानुभवः। तथा बलवता देवेनाभियोगादन्येऽल्पपुण्याः करिवृषभाश्वमयूरादिरूपाणि कारिताः सन्तो वाह्यन्ते प्रतिसेव्यन्ते च। तथा च्यवनकाले आयुषिषण्मासावशेषे उपपत्तिस्थानानि बीभत्सानि विकृताकृतीन्यवधिनालोक्य महदशर्म भजन्ते। अतश्चतुर्विधादपि संसारादुद्विजते मोक्षायैव च घटत इति। निर्वेदं नीयते यया कामभोगेषु सा निर्वेदनी। इत्वराः कामभोगा न तृप्तिमाधातुमात्मनः प्रत्यलाः। सदा क्लिन्नश्च शरीरणो दुर्गन्धिरशुचिरत्यन्तजुगुप्सितमत्र चारतिरित्येवं पामन इव कण्डूपरिगतकण्डूयं मोहोदयात्सुखमिति मन्यते, अतो निर्विण्णः परित्यज्य कामभोगान् निःसङ्गः सिद्धिवध्वाराधने प्रवर्तत इति। एवमेतां संवेदनीं निर्वेदनीं च धर्म्यां कथां सदा कुर्यात्, धर्मादनपेतामित्यर्थः। स्त्र्यादिकथाश्च दूरात् परित्याज्याः। तत्र स्त्रीकथा, रूपयौवनलावण्यवेषभाषाचङ्क्रमणानि योषितां वर्णयति यया सा स्त्रीकथा, भक्तमाहारस्तत्कथा, ओदनःसूपखण्डखाद्यादिपरिनिष्ठितान्ता भक्तकथा। चौरा मलिम्लुचा अमुना प्रकारेण क्षात्राणि खनन्ति, इष्टकाश्च गालयन्ति, तालकान्युद्घाटयन्तीति चौर-

कथा। जनपदकथा "सेतुजानि ऋतुजानि वा सस्यान्यस्मिन् जनपदे जायन्ते, अस्मिन्नति-प्रभृतो गवां रसः, शालिमुद्गगोधूमादि चोत्पद्यतेऽत्र नान्यत्रेति" जनपदकथा। एवमेता मनसापि नालोच्याः किमुत वाचेति दूरात् परिहार्याः॥ १८३॥

अर्थ—उन्मार्गका उच्छेद करनेमें समर्थ रचनावाली, और श्रोताजनोंके कानों और मनको माताकी तरह आनन्द देनेवाली आक्षेपणी, विक्षेपणी, संवेदनी और निर्वेदनी धर्मकथा सदैव करनी चाहिए। तथा स्त्रीकथा, भक्तकथा, चौरकथा और देशकथाको दूरसे ही छोड़ देना चाहिए।

टीका—धर्मद्रव्यं गतिमतां द्रव्याणां स्वयमेव गतिपरिणतानामुपग्रहे वर्तते जीवपुद्गलानाम्, न पुनरगच्छज्जीवद्रव्यं पुद्गलद्रव्यं वा बलान्नयति धर्मः। किंतु स्वयमेव गतिपरिणतमुपगृह्यते धर्मद्रव्येण। मत्स्यस्य गच्छतो जलद्रव्यमिवोपग्राहकम्। यथा वा व्योमद्रव्यं स्वयमेव द्रव्यस्यावगाहमानस्य कारणं भवति, न पुनरनवगाहमानं बलादवगाढं कारयति। यथा च कृषीवलानां कृष्यारम्भं स्वयमेव कर्तुमुद्यतानामपेक्षाकारणं वर्षं भवति, न च तानकुर्वतः कृषीवलान् बलान् कृषिं कारयति वर्षा। यथा वा गर्जितध्वनिसमाकर्णनाद् बलाकानां गर्भाधानप्रसवौ भवतः, न च तामप्रसवतीं बलाद्गर्जितशब्दः प्रसादयति। यथा वा पुरुषः प्रतिबोधनिमित्तं पापाद्विरमति, न चाविरमन्तं पुमांसं बलात्प्रतिबोधो विरमयतीति। एवं गतिपरिणामभाजां पुद्गलजीवानामपेक्षाकारणं धर्मद्रव्यम्। तथा स्थितिमतां द्रव्याणां स्थितेरपेक्षाकारणमधर्मद्रव्यं स्वयमेव तिष्ठताम्, न चातिष्ठद्द्रव्यं बलादधर्मः स्थापयति। एवं स्थितिमतां द्रव्याणां स्थित्युपकारी भवत्यधर्मः। गगनं तु जीवपुद्गलानामवगाहमानानामवकाशदानेन व्याप्रियते ॥२१५॥

अर्थ—धर्मद्रव्य चलते हुए द्रव्योंके चलनेमें सहायता करता है। अधर्मद्रव्य ठहरे हुए द्रव्योंके ठहरनेमें सहायक है और आकाशद्रव्य सभी द्रव्योंको अवकाश देता है।

भावार्थ—धर्मद्रव्य स्वयं ही चलते हुए जीव और पुद्गलोंको चलनेमें सहायता करता है। किन्तु न चलते हुए जीवद्रव्य और पुद्गलद्रव्यको जबर्दस्ती नहीं चलाता है। जिस प्रकार जल मछलीके चलनेमें सहायक है, जिस प्रकार आकाशद्रव्य स्वयं ही अवकाशके इच्छुक द्रव्यको अवकाश-दान करता है—बलपूर्वक किसीको अवकाश नहीं करता, जिस प्रकार स्वयं ही खेतीमें लगे हुए किसानोंको [illegible] सहायक होती है किन्तु खेती न करनेवाले किसानोंको बलपूर्वक खेतीमें नहीं [illegible] अथवा प्रसव होता है—किन्तु [illegible] नहीं कराती, अथवा जिस [illegible] किन्तु यदि पुरुष पापसे विरक्त न हो तो

[illegible]

[illegible]

धर्मोपदेश उसे बलपूर्वक त्याग नहीं कराता। उसी प्रकार चलते हुए जीव और पुद्गलोंको धर्मद्रव्य चलनेमें सहायता करता है। तथा स्वयं ही ठहरे हुए द्रव्योंको अधर्मद्रव्य ठहरनेमें सहायता करता है। किन्तु ठहरे हुए द्रव्यको बलपूर्वक नहीं ठहराता है। आकाशद्रव्य अवगाहके इच्छुक जीव और पुद्गलोंको अवकाश-दान करता है। सारांश यह है कि तीनों ही द्रव्य अपने अपने कार्योंके प्रति उदासीन कारण हैं; प्रेरक कारण नहीं हैं।

पुद्गलद्रव्यं[1] कमुपकारं विधत्त इत्याह—

पुद्गलद्रव्यका उपकार कहते हैं:—

स्पर्शरसगन्धवर्णाः शब्दो बन्धश्च सूक्ष्मता स्थौल्यम्।
संस्थानं भेदतमश्छायोद्योतातपश्चेति ॥ २१६ ॥
कर्मशरीरमनोवाग्विचेष्टितोच्छ्वासदुःखसुखदाः स्युः।
जीवितमरणोपग्रहकराश्च संसारिणः स्कन्धाः ॥ २१७ ॥

टीका—स्पर्शादयः पुद्गलद्रव्यस्योपकाराः। तथा शब्दपरिणामः पुद्गलानामेवोपकारः। बन्धनं बन्धः कर्मपुद्गलानामात्मप्रदेशानां च क्षीरोदकवत् एकलोलीभावः पुद्गलद्रव्यस्योपकारः। सूक्ष्मतापरिणामः पुद्गलानामुपकारोऽनन्तप्रदेशानां स्कन्धानाम्। तथा स्थौल्यपरिणामोऽप्रेन्द्रधनुरादीनाम्, संस्थानं चतुरस्रादि पुद्गलोपकारः। भेदःखण्डरूपं सोऽपि पुद्गलपरिणामः। तमोऽन्धकारः परिणामः पुद्गलद्रव्याणामेवोपकारः। छायापि पुद्गलपरिणामः। उद्योतश्चन्द्रतारकादीनां पुद्गलपरिणामः। आतपो दिनकरादीनां पुद्गलपरिणामः ॥ २१६ ॥

कर्म ज्ञानावरणादि पुद्गलोपकारः। शरीरमौदारिकादि पुद्गलपरिणामः। मनोवाक्कायाः पुद्गलपरिणामः। विचेष्टितं क्रिया पुद्गलपरिणामः। उच्छ्वासः प्राणापानौ पुद्गलपरिणामः। दुःखं सुखं चेति पुद्गलजनितमेव। जीवितोपग्रहकराः क्षीरघृतादिपुद्गलाः, मरणोपग्रहकरा विषशस्त्रादिपुद्गलाः सर्वेऽप्येते पुद्गलानामुपकाराः। संसारिजीवविषया स्कन्धरूपेणपरिणतानां न परमाणुरूपेणेति ॥ २१७ ॥

अर्थ—स्पर्श, रस, गन्ध, वर्ण, शब्द, बन्ध, सूक्ष्मता, स्थूलता, आकार, खण्ड, अन्धकार, छाया, चन्द्रमा आदिका प्रकाश, तथा घाम, संसारीजीवोंके ज्ञानावरणादि कर्म, शरीर, मन, वचन, क्रिया, श्वास उच्छ्वास, सुख और दुःख तथा जीवन और मरणमें सहायक स्कन्ध—यह सब पुद्गलका उपकार है।

१—' पुद्गलद्रव्यम् ' इत्यारभ्य ' छायोद्योतातपश्चेति ' इति सम्पूर्णकारिकापर्यन्तः पाठो ब० पुस्तके नास्ति।

भावार्थ—आठ प्रकारका स्पर्श, पाँच प्रकारका रस, दो प्रकारकी गन्ध और पाँच प्रकारका रूप—ये सब पुद्गलके गुण होनेसे पुद्गलका ही उपकार समझना चाहिए। शब्द भी पुद्गलकी ही पर्याय है। परमाणुका परमाणुके साथ अथवा कर्मपुद्गलोंका आत्माके प्रदेशोंके साथ जो दूध-पानीकी तरह बन्ध होता है, वह भी पुद्गलका ही उपकार है। अनन्तानन्तप्रदेशी स्कन्धोंका भी सूक्ष्म होना, और बादल, इन्द्रधनुष आदिका स्थूल होना भी पुद्गलका भी उपकार है। तिकोन वगैरह आकार, घड़े आदिके टुकड़े, अन्धकार, छाया चाँदनीका प्रकाश, सूर्यका प्रकाश—ये सब पुद्गलके ही कार्य हैं। तथा जिन स्कन्धोंसे संसारी जीवोंके कर्म, शरीर, मन, वचन, श्वास, उच्छ्वास वगैरह बनते हैं, जिनके सेवनसे उन्हें सुख और दुःखका अनुभव होता है और जो उनके जीवनमें सहायक हैं—जैसे दूध, घी आदि और जो उनकी मृत्युमें कारण हैं, जैसे-विष वगैरह—ये सब पुद्गलके ही कार्य जानना चाहिए।

कालकृतोपकारदर्शनायाह—

काल और जीव द्रव्यका उपकार बतलाते हैं:—

परिणामवर्तनाविधिः परापरत्वगुणलक्षणः कालः ।
सम्यक्त्वज्ञानचारित्रवीर्यशिक्षागुणा जीवाः ॥ २१८ ॥

टीका—परिणामस्तावद्वर्ततेऽङ्कुरो हीयते चाऽपक्षीयते विनश्यतीत्यादिकः काल-जनित उपकारः। वर्तनेति—वर्तत इदं कालापेक्षमेतदभिधानं प्रयुञ्जते विद्वांसः। वर्तनायाः विधिः प्रकारः उक्तेन न्यायेन। परत्वमपरत्वं च कालकृतम्। पञ्चाशद्वर्षात्पञ्चविंशतिवर्षोऽपरः, पञ्चविंशतिवर्षात्पञ्चाशद्वर्षः परः। एवं परिणामादिगुणलक्षणः कालः परिणामादिभिर्पर्यायैर्लक्ष्यत इत्यर्थः। अथ जीवाः केनोपकारेणोपकुर्वन्ति? सम्यक्त्वाद्युत्पादनेन। तत्र तत्त्वार्थश्रद्धानलक्षणं सम्यक्त्वमुक्तमुत्पादयन्ति। ज्ञानं श्रुतार्थाधिगमयन्ति। चारित्रं क्रियानुष्ठानमुपदिशन्ति। वीर्यं शक्तिविशेषं दर्शयन्ति। शिक्षां लिप्यक्षरादिकविज्ञानं जनयन्ति। एते जीवकृताः (कृता) उपकाराः ॥२१८॥

गुणों-कार्योंसे काल द्रव्यको जाना जाता है। तथा सम्यक्त्व वगैरह जीवके गुण हैं; क्योंकि जीव तत्त्वार्थश्रद्धानरूप सम्यक्त्वको उत्पन्न करते हैं, शास्त्रोंको पढ़ने, चारित्रका पालन तथा उपदेश करते हैं, शक्तिका प्रदर्शन करते हैं, लिपि, अक्षर वगैरहका ज्ञान करते हैं। ये सब जीवके गुण-उपकार जानने चाहिए।

एवं जीवाजीवावभिधाय प्रपञ्चेन पुण्यापुण्यपदार्थद्वयमभिधित्सुराह—

इस प्रकार जीव और अजीव पदार्थको कह कर विस्तारसे पुण्य और पाप पदार्थको कहते हैं:—

पुद्गलकर्म[1] शुभं यत्तत्पुण्यमिति जिनशासने दृष्टम् ।
यदशुभमथ तत्पापमिति भवति सर्वज्ञनिर्दिष्टम् ॥ २१९ ॥

टीका—द्विचत्वारिंशत्प्रकृतयः शुभाः पुण्याभिधानाः। द्व्यधिकाशीतिरप्रशस्तप्रकृतीनां पापाभिधाना एवमाहुः सर्वज्ञा इति आगमग्राह्यः पदार्थोऽयमिति प्रतिपादयति॥ २१९॥

अर्थ—जो पुद्गल कर्म शुभ हैं, वह पुण्य है, ऐसा जिनशासनमें देखा गया है। तथा जो अशुभ है, वह पाप है, ऐसा सर्वज्ञ भगवान्ने कहा है।

भावार्थ—सर्वज्ञदेव कर्मोंकी ४२ शुभ प्रकृतियोंको पुण्य और ८२ अशुभ प्रकृतियोंको पाप कहते हैं। सर्वज्ञका निर्देश करनेसे ग्रन्थकारका अभिप्राय यह है कि पुण्य-पाप पदार्थ आगमका विषय है। और जिनशासनमें उसका विस्तारसे वर्णन पाया जाता है।

आस्रवसंवरौ निरूपयति[3]—

आस्रव और संवरका निरूपण करते हैं:—

योगः शुद्धः पुण्यास्रवस्तु पापस्य तद्विपर्यासः ।
वाक्कायमनोगुप्तिर्निरास्रवः संवरस्तूक्तः ॥ २२० ॥

टीका—योगो[2] मनोवाक्कायाख्यः स खल्वागमपूर्वको व्यापारः स्वेच्छाकृतःस पापस्यास्रवइति। सर्वेषामेवास्रवाणां निरोधो गुप्तिसमितिपुरःसरो नियमितमनोवाक्कायक्रियस्य संवरो भवति स्थगितास्रवद्वारस्येत्यर्थः॥ २२०॥

अर्थ—शुद्ध योगसे पुण्य कर्मका आस्रव होता है और अशुद्ध योगसे पाप कर्मका आस्रव होता है। वचन गुप्ति, कायगुप्ति और मनोगुप्तिपूर्वक आस्रवके रुकनेको संवर कहते हैं। इसका निरूपण पहले किया जा चुका है।

१–नास्ति पदमिदं ब० पुस्तके। २–नास्त्यत्र पदद्वयमिदं ब० पुस्तके। ३–अस्मात् पूर्वं 'आस्रवसंवरौ निरूपयति' इत्यात्मकः पाठ उपलभ्यते ब० पुस्तके।

भावार्थ—आगममें विहित विधिके अनुसार जो मन, वचन और कायकी प्रवृत्ति होती है, उससे पुण्य कर्मका आस्रव होता है। और स्वेच्छापूर्वक प्रवृत्ति करनेसे पाप कर्मका आस्रव होता है। गुप्ति समितिका पालन करते हुए सर्व मन, वचन और कायकी क्रियाको नियमित करनेसे जो समस्त आस्रवोंका निरोध होता है, उसे संवर कहते हैं।

निर्जरणबन्धमोक्षप्रतिपादनायाह—

निर्जरा, बन्ध और मोक्षको कहते हैं:—

संवृततपउपधानं तु निर्जरा कर्मसन्ततिर्बन्धः ।
बन्धवियोगो मोक्षस्त्विति संक्षेपान्नव पदार्थाः ॥ २२१ ॥

टीका—एवं संवृतास्रवद्वारस्य तपसि यथाशक्ति घटमानस्यापूर्वकर्मप्रवेशनिरोधे सति पूर्वार्जितकर्मणस्तपसा क्षयः। निर्जरा निर्जरणम्। उपधानमिवोपानं शिरोधरायाः सुखहेतुर्यथा तथा तपोऽपि जीवस्य सुखहेतुत्वादुपधानमुच्यते। कर्मसन्ततिर्बन्धः। कर्मणां ज्ञानावरणादीनां सन्ततिरविच्छेदो बन्धः कर्मत एव कर्मोपादानमात्मन इत्यर्थः। कार्त्स्न्येन बन्धवियोगो मोक्षः। द्वाविंशत्युत्तरेऽपि प्रकृतिशते निःशेषतः क्षीणे मोक्षो भवति। इत्युक्ताः संक्षेपतो नव पदार्थाः ॥ २२१ ॥

अर्थ—संवरसे युक्त जीवके तप—उपधानको निर्जरा कहते हैं। कर्मोंकी सन्तानको बन्ध कहते हैं। और बन्धके अभावको मोक्ष कहते हैं। इस प्रकार संक्षेपसे नौ पदार्थ हैं।

भावार्थ—आस्रवके द्वारोंको बन्द करके शक्तिके अनुसार तपस्या करनेसे नवीन कर्मोंके आगमनके रुक जानेपर पहले बँधे हुए कर्मोंका तपसे जो क्षय होता है, उसे निर्जरा कहते हैं। उपधान तकियेको कहते हैं। जिस प्रकार तकिया सिरके लिए सुखका कारण होता है, उसी प्रकार तप भी जीवके सुखका कारण है। तप करनेसे सुखकी प्राप्ति होती है। अतः तपको उपधान कहा है। ज्ञानावरण आदि कर्मोंके नाश न होनेको—उनकी परम्पराके बराबर चलते रहनेको बन्ध कहते हैं; क्योंकि कर्मोंसे ही आत्माके कर्मबन्ध होते हैं। अर्थात् पहले बँधे हुए कर्म ही नवीन कर्मोंके बन्धमें कारण होते हैं। इसीसे कर्मोंकी सन्तानको बन्धका कारण होनेसे बन्ध कहा है। बन्धके बिलकुल अभाव हो जानेको मोक्ष कहते हैं क्योंकि १२२ प्रकृतियोंके बिलकुल क्षीण हो जानेपर मोक्ष होता है। इस प्रकार संक्षेपसे नौ पदार्थ हैं।

सम्यग्दर्शनस्वरूपनिरूपणायाह—

सम्यग्दर्शनका स्वरूप कहते हैं—

एतेष्वध्यवसायो योऽर्थेषु विनिश्चयेन तत्त्वमिति ।
सम्यग्दर्शनमेतच्च तन्निसर्गादधिगमाद्वा ॥ २२२ ॥

[illegible]

टीका—एतेषु जीवादिपदार्थेषु योऽध्यवसायो विनिश्चयेन परमार्थेन, न दाक्षिण्यानुवृत्त्या, तत्तत्त्वमिति सत्यं तथ्यं तद्भूतमित्यर्थः। एतदेवं प्रकारं सम्यग्दर्शनम्। तत्तु द्विहेतुकं निसर्गादधिगमाद्वेति। निःसर्गः स्वभावः संसारे परिभ्रमतो जीवस्यानाभोगपूर्वकं कर्म क्षपयतो ग्रन्थिस्थानप्राप्तस्यापूर्वकरणलाभाद् ग्रन्थिं विदारयतः शुभाध्यवसायस्य विभिन्नग्रन्थेरनिवृत्तिकरणप्राप्ता शुभपरिणामस्य स निसर्गतः स्वभावादेव तत्त्वार्थश्रद्धानलक्षणं सम्यग्दर्शनमुत्पद्यते। भगवत्प्रतिमादर्शनात् साधुदर्शनाद्वा शुभपरिणामो निसर्गः स्वभावश्चैकार्थाः। कदाचिद् ग्रन्थौ भिन्ने शिष्यमाणस्यागमोपदेशादाकर्णयतः शृण्वतोऽधिगमसम्यग्दर्शनमुत्पद्यते॥ २२२॥

अर्थ—इन जीवादि पदार्थोंमें परमार्थसे 'ये तत्त्व हैं। ऐसा जो अध्यवसाय—परिणाम होता है, उसे सम्यग्दर्शन कहते हैं। वह सम्यग्दर्शन स्वभावसे अथवा परोपदेशसे होता है।

भावार्थ—उक्त जीवादि पदार्थोंमें परमार्थसे, न कि दूसरोंके आग्रहसे, सत्यताकी जो प्रतीति होती है—कि यही तत्त्व हैं, यही तत्त्व हैं, यही सत्य है, यही वास्तविक है, उसे सम्यग्दर्शन कहते हैं। उस सम्यग्दर्शनके दो हेतु हैं—एक निसर्ग और दूसरा अधिगम। निसर्ग स्वभावको कहते हैं। संसारमें भ्रमण करता हुआ जीव काललब्धिके प्राप्त होनेपर बिना भोगे ही कर्मोंका क्षपण करता है। और मिथ्यात्वरूपी ग्रन्थिस्थानको प्राप्त करके अपूर्वकरण नामके परिणामोंके द्वारा ग्रन्थिको भेदता है। शुभ परिणामोंके द्वारा मिथ्यात्व-ग्रन्थिका भेद करनेके बाद अनिवृत्तिकरण नामके परिणामोंको प्राप्त करता है। तब उसके स्वभावसे ही तत्त्वार्थश्रद्धानरूप सम्यग्दर्शन उत्पन्न होता है। इस प्रकार जिनेन्द्रदेवकी प्रतिमाके दर्शनसे अथवा साधुओंके दर्शनसे पूर्वोक्त रीतिसे जो सम्यक्त्व प्रकट होता है, वह निसर्ग सम्यग्दर्शन है। तथा ग्रन्थिभेद होनेपर गुरु महाराजके उपदेश सुननेसे जो सम्यक्त्व होता है, वह अधिगम सम्यग्दर्शन है। सारांश यह है कि सम्यग्दर्शनकी उत्पत्तिके दो कारण हैं—एक अन्तरङ्ग और दूसरा बाह्य। अन्तरङ्ग कारण दोनों ही सम्यग्दर्शनमें समान हैं; क्योंकि दोनों ही प्रकारके सम्यग्दर्शनोंकी उत्पत्तिके लिए मिथ्यात्वरूपी ग्रन्थिका छेदा जाना आवश्यक है और उसके छेदके लिए अधःप्रवृत्तिकरण, अपूर्वकरण और अनिवृत्तिकरण नामके परिणामोंका होना जरूरी है। अतः आन्तरिक प्रक्रिया तो दोनोंमें समान है। केवल बाह्य कारणोंमें अन्तर है। निसर्ग सम्यग्दर्शनमें जिन-प्रतिमा, साधु वगैरहका दर्शन बाह्य कारण होता है। उनके दर्शन मात्रसे ही शुभ भावोंकी धारा बहने लगती है। किन्तु अधिगम सम्यक्त्वमें परका उपदेश बाह्य कारण होता है। दोनोंमें केवल इतना ही अन्तर है।

एतदेव दर्शयति—

इसी बातको कहते हैं :—

शिक्षागमोपदेशश्रवणान्येकार्थकान्यधिगमस्य।
एकार्थः परिणामो भवति निसर्गः स्वभावश्च॥ २२३॥

१–विदारय० क०।

टीका—उक्तार्था कारिकेयम् ॥ २२३ ॥

अर्थ—शिक्षा, आगम, उपदेशश्रवण-ये अधिगमके समानार्थक हैं। और परिणाम, निसर्ग और स्वभाव-ये तीनों एकार्थक हैं।

भावार्थ—जिस प्रकार जैनधर्मके अभ्याससे, आगमके पढ़नेसे, और उपदेशके सुननेसे जो सम्यक्त्व उत्पन्न होता है, वह अधिगम है, उसी प्रकार परके उपदेशके बिना स्वभावसे ही जो सम्यक्त्व होता है, वह निसर्ग है।

एतत्सम्यग्दर्शनमनधिगमविपर्ययौ तु मिथ्यात्वम् ।
ज्ञानमथ पञ्चभेदं तत् प्रत्यक्षं परोक्षं च ॥ २२४ ॥

टीका—एतद्द्विप्रकारं सम्यग्दर्शनमाधिगमिकं नैसर्गिकं च । एतद्विपरीतं मिथ्यात्वमनधिगमलक्षणं तत्त्वार्थाश्रद्धानम् । अतत्त्वबुद्धिरिति विपर्ययः । ज्ञानं मत्यादिभेदेन पञ्चधा । तत् समासतो द्विधा—प्रत्यक्षं परोक्षं च । तत्र प्रत्यक्षमवधिमनःपर्यायकेवलाख्यमक्षस्यात्मनः साक्षादिन्द्रियनिरपेक्षं क्षयोपशमजं क्षयोत्थं च । मतिश्रुते परोक्षमिन्द्रियानिन्द्रियनिमित्तमिन्द्रियद्वारकं न पुनरात्मनः साक्षाद्धूमादग्निज्ञानवत् । इन्द्रियमनोज्ञानावरणक्षयोपशमजन्यं परोक्षमिति ॥ २२४ ॥

अर्थ—यह सम्यग्दर्शन है। और तत्त्वार्थका श्रद्धान न करना अथवा विपरीत श्रद्धान करना मिथ्यात्व है। ज्ञानके पाँच भेद हैं। वह प्रत्यक्ष और परोक्ष होता है।

भावार्थ—इस प्रकार सम्यग्दर्शन दो प्रकारका होता है—अधिगमज और निसर्गज। इससे उल्टा मिथ्यात्व है। तत्त्वार्थका श्रद्धान न करना अधिगम मिथ्यात्व है। और तत्त्वमें अतत्त्वबुद्धिका होना विपर्यय मिथ्यात्व है। इस प्रकार सम्यग्दर्शनका कथन करके सम्यग्ज्ञानका कथन करते हैं। ज्ञानके पाँच भेद हैं—मति, श्रुत, अवधि, मनःपर्यय और केवल। यह संक्षेपसे दो प्रकारका होता है-प्रत्यक्ष और परोक्ष। अवधि, मनःपर्यय और केवल प्रत्यक्ष हैं; क्योंकि ये ज्ञान इन्द्रियोंकी सहायता न लेकर केवल आत्मासे ही उत्पन्न होते हैं। इनमेंसे अवधि और मनःपर्यय क्षायोपशमिक हैं और केवलज्ञान क्षायिक है। मति और श्रुत परोक्ष हैं; क्योंकि वे इन्द्रिय और मनकी सहायतासे उत्पन्न होते हैं। जैसे, धूमसे अग्निका ज्ञान करनेमें धूम सहायक होता है। वैसे ही ये ज्ञान भी इन्द्रिय और मनकी सहायतासे पदार्थोंको जानते हैं। अतः जो ज्ञान इन्द्रियावरण और अनिन्द्रियावरण कर्मके क्षयोपशमसे होता है, वह परोक्ष है।

तत्र परोक्षं द्विविधं श्रुतमाभिनिबोधिकं च विज्ञेयम् ।
प्रत्यक्षं चावधिमनःपर्यायौ केवलं चेति ॥ २२५ ॥

टीका—श्रुतमागमोऽतीन्द्रियविषयो यथार्थपरिच्छेदित्वात् प्रमाणम्। आभिनिबोधिकं मतिरिति तुल्यार्थौ। सा च मानसी मतिरर्थावग्रहाद्या। ततः परः द्विबहुद्वादशविधं श्रुतं

भवति । प्रत्यक्षं पुनरवध्यादित्रयम् । मिथ्यादर्शनपरिग्रहान्मतिश्रुतावधयो विपर्ययश्चाज्ञानमपि भवतीति ॥ २२५ ॥

अर्थ—उनमेंसे परोक्षके दो भेद जानने चाहिए—एक श्रुत और दूसरा आभिनिबोधिक । तथा अवधि, मनःपर्यय और केवलज्ञानको प्रत्यक्ष जानना चाहिए ।

भावार्थ—आगमिक ज्ञानको श्रुत कहते हैं । आभिनिबोधिक और मतिका एक ही अर्थ है । पहले अर्थावग्रह आदिरूप मतिज्ञान होता है । उसके बाद अनेक प्रकारका श्रुतज्ञान होता है । अवधि वगैरह तीन ज्ञान प्रत्यक्ष हैं । मिथ्यात्वके साथ रहनेसे मति, श्रुत और अवधिज्ञान मिथ्याज्ञान भी होते हैं । अर्थात् ये तीनों ज्ञान सच्चे भी होते हैं और मिथ्या भी होते हैं । यदि सम्यक्त्वके साथ हों तो सच्चे होते हैं और यदि मिथ्यात्वके साथ हों तो मिथ्या होते हैं ।

एषामुत्तरभेदविषयादिभिर्भवति[1] विस्तराधिगमः ।
ऐकादीन्येकस्मिन् भाज्यानि त्वाचतुर्भ्य इति ॥ २२६ ॥

टीका—एषां मत्यादिज्ञानानामुत्तरभेदविषयादिभिर्भवति विस्तराधिगमः । तत्रेन्द्रियानिन्द्रियभेदाद्विविधं मतिज्ञानम् । अवग्रहादिभेदाच्चतुर्विधम् । बह्वादिभेदादनेकधा । श्रुतमप्यङ्गबाह्याङ्गप्रविष्टभेदाद्द्विधा । अङ्गबाह्यमनेकप्रकारम् । आवश्यकाद्यङ्गप्रविष्टमप्याचारादि द्वादशविधम् । तत्र परोक्षमसर्वद्रव्यविषयम् । अवधिर्जघन्यमध्यमोत्कृष्टादिभेदेनानेकधा रूपिद्रव्यनिबन्धनः । मनःपर्यायज्ञानमपि ऋजुविपुलमत्यादिभेदमवधिज्ञानविषयीकृतद्रव्यानन्तभाग निबन्धनं विशुद्धतरं चेति । एवं विस्तराधिगमः । आदिग्रहणात् क्षेत्रकालविभागोऽपि द्रष्टव्यः । अथैतानि पञ्च ज्ञानान्येकस्मिन्नात्मनि युगपत् कियन्ति भवन्तीत्याह-एकादीनीत्यादि । एकं मतिज्ञानं जघन्यतः श्रुतज्ञानमक्षरात्मकं सर्वत्र नै संभवतीत्येवमुक्तमेकं मतिज्ञानमिति । अन्यथा मावश्रुतं सर्वजीवानामागमेऽभिहितम् । तथा कदाचिन्मतिश्रुते द्वे भवतः । कदाचित्त्रीणि मतिश्रुतावधिज्ञानानि । कदाचिन्मतिश्रुतावधिमनःपर्ययज्ञानानीति । न जातुचित् पञ्चापि युगपत् संभवन्तीति ॥ २२६ ॥

अर्थ—इन ज्ञानोंके उत्तरभेद और विषय वगैरहसे इनका विस्तारसे ज्ञान होता है । एक जीव में एकसे लेकर चार ज्ञान तक विभाग करना चाहिए ।

भावार्थ—भेद-प्रभेद और विषय आदिसे ज्ञानोंको खूब विस्तारके साथ जाना जा सकता है । जैसे इन्द्रिय और अनिन्द्रियके भेदसे मतिज्ञान दो प्रकारका है । अवग्रह, ईहा, अवाय और धारणाके भेदसे चार प्रकारका है । ये चारों ज्ञान, पाँचों इन्द्रियों और मनसे उत्पन्न होते हैं । अतः मतिज्ञान ४×६=२४ प्रकारका है । बहु, बहुविध, क्षिप्र, अनिःसृत, अनुक्त, ध्रुव, एक, एकविध, चिर, निःसृत, उक्त और

१-दिभिर्विस्तराधिगमो भवति-ब० । २-' एकादीन्येकस्मिन् ' इत्यारभ्य ' विस्तराधिगमो भवति ' इति पर्यन्तः पाठः-ब० पुस्तके नास्ति । ३-नास्तीदं-ब० पुस्तके ।

इस तरह चार प्रकारके पदार्थोंके अवग्रहादि चारों ज्ञान होते हैं और उनमेंसे प्रत्येक ज्ञान पाँचों इन्द्रियों और मनसे उत्पन्न होता है। अतः मतिज्ञान १२ × ४ × ६ = २८८ प्रकारका है। तथा अवग्रहके दो भेद हैं। एक अर्थावग्रह और दूसरा व्यञ्जनावग्रह। व्यञ्जनावग्रह चक्षु और मनके सिवा शेष चारों ही इन्द्रियोंसे होता है और बारह ही प्रकारके पदार्थोंका होता है। अतः उसके १२ × ४ = ४८ भेद होते हैं। पूर्वोक्त २८८ भेदोंमें ४८ भेदोंको मिलानेसे मतिज्ञान ३३६ प्रकारका होता है।

श्रुतज्ञान भी अंगबाह्य और अंगप्रविष्टके भेदसे दो प्रकारका है। अंगबाह्य श्रुतके अनेक भेद हैं। अंगप्रविष्ट श्रुतके आचाराङ्ग, सूत्रकृताङ्ग आदि बारह भेद हैं। ये दोनों परोक्षज्ञान समस्त द्रव्योंकी कुछ पर्यायोंको जानते हैं। अवधिज्ञानके जघन्य, मध्यम, उत्कृष्ट आदि अनेक भेद हैं। तथा वह रूपी द्रव्योंको ही जानता है। मनःपर्ययज्ञानके ऋजुमति, विपुलमति वगैरह भेद हैं। वह अवधिज्ञानके विषयीभूत रूपी द्रव्यके अनन्तवें भागको जानता है। अतः उसकी अपेक्षासे विशुद्धतर है। केवलज्ञान समस्त द्रव्योंकी समस्त पर्यायोंको जानता है। इस प्रकार भेदों और विषयकी अपेक्षासे ज्ञानोंका विस्तारसे बोध होता है। 'आदि' पदसे क्षेत्र और कालकी अपेक्षासे भी विभाग कर लेना चाहिए। इन पाँचों ज्ञानोंमेंसे एक जीवके एकसे लेकर चार ज्ञान तक हो सकते हैं। एक ज्ञान मतिज्ञान होता है। अक्षरात्मक श्रुतज्ञान सब जीवोंके नहीं होता। अतः अकेला मतिज्ञान बतलाया है। कभी मति और श्रुत दोनों होते हैं। कभी मति, श्रुत और अवधि तीन ज्ञान होते हैं। कभी मति, श्रुत अवधि और मनःपर्यय ये चार ज्ञान होते हैं। किन्तु एक साथ पाँचों ज्ञान कभी नहीं होते।

सम्यग्ज्ञानमिथ्याज्ञानयोः किंकृतो भेद इत्याह—

सम्यग्ज्ञान और मिथ्याज्ञानमें भेद होनेका कारण बतलाते हैं:—

सम्यग्दृष्टेर्ज्ञानं सम्यग्ज्ञानमिति नियमतः सिद्धम्।
आद्यत्रयमज्ञानमपि भवति मिथ्यात्वसंयुक्तम्॥ २२७॥

टीका—सम्यग्दृष्टिस्तत्त्वार्थश्रद्धानलक्षणसम्यग्दर्शनसम्पन्नः [illegible] ज्ञानं सम्यग्ज्ञानम्। यथार्थ[illegible] नियमेनाव्यभिचारि सिद्धम्। आद्यत्रयमज्ञानमपि मिथ्यादर्शनयोगात् मतिश्रुतावधय[illegible] [illegible]

भावार्थ—तत्त्वार्थके श्रद्धानरूप सम्यग्दर्शनसे युक्त और शङ्कादि दोषोंसे रहित सम्यग्दृष्टिका जो ज्ञान होता है, उसे सम्यग्ज्ञान कहते हैं; क्योंकि वह वस्तुके स्वरूपको जैसा का तैसा जानता है। यह ज्ञान नियमसे अव्यभिचारी है। अर्थात् सम्यग्दृष्टिके ज्ञानके सम्यग्ज्ञान होनेमें कभी कोई बाधा नहीं देखी गई और न कभी सम्यग्दृष्टिके सिवा किसी अन्यका ज्ञान सम्यग्ज्ञान ही देखा गया है। आदिके तीन ज्ञान—मति, श्रुत, और अवधि मिथ्याज्ञान भी होते हैं। अर्थात् ये तीनों ज्ञान मिथ्यादृष्टिके भी होते हैं। अतः वे मिथ्याज्ञान भी कहे जाते हैं। क्योंकि मिथ्यादर्शनके सम्बन्धसे ये तीनों ज्ञान सत् और असत्में भेद न कर सकनेके कारण उन्मत्त मनुष्यकी तरह अपनी इच्छासे सत् को असत् कह देते हैं और असत् को सत् कह देते हैं। *यदि कभी सत्को सत् और असत्को असत् भी कह दें तो भी उन्हें प्रामाणिक* नहीं माना जा सकता। जिस प्रकार शराबी मनुष्य शराबके नशेमें स्त्रीको माता और माताको स्त्री कहता है। कदाचित् माताको माता और स्त्री को स्त्री भी कह देता है; किन्तु इससे उसे होशमें नहीं माना जा सकता। इसी प्रकार मिथ्यादृष्टि जीव भी आत्मज्ञानसे विमुख होनेके कारण संसारके पदार्थोंमें निज्यबुद्धि रखता है—जो अपने नहीं हैं उन्हें अपना समझता है। उनमें किसीसे राग और किसीसे द्वेष करता है। अतः उसका ज्ञान अज्ञान या मिथ्याज्ञान कहा जाता है। इस प्रकार सम्यक्त्व और मिथ्यात्वके कारण ज्ञान, सम्यग्ज्ञान और मिथ्याज्ञान होता है।

सम्यग्दर्शनसम्यग्ज्ञाने निरूप्य चारित्रप्रतिपादनार्थमाह—

सम्यग्दर्शन और सम्यग्ज्ञानका निरूपण करके सम्यक्चारित्रका प्रतिपादन करते हैं :—

सामायिकमित्याद्यं छेदोपस्थापनं द्वितीयं तु ॥
परिहारविशुद्धिकं सूक्ष्मसम्परायं यथाख्यातम् ॥ २२८ ॥

टीका—अरक्तद्विष्टः समस्तस्य आयो लाभ उपचयो ज्ञानादेः समायः, सः प्रयोजनमस्येति सामायिकम्। प्रथमपश्चिमतीर्थङ्करयोरित्वरं सामायिकम्। मध्यमतीर्थङ्कराणां यावज्जीविकम्। पूर्वपर्यायच्छेदादुत्तरपर्यायोत्थापनं छेदोपस्थापनम्। प्रथमपश्चिमतीर्थङ्करयोरेव तीर्थे। परिहारविशुद्धिकं परिहारेण आचाम्लवर्जिताहारपरिहारेण तत्परित्यागेन विशुद्धिः कर्म यत्र तत् परिहारविशुद्धिकम्। अधीतनवमपूर्वतृतीयाचारवस्तूनां साधूनां गच्छविनिर्गतानां पारिहारिककल्पस्थितत्वेन त्रिधा स्थितानां ग्रीष्मशिशिरवर्षासु चतुर्थादिद्वादशान्तभक्तभोजिनामाचाम्लेनैव पारिहारिकाणां च प्रतिदिनाचाम्लभोजिनां कल्पस्थितस्य च एकैकस्य वर्गस्य षाण्मासावधितपोऽनुष्ठानं परिहारविशुद्धिकमुच्यते। तथा सूक्ष्मसम्परायं सम्परायः कषायो यस्य सूक्ष्मो लोभाख्यस्तत्सूक्ष्मसम्परायं दशमगुणस्थानवर्तिनश्चारित्रं भवति। यथाख्यातं तूपशान्तकषायस्य क्षीणकषायस्य चैकादशे द्वादशे च गुणस्थाने वर्तमानस्य भवति। यथा भगवद्भिराख्यातं येन प्रकारेण कथितं कथं वाख्यातमकषायस्य चारित्रमित्येवमाख्यानम् ॥ २२८ ॥

१–काणाम्नुपरिहारिकाणां च–ब०।

इत्येतत् पञ्चविधं चारित्रं मोक्षसाधनं प्रवरम् ।
अनेकानुयोगनयप्रमाणमार्गैः समनुगम्यम् ॥ २२९ ॥

टीका—पञ्चविधं सामायिकादियथाख्यातपर्यन्तमष्टविधकर्मचयरिक्तीकरणाच्चरित्रम् । मोक्षसाधनं सम्यग्ज्ञानपूर्वकं क्रियानुष्ठानम् । प्रवरं प्रधानम् । अनेकानुयोगद्वारमार्गेण, अनेकेन च नयमार्गेण नैगमादिना, तथा प्रमाणमार्गेण प्रत्यक्षपरोक्षगोचरेण । समनुगम्यं समधिगम्यं ज्ञेयमित्यर्थः ॥ २२९ ॥

अर्थ—पहला सामायिक, दूसरा छेदोपस्थापना, तीसरा परिहारविशुद्धि, चौथा सूक्ष्मसम्पराय और पाँचवाँ यथाख्यात ये चारित्रके पाँच भेद हैं । यह चारित्र मोक्षका प्रधान कारण है । अनेक अनुयोगद्वारोंसे, नयोंसे और प्रमाणोंसे उसे अच्छी तरह जानना चाहिए ।

भावार्थ—राग और द्वेषसे रहित परिणामको सम कहते है, उसकी प्राप्तिको 'समाय' कहते हैं । 'समाय' अर्थात् साम्यभावकी प्राप्ति ही जिसका प्रयोजन है, उसे सामायिक कहते हैं । पहले और अन्तिम तीर्थंकरको सामायिकचारित्र कुछ समय तक रहता है और मध्यके तीर्थङ्करोंके जीवनपर्यन्त रहता है । पूर्व पर्यायका छेद करके उत्तर पर्यायके धारण करनेको छेदोपस्थापनचारित्र कहते हैं । यह चारित्र पहले और अन्तिम तीर्थंकरके तीर्थमें ही होता है । आशय यह है कि दीक्षा धारण करते समय सामायिकसंयम ही, धारण किया जाता है । बादमें उसमें दूषण लगनेपर छेदोपस्थापनचारित्र धारण करना होता है । यह दूषण पहले और अन्तिम तीर्थंकरोंके समयमें ही लगता है । अतः उनके तीर्थमें पाँचों चारित्रोंकी प्रवृत्ति रहती है । किन्तु मध्यके बाईस तीर्थंकरोंके तीर्थमें सामायिकमें दूषण लगनेका प्रसङ्ग उपस्थित नहीं होता । अतः उनके तीर्थमें चार ही संयमोंकी प्रवृत्ति रहती है । आचाम्लके सिवा शेष आहार भी त्याग कर देनेसे आत्मामें जो विशुद्धि उत्पन्न होती है, उसे परिहारविशुद्धिचारित्र कहते हैं । नौवें पूर्वकी तीसरी आचार वस्तुके पाठी जो साधु गच्छसे निकलकर पारिहारिक कल्पमें स्थित होते हैं और ग्रीष्म, शिशिर तथा वर्षा ऋतुमें एकसे लेकर पाँचतक उपवास करते हैं । अर्थात् ग्रीष्म ऋतुमें जघन्यसे एक, मध्यम दो और उत्कृष्ट तीन उपवास, शिशिर ऋतुमें जघन्यसे दो, मध्यम तीन और उत्कृष्टसे चार उपवास तथा वर्षा ऋतुमें जघन्यसे तीन, मध्यमसे चार और उत्कृष्टसे पाँच उपवास करते हैं । पारणाके दिन आचाम्ल भोजन करते हैं ।

सूक्ष्मसम्परायको [illegible] हैं । जिसके सूक्ष्म लोभकषाय बाकी रह जाती है, उस दशम गुणस्थान[illegible] [illegible] हैं । [illegible] और बारहवें गुणस्थानवर्ती उपशान्त-कषाय और क्षीण[illegible] [illegible] होता है । भगवान्ने जिस प्रकारसे कहा है उसी [illegible]से [illegible] चारित्रको [illegible]चारित्र [illegible] [illegible] अक्षयोंके होते हैं । इस प्रकार चारित्रके [illegible] भेद [illegible] [illegible] डालता है, [illegible] मोक्षके

१ अनेका[illegible] [illegible]

प्रति प्रधान कारण है। अनेक अनुयोगोंसे, अनेक नयोंसे तथा प्रत्यक्ष परोक्ष प्रमाणोंसे इस चारित्रको अच्छी तरह जानना चाहिए ॥ २२८-२२९ ॥

सम्यग्दर्शनं सम्यग्ज्ञानं सम्यक्चारित्रं च किं समुदितमेव साधनमाहोश्विदेकैकमपीत्याशङ्कयाह—

सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र तीनों मिलकर ही मोक्षके साधन हैं अथवा एक एक साधन है ? यह आशङ्का करते हैं:—

सम्यक्त्वज्ञानचारित्रसम्पदः साधनानि मोक्षस्य ।
तास्वेकतराऽभावेऽपि मोक्षमार्गोऽप्यसिद्धिकरः ॥ २३० ॥

टीका—समुदितमेव त्रितयमविकलं मोक्षसाधनम् । एकतराऽभावेऽप्यसाधनमिति । एताः सम्यक्त्वादिसम्पदः । परस्परापेक्षा एव मोक्षं साधयन्ति, त्रिफलाव्यपदेशवत्[1] । एकतराऽभावे तु साधनाभावः, न मोक्षं साधयन्तीत्यर्थः ॥ २३० ॥

अर्थ—सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्ररूपी सम्पदा मोक्षका साधन है। उनमेंसे एकके भी अभावमें मोक्षमार्गकी सिद्धि नहीं होती।

भावार्थ—ये तीनों मिलकर ही मोक्षके साधन हैं। एकके भी अभावमें मोक्षके साधन नहीं हो सकते। जिस प्रकार हर्र, बहेड़ा और आँवलाके मेलसे ही त्रिफला नामक औषध तैयार होती है, तभी वह रोगोंका उन्मूलन करती है। उसी प्रकार ये तीनों ही परस्परमें एक दूसरेकी अपेक्षा रखकर ही मोक्षका साधन करते हैं। इनमेंसे यदि एक भी न हो तो संसाररूपी रोगोंसे मुक्ति नहीं मिल सकती।

पूर्वद्वयसम्पद्यपि तेषां भजनीयमुत्तरं भवति ।
पूर्वद्वयलाभः पुनरुत्तरलाभे भवति सिद्धः ॥ २३१ ॥

टीका—[2]सम्यग्दर्शनसम्यग्ज्ञानयोः सतोरपि चारित्रसम्पत् कदाचिद् भवति, कदाचिन्नेति भजनीयमुत्तरं चारित्रमित्यर्थः । यदा पुनश्चरणं लब्धं तदा पूर्वद्वयलाभो नियमेनैव । नहि सम्यग्दर्शनसम्यग्ज्ञानाभ्यां विना चरणसंभवः, तत्पूर्वकत्वाच्चारित्रस्य । तस्माच्चरणलाभाविनाभूते सम्यक्त्वसम्यग्ज्ञाने ॥ २३१ ॥

अर्थ—उनमेंसे पहलेके दो—सम्यग्दर्शन और सम्यग्ज्ञानके होनेपर भी चारित्र भजनीय है—कभी होता है और कभी नहीं होता। किन्तु उत्तर-चारित्रके होनेपर पहलेके दोनों—सम्यग्दर्शन और सम्यग्ज्ञानका लाभ सिद्ध ही है।

१-त्रिफलव्य-फ० ब० । २-'सम्यग्दर्शनसम्यग्ज्ञानयोः' इत्यारभ्य 'नियमेनैव' इतिपर्यन्तः पाठः-फ० पुस्तके नास्ति । परन्तु 'सम्यक्त्वज्ञानचारित्रसम्पदः' इत्यादिपूर्वकारिकाव्याख्यानन्तरमयमत्रुटितोऽयं त्रुटितः पाठस्तत्र ।

भावार्थ—सम्यग्दर्शन और सम्यग्ज्ञानके प्राप्त होनेपर भी किसीके चारित्र होता है और किसीके नहीं होता। जिस प्रकार चतुर्थ गुणस्थानमें सम्यग्दर्शन और सम्यग्ज्ञानके होनेपर भी चारित्र नहीं होता; किन्तु छट्टे आदि गुणस्थानोंमें होता है। परन्तु जिसके चारित्र होता है, उसके सम्यग्दर्शन और सम्यग्ज्ञान नियमसे होते हैं। क्योंकि उनके बिना चारित्र हो ही नहीं सकता। सम्यग्दर्शन और सम्यग्ज्ञानके होनेपर ही चारित्र होता है। अतः चारित्रकी प्राप्ति उन दोनोंकी अविनाभावी है।

कथं पुनः सम्यक्त्वादिसाधनमाराध्यमविकलमनुष्ठेयमित्याह—

सम्यक्त्व वगैरहका आराधन किस प्रकार करना चाहिए ? यह बतलाते हैं—

धर्मावश्यकयोगेषु भावितात्मा प्रमादपरिवर्जी।
सम्यक्त्वज्ञानचारित्राणामाराधको भवति ॥ २३२ ॥

टीका—धर्मे दशविधे क्षमादिके आवश्यकेषु। तानि चावश्यकानि प्रतिक्रमणालोचनस्वाध्यायप्रत्युपेक्षणप्रमार्जननिर्गमप्रवेशादीन्यवश्यकरणीयानि तेषु। भावितात्मा श्राद्धः समस्तप्रमादपरिहारी सम्यक्त्वादिसाधनानामाराधको भवति परिसमापयिता भवतीत्यर्थः ॥ २३२ ॥

अर्थ—क्षमा आदि धर्मोंमें और आवश्यकक्रियाओंमें श्रद्धाशील तथा प्रमाद न करनेवाला आत्मा सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्रका आराधक होता है।

भावार्थः—जो दश प्रकारके धर्मोंमें और प्रतिक्रमण, आलोचन, स्वाध्याय, प्रत्युपेक्षण, प्रमार्जन और जाना-आना वगैरह आवश्यकक्रियाओंमें श्रद्धा रखता है तथा आलस्य नहीं करता है, वह सम्यग्दर्शन आदिकी आराधना कर सकता है।

आराधनाश्च तेषां तिस्रस्तु जघन्यमध्यमोत्कृष्टाः।
जन्मभिरष्टत्र्येकैः सिध्यन्त्याराधकास्तासाम् ॥ २३३ ॥

टीका—तेषां सम्यक्त्वादीनामाराधनास्तिस्रो जघन्यमध्यमोत्कृष्टादिभेदेन संभवन्ति। तत्र जघन्याष्टभिर्जन्मभिर्देवमनुष्येषूपजातस्य भवति, अष्टाभिस्तेषां भवैरन्तं याति सिद्धिं प्राप्नोतीत्यर्थः। मध्यमा त्वाराधना जन्मत्रयेण मनुष्यजन्मपूर्विका। उत्कृष्टा त्वाराधना एकेनैव भवेन मरुदेव्या इव भवति। एवमाराधकास्तान्याराधयन्तीति ॥ २३३ ॥

अर्थ—उन सम्यक्त्व वगैरहकी जघन्य, मध्यम और उत्कृष्टके भेदसे तीन प्रकारकी आराधना होती है। और उनके आराधक आठ तीन और एक जन्ममें मोक्षको प्राप्त करते हैं।

भावार्थः—उनकी आराधना तीन प्रकारकी होती है—जघन्य मध्यम और उत्कृष्ट। जघन्य आराधनाके आराधक जीव आठ भवमें मोक्षको प्राप्त करते हैं। मध्यम आराधनाके तीन भवमें मोक्ष प्राप्त करते हैं, और उत्कृष्ट आराधनाके आराधक जीव उसी भवसे मोक्ष-लाभ करते हैं।

तासामाराधनतत्परेण तेष्वेव भवति यतितव्यम् ।
यतिना तत्परजिनभक्त्युपग्रहसमाधिकरणेन ॥ २३४ ॥

टीका—तासां सम्यक्त्वज्ञानचारित्रसम्पदाम् आराधनतत्परेण तत्रैव व्यग्रेण । तेष्वेव सम्यक्त्वादिषु यतितव्यं भवति । यतिना साधुना । तत्परजिनभक्त्युपग्रहसमाधिकरणेन तत्पर इति सत्त्वादिपरेण जिनभक्तौ समुद्यतेन भगवतामर्हतां यथाकालं वन्दनगुणोत्कीर्तनपरेण उपग्रहो भगवद्बिम्बप्रतिष्ठाफलकथनादि । अथवा साधूनामुपग्रहो वस्त्रपात्रभक्तपानादि समाध्युत्पादनेन च साधूनाराधयति प्रयत्नमेव कुर्वन्निति ॥ २३४ ॥

अर्थ—जो साधु उन सम्यक्त्व, ज्ञान और चारित्रकी आराधनामें तत्पर है । उन सम्यक्त्वादिकमें तत्पर साधुओंकी ओर जिनभगवान्‌की भक्ति, उपग्रह और समाधिके द्वारा उनमें ही प्रयत्न करना चाहिए ।

भावार्थ—जो साधु सम्यग्ज्ञान और सम्यक् चारित्रकी आराधनामें तत्पर है, उसे उन्हींमें यत्न करते रहना चाहिए । और उसके लिए उसे सम्यक्त्वादिमें तत्पर अन्य साधुओंकी तथा जिनेन्द्रदेवकी वन्दन स्तुति वगैरह करनी चाहिए । जिनबिम्ब-प्रतिष्ठा वगैरहका महान् फल बतलाते रहना चाहिए, साधुओंकी सेवा शुश्रूषा करते रहना चाहिये, तथा समाधिमें तत्पर रहना चाहिए । आशय यह है कि सम्यक्त्व, ज्ञान तथा चारित्रके आराधकको सम्यक्त्व, ज्ञान और चारित्रके आराधकको भी हर तरहसे आराधना करते रहना चाहिए ।

तमेव यत्नं प्रपञ्चेन दर्शयति—

विस्तारसे उसी यत्नका वर्णन करते हैं:—

स्वगुणाभ्यासरतमतेः परवृत्तान्तान्धमूकबधिरस्य ।
मदमदनमोहमत्सररोषविषादैरधृष्यस्य ॥ २३५ ॥

प्रशमाव्याबाधसुखाभिकांक्षिणः सुस्थितस्य सद्धर्मे ।
तस्य किमौपम्यं स्यात् सदेवमनुजेऽपि लोकेऽस्मिन् ॥ २३६ ॥

टीका—स्वगुणाः सम्यक्त्वज्ञानचरणाख्याः साधुगुणास्तेष्वभ्यास आवृत्त्यनुष्ठानं तत्र रता सक्ता मतिर्यस्यासौ स्वगुणाभ्यासरतमतिः । स हि परवृत्तान्ते ,परवार्तायां परचेष्टितेऽन्धः, न पश्यति परदोषान् गुणान् वा । स्वगुणेष्वेव सम्यक्त्वादिषु व्यग्रत्वात् । न च परदोषान् गुणान् वा उद्घट्टयति । मूक इव तदुद्घट्टने । न चाऽन्येन परगुणदोषानुद्घाट्यमानान् बधिर इव शृणोतीति । मदो गर्वः । मदनः कामः । मोहो हास्यरत्यादिः । मत्सरश्चित्तस्थ एव कोपो न बहिः प्रकटः । नो क्रोष्टारमाहन्तारं वा प्रतिभिनत्ति । रोषस्तु रक्तनयनाक्रोशताडनादिर्बहिर्लिङ्गः । विषादः स्वजनादिव्यापत्तावुपकरणादिना सेवा । एभिर्मदादिभिरधृष्यस्यानभिभूतस्य ॥ २३५ ॥

प्रशमसुखाभिकांक्षिणः अव्याबाधमोक्षसुखकांक्षिणश्च । सद्धर्मे मूलोत्तरलक्षणे । सुस्थितस्य निश्चलस्य । तस्यैवंविधस्य साधोः कोनोपमानं क्रियेत । अस्मिन् लोके सदेवमानुषे । नास्त्येव देवेषु मानुषेषु वा प्रशमसुखतुल्यं सुखम्, दूरत एव मोक्षसुखमिति ॥ २३६ ॥

अर्थ—जिसकी मति अपने गुणोंके अभ्यासमें लगी हुई है, जो दूसरोंकी बातोंमें अन्धा, गूँगा और बहिरा है, जो गर्व, काम, मोह, मत्सर, रोष, और विषादसे अभिभूत नहीं होता, जो प्रशम-सुख और बाधा रहित मोक्षके सुखका इच्छुक है और अपने धर्ममें दृढ़ है, देव और मनुष्योंसे युक्त इस लोकमें उस पुरुषकी उपमा किससे दी जा सकती है!

भावार्थ—जो अपने सम्यक्त्व, ज्ञान और चारित्र-गुणोंके पालनमें सदा तल्लीन रहता है, दूसरोंके दोषों अथवा गुणोंको नहीं देखता, अपने ही गुणोंके आराधनमें व्यग्र रहता है, दूसरोंके दोषों अथवा गुणोंको नहीं कहता है, यदि दूसरा कोई कहता हो तो उधर कान नहीं देता, गर्व, काम और मोह आदिके वशमें नहीं होता, केवल प्रशम-सुख और मोक्ष-सुखकी अभिलाषा करता है, और अपने धर्ममें स्थिर रहता है, ऐसे साधुकी उपमा किससे दी जाये? इस लोकमें जो देव और मनुष्य रहते हैं, उनमेंसे कोई भी उसकी बराबरी नहीं कर सकता।

अपि च

और भी—

स्वर्गसुखानि परोक्षाण्यत्यन्तपरोक्षमेव मोक्षसुखम् ।
प्रत्यक्षं प्रशमसुखं न परवशं न व्ययप्राप्तम् ॥ २३७ ॥

टीका—स्वर्गो मोक्षश्च परोक्षं तत्र यत्सुखं तद्द्वयमपि परोक्षमागमगम्यम्। मोक्षसुखमत्यन्तपरोक्षमेव। अत्यन्तमिति सुतरां परोक्षम्। स्वर्गसुखस्य केनचिदंशेन किंचिदिह उपमानं स्यात्, न तु मोक्षसुखस्येति। अतोऽत्यन्तपरोक्षम्। सर्वप्रमाणज्येष्ठेन प्रत्यक्षेण स्वात्मवर्तिना परिच्छिद्यमानं प्रशमसुखं न च पराधीनं स्वायत्तमेव। नापि व्ययप्राप्तम्। स्वाधीनत्वादेव। यतस्तत्स्वदेति न विगच्छति। वैषयिकं तु सुखं परवशं विषयाधीनं विषयाभावे तु न भवतीति ॥ २३७॥

अर्थ—स्वर्गके सुख परोक्ष हैं, और मोक्षका सुख तो अत्यन्त परोक्ष है। एक प्रशम-सुख प्रत्यक्ष है। न वह पराधीन है और न विनाशी।

भावार्थ—स्वर्ग और मोक्ष दोनों ही परोक्ष हैं अतः वहाँ जो सुख होता है, वह भी परोक्ष है, उसे केवल [illegible] है [illegible] क्योंकि [illegible]

वहाँपर भी वैषयिक ही सुख है; किन्तु मोक्षका सुख तो अत्यन्त परोक्ष है। उस सुखका तो हम संसारी जनोंको आभास भी नहीं हो सकता। परन्तु प्रशम सुखका अनुभव तो हम अपनी, आत्मामें ही कर सकते हैं। तथा वह सुख न तो पराधीन है और न विनाशीक है। वैषयिक-सुख नियमतः पराधीन है; क्योंकि वह विषयोंकी प्राप्ति होनेपर होता है और विषयोंके अभावमें नहीं होता।

निर्जितमदमदनानां वाक्कायमनोविकाररहितानाम्।
विनिवृत्तपराशानामिहैव मोक्षः सुविहितानाम् ॥ २३८ ॥

टीका—न्यक्कृतगर्वकामानां स्वस्थीभूतचेतसां शान्तानां वागादिविकाररहितानाम्। वाग्विकारो हिंस्रपरुषानृतादिः। कायविकारो धावनवल्गनादिः। मनोविकारोऽभिद्रोहाभिमानेर्ष्यादिः। एभिर्विरहितानाम्। विनिवृत्ता परविषया आशा येषां ते विनिवृत्तपराशाः। परस्मादिदं लभ्यं धनधान्यरजतादि केवलं तु परकृतभिक्षामात्रोपजीविनः। सोऽपि यदि लभ्यते प्रवचनोक्तेन विधिना ततः साधु ज्ञानचारित्रोपकारित्वात्। न लभ्यते चेत्ततः शुद्धाशयस्य निर्जरयेति। एवंविधानां यतीनामिहैव मोक्षः। मोक्षसुखमुपमानमुपमेयं प्रशमसुखमिति ॥२३८॥

अर्थ—वचन, काय और मनके विकारसे रहित गर्व और कामके जीतनेवाले परकी आशा न करनेवाले, शास्त्रविहित विधिके पालक साधुओंको यहीं मोक्ष है।

भावार्थ—जिन्होंने गर्व और कामको जीत लिया है, जिनका चित्त स्वस्थ है, जो शान्त हैं वचनके विकार-कठोरता, असत्यता, हिंसकता वगैरहसे, शरीरके विकार-दौड़ना फाँदना वगैरहसे, और मनके विकार-अभिद्रोह अभिमान ईर्षा वगैरहसे जो रहित हैं, दूसरोंसे प्राप्त होनेवाले धन-धान्य सोना, चाँदी वगैरहकी रंचमात्र भी इच्छा न करके जो केवल भिक्षासे प्राप्त होनेवाले अन्नपानसे अपना जीवन निर्वाह करते हैं—वह भी यदि शास्त्रविहित विधिके अनुसार मिलता है तो ठीक है अन्यथा जो अलाभको ही परम निर्जराका कारण मानकर उसमें ही संतोष करते हैं, और अपने परिणामोंको शुद्ध रखते हैं, ऐसे मुनीश्वरोंको इसी लोकमें मोक्ष है। अर्थात् प्रशम सुखको मोक्ष-सुखके ही तुल्य समझना चाहिए।

शब्दादिविषयपरिणाममनित्यं दुःखमेव च ज्ञात्वा।
ज्ञात्वा च रागद्वेषात्मकानि दुःखानि संसारे ॥ २३९ ॥
स्वशरीरेऽपि न रज्यति शत्रावपि न प्रदोषमुपयाति।
रोगजरामरणभयैरव्यथितो यः स नित्यसुखी ॥ २४० ॥

टीका—शब्दादयो विषयाः शब्दरूपरसगन्धस्पर्शास्तेषां परिणाम इष्टानिष्टता शब्दादिविषयपरिणामस्य यत्सुखं तदनित्यम्। विषयसन्निधौ भवति, तदभावे च न भवतीत्यनित्यम्।

१—जयति दर्पहर-ख० पुस्तके। २—त्रस्तोऽपि सम्पूर्णा न भिक्षा-ख० पुस्तके केवल [illegible]।

अपि च दुःखमेवेदं वैषयिकं सुखं पामनपुरुषकण्डूतिसुखवत् । दुःखमेवायं सुखाभिमानोऽल्पचेतसाम् । एवं विज्ञाय ज्ञात्वा च । रागद्वेषात्मकानि रागद्वेषपरिणतिजातानि रागद्वेषानुविद्धानि दुःखानि संसारे करोतीदम् ॥ २३९ ॥

निजशरीरकेऽपि न रज्यति रागं न करोति स्नेहमित्यर्थः । शत्रावपि न प्रदोषं प्रद्वेषं करोति । रोगो ज्वरादिः । जरा वयोहानिः । प्राणनाशो मरणम् । भयमिहलोकादि सप्तप्रकारम् । अपि शब्दश्चार्थे । एभिश्च न व्यथितः संपतद्भिरपि न बाधितः । एभ्यो न भीतो यः स नित्यमेव सुखी नित्यसुखीति ॥ २४० ॥

अर्थ—जो शब्द आदि विषयोंके परिणामको अनित्य और दुःखरूप जानकर तथा संसारके दुःखोंको राग और द्वेषसे होनेवाले जानकर अपने शरीरमें भी राग नहीं करता और शत्रुसे भी द्वेष नहीं करता, रोग, बुढ़ापा, मृत्यु और भयसे अपीड़ित वह मनुष्य सर्वदा सुखी है ।

भावार्थ—शब्द, रूप, रस, गन्ध, और स्पर्श-ये पाँचों इन्द्रियोंके विषय हैं । इनमें जो इष्ट अथवा अनिष्ट बुद्धि होती है, वही उनका परिणाम है, वह परिणाम अनित्य है; क्योंकि जो विषय आज सुखकर लगते हैं, कल वही दुःखदायी लगने लगते हैं । इसीलिए उन विषयोंके सम्बन्धसे जो सुख होता है, वह भी अनित्य है, विषयोंके होनेपर होता है, उनके अभावमें नहीं होता । तथा यह वैषयिक सुख वास्तवमें दुःख ही है । जिस प्रकार खाजका रोगी खाजके खुजलानेमें सुख मानता है, उसी प्रकार अज्ञानी प्राणी विषय-सेवनमें सुखका अभिमान करते हैं । तथा विषयोंका अनुभवन करनेसे राग और द्वेष अवश्य उत्पन्न होते हैं । जो विषय प्रिय लगते हैं, उनसे राग होता है और जो अप्रिय लगते हैं, उनसे द्वेष होता है । ये राग और द्वेष ही संसारके दुःखोंके मूलकारण हैं । ऐसा जानकर जो अपने शरीरसे भी राग नहीं करता है और शत्रुसे भी द्वेष नहीं करता है तथा जो रोग, बुढ़ापा, मृत्यु और भयसे डरता नहीं—यदि ये उपस्थित भी हो जायँ तो खेदखिन्न नहीं होता, वह मनुष्य सर्वदा सुखी रहता है ।

धर्मध्यानाभिरतस्त्रिदण्डविरतस्त्रिगुप्तिगुप्तात्मा ।
सुखमास्ते निर्द्वन्द्वो जितेन्द्रियपरीषहकषायः ॥ २४१ ॥

टीका—धर्मादनपेतं धर्म्यं ध्यानमाज्ञाविचयादि, तत्राभिरतस्तत्परस्तत्र सक्तः । मनोवाक्कायाख्याद्दण्डत्रयाद्विरतः । अनागमको मनोवाक्कायव्यापारो दण्डः । तिस्रो गुप्तयस्ताभिर्गुप्तात्मा । मौनी निरवद्यभाषी । वाका (कृतका) योत्सर्गः प्रवचनोक्तविधिना गामी वा धर्मध्यायी निरुद्धार्त्तरौद्राध्यवसायः सुखमास्ते निराबाधमशेषक्रियानुष्ठानं कुर्वन् । निर्द्वन्द्वो निर्गतसकलोपद्रवः एकाकी निष्कलहो वा जितानीन्द्रियाणि वशे स्थापितानि । परीषहाः सम्यक् सह्यन्ते । कषायाणामुदयो निरुद्ध उदितो वा विफलीकृतः । स एवंविधः सुखमास्ते ॥ २४१ ॥

१–नास्ति सम्पूर्णं वाक्यमिदं–फ० ब० पुस्तकयोः ।

अर्थ—धर्मध्यानमें लवलीन, तीन दण्डोंसे विरक्त, तीन गुप्तियोंसे सुरक्षित, इन्द्रिय परीषह और कषायका जेता कलह रहित साधु सुखपूर्वक रहता है।

भावार्थ—धर्मयुक्त ध्यानको धर्मध्यान कहते हैं जो उसमें लगा रहता है, मन, वचन और कायके आगम-विरुद्ध व्यापारको दण्ड कहते हैं, जो इन दण्डोंका त्यागी है, तीन गुप्तियोंका पालन करता है अर्थात् सर्वदा मौन धारण करता है, विशेष आवश्यकता पड़नेपर यदि बोलता है, तो हित-मित वचन ही बोलता है, काय-व्यापार नहीं करता, आगममें कही गई विधिके अनुसार केवल धर्मका ही चिन्तन करता है, आर्त्त और रौद्र ध्यानोंमें कभी भी मनको नहीं लगाता, लड़ाई झगड़ोंसे दूर रहता है, इन्द्रियोंको अपने वशमें रखता है, परीषहोंको अच्छी तरहसे सहता है, कषायोंके उदयको या तो रोक देता है या उसे व्यर्थ कर देता है, ऐसा साधु सच्चे सुखको भोगता है।

विषयसुखनिरभिलाषः प्रशमगुणगणाभ्यलङ्कृतः साधुः ।
द्योतयति यथा सर्वाण्यादित्यः सर्वतेजांसि ॥ २४२ ॥

टीका—शब्दादिजनिते विषयसुखे निर्गताभिलाषो निर्गतेच्छः । प्रशमगुणा ये स्वाध्यायसन्तोषादयस्तेषां गणः समूहस्तेनालङ्कृतो विभूषितः । साधुर्भास्कर इव । द्योतयति अभिभवति तारकादिप्रभां स्वप्रभया निरोभाव्य स्वतेज एव प्रकाशयति सर्वाणीत्यशेषाणि तेजांस्यभिभवतीत्यर्थः । तद्वत् साधुरुक्तगुणयुक्तः सर्वतेजांसि देवमनुष्यादीनामभिभूय प्रकाशते स्वतेजसेति ॥ २४२ ॥

अर्थ—विषय-सुखकी अभिलाषासे रहित और प्रशम गुणोंके समूहसे सुशोभित साधु सूर्यके समान सब तेजोंको अभिभूत करके प्रकाशमान होता है।

भावार्थ—शब्द आदिसे उत्पन्न होनेवाले विषय-सुखकी जिसे चाह नहीं है और स्वाध्याय सन्तोष तथा प्रशमगुणोंके समूहसे जो विभूषित है, वह साधु सूर्यके समान चमकता है। जिस प्रकार सूर्य अपनी प्रभासे तारों आदिकी प्रभाको अभिभूत करके अपने तेजको प्रकाशित करता है, उसी प्रकार उक्त गुणोंसे युक्त साधु सभी देव और मनुष्योंको अभिभूत करके अपने गुणोंसे स्वयं ही प्रकाशित होता है।

सम्यग्दृष्टिर्ज्ञानी विरतितपोबलयुतोऽप्यनुपशान्तः ।
तं न लभते गुणं यत् प्रशमसुखमुपाश्रितो लभते ॥ २४३ ॥

टीका—सम्यग्दर्शनसम्पन्नः सम्यग्ज्ञानसम्पन्नश्च । विरतितपोबलयुतोऽपि विरत्यन्तरगुणेन युक्तोऽपि, तपोबलेन च सम्पन्नः । अनुपशान्तः क्रोधादिकषायोदयवानुपशमम् । तं गुणं न लभते कषायोदये वर्तमानः । यं गुणं प्रशमगुणमाश्रितः प्राप्नोति । प्रशमस्यैव हि साध्विता एव गुणाः । तस्मादुपशान्तकषायेण भवितव्यमिति ॥ २४३ ॥

१—यह कारिका ह पु में नहीं है।

अर्थ—सम्यग्दृष्टी, सम्यग्ज्ञानी और व्रत तथा तपके बलसे युक्त होते हुए भी जो उपशान्त नहीं है, वह उस गुणको प्राप्त नहीं कर सकता, जिस गुणको प्रशम-सुखमें स्थित साधु प्राप्त करता है।

भावार्थ—सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्र और तपोबलसे सम्पन्न होते हुए भी जिस साधुकी क्रोधादि कषाय शान्त नहीं हुई है, वह साधु उस गुणको प्राप्त नहीं कर सकता जो गुण प्रशम, भाववाले साधुको प्राप्त रहता है। प्रशममें स्थित साधुके गुण पहले बतला आये हैं। अतः कषायोंको शान्त करना चाहिए।

तथा शीलाङ्गानामविकलानामेवंविध एव निष्पादको भवतीति दर्शयति—

प्रशम गुणवाला साधु ही शीलके सम्पूर्ण अङ्गोंकी साधना करता है, यह बतलाते हैं:—

सम्यग्दृष्टिर्ज्ञानी विरतितपोध्यानभावनायोगैः ।
शीलाङ्गसहस्राष्टादशकमयत्नेन साधयति ॥ २४४ ॥

टीका—सम्यग्दर्शनसम्यग्ज्ञानसम्पन्नो[1] विरत्या मूलोत्तरगुणस्वरूपया। तपसा चानशनादिना। ध्यानेन च धर्मादिना। भावनाभिश्चानित्यादिकाभिर्योगैश्च प्रशस्तैर्मनोवाक्कायव्यापारैः। शीलाङ्गसहस्राणामष्टादशकमष्टादशशीलाङ्गसहस्राणीत्यर्थः। अयत्नेनायासेन लीलयैव। साधयति स्वीकरोतीति।

अर्थ—सम्यग्दृष्टी और ज्ञानी व्रत, तप, ध्यान, भावना और योगके द्वारा शीलके अठारह हजार अङ्गोंको बिना यत्नके ही साधता है।

भावार्थ—जो सम्यग्दर्शन और सम्यग्ज्ञानसे युक्त है वह मूलगुण और उत्तरगुणरूप व्रत, अनशन वगैरह तप, धर्मादि ध्यान, अनित्यादि भावना, और मन, वचन, कायके प्रशस्त व्यापारके द्वारा शीलके अठारह हजार भेदोंको बिना किसी परिश्रमके धारण कर लेता है।

कानि पुनस्तानि अष्टादशशीलाङ्गसहस्राणीति केन चोपायेनाभिगम्यानीत्याह—

शीलके अठारह हजार अङ्गों और उनकी उत्पत्तिके उपायको बतलाते हैं:—

धर्माद्भूम्यादीन्द्रियसंज्ञाभ्यः करणतश्च योगाच्च ।
शीलाङ्गसहस्राणामष्टादशकस्य निष्पत्तिः ॥ २४५ ॥

टीका—क्षमादिदशलक्षणको धर्मः प्रथमपंक्तौ रचनीयः। तस्या अधस्तो द्वितीयपंक्तौ भूम्यम्बुतेजोवायुवनस्पतिद्वीन्द्रियत्रीन्द्रियचतुःपञ्चेन्द्रिया अजीवकायश्च विन्यसनीयः। तस्या अप्यधस्तृतीयपंक्तौ श्रोत्रचक्षुर्घ्राणरसनस्पर्शनानि लेख्यानि। तस्या अप्यधश्चतुर्थपंक्तौ आहार-भयपरिग्रहमैथुनसंज्ञा रचनीयाः। पञ्चमपंक्तावधस्तस्या न करोति न कारयति न कुर्वन्तमन्यं

1-[illegible]

नानुमोदयति, एतत्त्रयं स्थाप्यम्। तस्याप्यधः षष्ठपंक्तौ मनसा वाचा कायेनेति त्रयं विरचनीयम्। तत्र विकल्पानयने उच्चारणम्। क्षमयान्वितः पृथ्वीकायसमारम्भं संवृतश्रोत्रेन्द्रियद्वारः आहारसंज्ञाविप्रयुक्तो न करोति मनसा। एवं पृथ्वीकायमपरित्यजन् दश विकल्पान् लभते। एवमप्कायसमारम्भादिष्वपि दशसु दश विकल्पा लभ्यन्ते। ते दश दशकाः शतम्। एतच्छतं श्रोत्रेन्द्रियममुञ्चता लब्धम्। एवं चक्षुरादिभिरपि शतं शतं लभ्यते। जातानि पञ्च शतानि। एतान्याहारसंज्ञाममुञ्चता लब्धानि। तथा भयमैथुनपरिग्रहसंज्ञादिभिरपि प्रत्येकं पञ्च पञ्च शतानि लभ्यन्ते। जातं सहस्रद्वयम्। एतत् सहस्रद्वयं न करोमीत्यमुञ्चता लब्धम्। एवमितराभ्यामपि द्वे द्वे सहस्रे लब्धे। ततश्च षट् सहस्राणि जातानि। एतानि च मनसा लब्धानि। वाचापि षट् सहस्राणि। कायेनापि षडेव सहस्राणीति। एवमेषां शीलाङ्गानां शीलकारणानामष्टादशसहस्राणि निष्पाद्यन्ते ॥ २४५ ॥

अर्थ—धर्म, पृथ्वीकाय वगैरह, इन्द्रियाँ, संज्ञा, कृत, कारित, अनुमोदना, और मन, वचन, कायके मेलसे शीलके अठारह हजार अङ्गोंकी उत्पत्ति होती है।

भावार्थ—पहली पंक्तिमें क्षमा आदि दस धर्मोंको रखना चाहिए। उसके नीचे दूसरी पंक्तिमें पृथ्वी, जल, अग्नि, वायु, वनस्पति, दोइन्द्रिय, तेइन्द्रिय, चौइन्द्रिय, पंचेन्द्रिय और अजीवकायको रखना चाहिए। उसके नीचे तीसरी पंक्तिमें श्रोत्र, चक्षु, घ्राण, रसना और स्पर्शन इन्द्रियोंको रखना चाहिए। उसके नीचे चौथी पंक्तिमें आहार, भय, मैथुन और परिग्रहसंज्ञाको रखना चाहिए। उसके नीचे पाँचवीं पंक्तिमें 'न करता है', 'न कराता है' और न 'दूसरोंको करता हुआ देखकर उसकी अनुमोदना करता है'—इन तीनोंकी स्थापना करनी चाहिए। उसके नीचे छठी पंक्तिमें मन, वचन और कायको रखना चाहिए। इनको मिलाकर भेदोंका उच्चारण इस प्रकार करना चाहिए—क्षमा धर्मसे युक्त पृथ्वीकायके आरंभको, श्रोत्रेन्द्रियके द्वारको बन्द करके, आहारसंज्ञासे रहित, मनसे नहीं करता है, । इस प्रकार पृथ्वीकाय और उसके नीचेके सब विकल्पोंको दसों धर्मोंके साथ लगानेसे दस भेद होते हैं। इसी प्रकार जलकाय, अग्निकाय वगैरह दूसरी पंक्तिके दसों विकल्पोंके दस दस भेद जान लेने चाहिए । सब मिलाकर सौ भेद हुए।

इन सौ भेदोंमें श्रोत्रेन्द्रिय सम्मिलित है। क्योंकि कायके बदलते रहनेपर भी नीचेके सब विकल्प प्रत्येकके साथ ज्योंके त्यों रहते हैं। अतः श्रोत्रेन्द्रियके स्थानमें चक्षुन्द्रियको रखनेसे उसके भी इसी प्रकार सौ भेद होते हैं। इसी प्रकार शेष इन्द्रियोंके भी जानने चाहिए। इस प्रकार पाँचों इन्द्रियोंके पाँचसौ भेद होते हैं। इन पाँचसौ भेदोंमेंसे प्रत्येकके साथ आहारसंज्ञा लगी हुई है; क्योंकि धर्म, काय और इंद्रियोंके परिवर्तन होनेपर भी अभी संज्ञा आदिका परिवर्तन नहीं हुआ है । अतः आहारसंज्ञाकी ही तरह भय, मैथुन और परिग्रहसंज्ञाके भी पाँचसौ पाँचसौ भेद हुए। सब मिलाकर दो हजार भेद हुए। इन दो हजार भेदोंमें प्रत्येकके साथ 'नहीं करता है' विकल्प लगा हुआ है; क्योंकि अभी संज्ञासे नीचेके विकल्पोंमें परिवर्तन नहीं हुआ। अतः शेष दो विकल्पोंके भी दो दो हजार भेद होते हैं। तीनोंके मिलाकर छह हजार भेद होते हैं, इन छह हजार भेदोंमेंसे प्रत्येकके साथ मन सम्मिलित है, वचन

और काय सभी व्यक्ती हैं। अतः उनके भी छह छह हजार भेद होते हैं। इस प्रकार तीनोंके मिलाकर शीलके अठारह हजार भेद बनते हैं।

शीलार्णवस्य पारं गत्वा संविग्नसुगमपारस्य ।
धर्मध्यानमुपगतो वैराग्यं प्राप्नुयाद्योग्यम् ॥ २४६ ॥

टीका—शीलं मूलोत्तरगुणाः। शीलमर्णव इव दुरुत्तरत्वाद् अनेकातिशयनिनाधारत्वाद्वा। पारं गत्वा सम्पूर्णमवाप्य। कथं पुनः केन वा पारं गम्यते? संविग्नसुगमपारस्येति—संविग्नाः संसारभीरवः सुखेनैव सकलशीलप्रापिणो भवन्ति। लब्ध्वा च सम्पूर्णशीलं धर्मध्यानं प्राप्तः। वैराग्यं प्राप्नुयाद्योग्यमिति। तत्कालावस्थायामुचितं प्रकृष्टवैराग्यमित्यर्थः ॥ २४६ ॥

अर्थ—संसारसे भयभीत साधुजनोंके द्वारा सरलतासे पार करनेके योग्य, शीलरूपी समुद्रके पारको प्राप्त करके जो धर्मध्यानमें तत्पर होते हैं, उन्हें योग्य वैराग्यकी प्राप्ति होती है।

भावार्थ—यह शील समुद्रके समान है। जिस प्रकार समुद्रका पार पाना कठिन होता है और उसके अन्दर अनेक बहुमूल्य रत्न भरे होते हैं, उसी प्रकार शीलके भेद—प्रभेदोंका पार पाना भी कठिन है और उसके अंदर भी अनेक गुण-रत्न भरे हुए हैं। जो साधुजन संसारसे भयभीत हैं, वे उस शील-सागरको सरलतासे पार कर सकते हैं। अतः उसे पार करनेके लिए संसारभीरु होना चाहिए। और जो उसे पार करके अर्थात् शीलके अठारह हजार भेदोंको धारण करके धर्मध्यानमें अपने मनको लगाता है, उसे उस अवस्थाके योग्य उत्कृष्ट वैराग्यकी प्राप्ति होती है। यही उसका फल है।

तच्च धर्मध्यानं चतुर्भेदमाचक्षाण आह—

धर्मध्यानके चार भेद कहते हैं:—

आज्ञाविचयमपायविचयं च स ध्यानयोगमुपसृत्य ।
तस्माद्विपाकविचयमुपयाति संस्थानविचयं च ॥ २४७ ॥

टीका—आज्ञाविचयमपायविचयं विपाकविचयं संस्थानविचयं च। स खलु चतुःप्रकारं धर्मध्यानं शीलार्णवपारगामी। आद्यध्यानद्वयमुपाश्रित्य सम्प्राप्य ततस्तृतीयं विपाकविचयमुपयाति। ततस्तुरीयं संस्थानविचयमभ्येति ॥ २४७ ॥

अर्थ—शील-समुद्रका पारगामी साधु आज्ञाविचय और अपायविचय नामके ध्यानयोगको प्राप्त करके विपाकविचय और संस्थानविचय नामके धर्मध्यानोंको प्राप्त करता है।

भावार्थ—धर्मध्यानके चार भेद हैं—आज्ञाविचय, अपायविचय, विपाकविचय और संस्थान-

१—लब्ध्वा नास्ति भ० प०। २—ध्यानं प्राप्तः फ० ब०

अशुभशुभकर्मपाकानुचिन्तनार्थो विपाकविचयः स्यात् ।
द्रव्यक्षेत्राकृत्यनुगमनं संस्थानविचयस्तु ॥ २४९ ॥

टीका—अशुभं शुभं च कर्म द्वयोःकोऽयो (द्वयोः) वर्तते, तस्य पाको विपाकोऽनुभवो रस इत्यर्थः । तस्यानुचिन्तनं प्रयोजनमशुभनां कर्मांशानामयं विपाकः शुभानां चायमिति । संसारभाजां जीवानां तदन्वेषणं विपाकविचयः । द्रव्यक्षेत्राकृत्यनुगमवान् धर्मो द्रव्यमधर्मश्च तौ लोकपरिणामौ तयोः संस्थानं लोकाकाशस्येव । 'तत्राधोमुखमल्लक' इत्यादावुक्तम् । पुद्गलद्रव्यमनेकाकारमचित्तमहास्कन्धश्च सर्वलोकाकारः । जीवोऽप्यनेकाकारः शरीरादिभेदेन यावल्लोकाकारः समुद्घातकाले । कालोऽपि यदा क्रियामात्रं द्रव्यपर्यायस्तदा द्रव्यकार एव । यदा तु स्वतन्त्रं कालद्रव्यं तदैकसमयाऽर्द्धतृतीयद्वीपसमुद्राकृतिरित्येकसंस्थानविचयः ॥ २४९ ॥

अर्थ—अशुभ और शुभ कर्मोंके रसका विचार करना-विपाकविचय नामके धर्मध्यानका अर्थ है । और द्रव्य तथा क्षेत्रके आकारका चिन्तन करना संस्थानविचय नामका धर्मध्यान है ।

भावार्थ—कर्म दो प्रकारके हैं—एक शुभ और दूसरा अशुभ । दोनों ही प्रकारके कर्मोंके अनुभवका विचार करना कि अशुभ कर्मोंका यह फल होता है और शुभ कर्मोंका यह फल होता है, इसे विपाकविचय कहते हैं । जीव, पुद्गल, धर्म, अधर्म, आकाश और काल ये छह द्रव्य हैं । ऊर्ध्वलोक, मध्यलोक और अधोलोक—ये तीन क्षेत्र हैं । इनके आकारका चिन्तन करना संस्थानविचय है । जैसे, धर्म और अधर्म द्रव्य लोकके बराबर हैं । उनका संस्थान लोकाकारके ही समान है । लोकका आकार पहले बतला आये हैं । पुद्गलद्रव्यके अनेक आकार हैं । अचेतन महास्कन्ध सम्पूर्ण लोकके आकार है । जीव भी शरीर आदिके भेदसे अनेक आकारवाला है । केवली समुद्घातके समय वह लोकके आकार हो जाता है । कालद्रव्य भी जब द्रव्यकी पर्यायरूपसे लिया जाता है तो द्रव्यके ही आकार होता है और जब स्वतन्त्र द्रव्यरूपसे लिया जाता है तो अढ़ाई द्वीप, और दो समुद्रवर्ती एक समयरूप है । इस प्रकारका विचार संस्थानविचय है ।

सम्प्रति पारम्पर्येण धर्मध्यानस्य विशिष्टफलदर्शनायाह—

अब परम्परासे धर्मध्यानका विशेष फल बतलाते हैं:—

जिनवरवचनगुणगणं संचिन्तयतो वधाद्यपायांश्च ।
कर्मविपाकान् विविधान् संस्थानविधीननेकांश्च ॥ २५० ॥

टीका—जिनानां वरास्तीर्थकरास्तेषां वचनं तस्य गुणो अहिंसकत्वादयस्तेषां गणः समूहस्तम् । संचिन्तयतः सम्यगालोचयतः आज्ञागुणान् । वधाद्यपायांश्च हिंसादिभेदांस्तु चिन्तयतो वधबन्धनाभियोगाभ्याख्यानप्रभृतीन् । मूलादिभेदेनच कर्मणां विपाकान् विविधान् शुभानशुभांश्च, चतुर्भेदे संस्थानविधीन् संस्थानप्रकारान् दर्शितान् । २५०

[illegible]

किं भवतीत्याह—

नित्योद्विग्नस्यैवं क्षमाप्रधानस्य निरभिमानस्य ।
धुतमायाकलिमलनिर्मलस्य जितसर्वतृष्णस्य ॥ २५१ ॥

टीका—नित्यमित्यहर्निशमुद्विग्नो भीतः संसारात्। एवमुक्तेन प्रकारेण। क्षमाप्रधानस्य क्षमामूलत्वाद्धर्मस्य तत्प्रधानत्वम्। निर्गताभिमानस्य गर्वरहितस्येति। धुतमायाकलिमलनिर्मलस्य धुता विक्षिप्तो मायैव कलिमलः कल्मषं पापं तत्क्षपयतः जितस्य (सर्व) लोभकषायस्य ॥ २५१ ॥

तुल्यारण्यकुलाकुलविविक्तबन्धुजनशत्रुवर्गस्य ।
समवासीचन्दनकल्पनप्रदेहादिदेहस्य ॥ २५२ ॥

टीका—तुल्यमरण्यं कुलाकुलश्च जनपदः सदृशः स्वात्मकार्यव्यग्रत्वात्। यादृगरण्यं तादृग् जनाकुलमपि। विविक्तबन्धुजनशत्रुवर्गस्य बन्धुजनः स्वजनलोकः शत्रुवर्गो रिपुसमूहस्तौ विविक्तौ यस्य पृथग्भूतात्मनः सकाशात्। यथा बन्धुवर्गस्तथा शत्रुवर्गः, मत्तोऽन्य एव बन्धुवर्गः शत्रुवर्गश्च विविक्तः, तत्र तुल्यचित्तवृत्तिः। यथा स्वजनवर्गस्तथा शत्रुवर्गोऽपीति। तथा समस्तुल्यो यो वास्या तक्ष्णोति यश्च चन्दनादिनोपलिम्पति। कल्पनं तक्षणम्, प्रदेह उपलेपनं चन्दनादिभिः। तत्र समवासी चन्दनकल्पनप्रदेहो (हादिर्यस्यैवंविधोदेहो) यस्य स एवमुक्तः ॥ २५२ ॥

आत्मारामस्य सतः समतृणमणिमुक्तलोष्ठकनकस्य ।
स्वाध्यायध्यानपरायणस्य दृढमप्रमत्तस्य ॥ २५३ ॥

